राष्ट्रिय संस्कृत संस्थानम्
नवदेहली

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठग्रन्थमाला

॥ २० ॥

त्रिविक्रमपण्डितविरचितः

पञ्चायुधप्रपञ्चभाणः

संपादकः
श्रीराम मिश्रः

योऽनूचानः स नो महान्
राष्ट्रियसंस्कृतसंस्थानम्

Rashtriya Sanskrit Sansthan

(Under the auspices of the Ministry of Human Resources Development, Govt. of India)

New Delhi

●

Ganganatha Jha Kendriya Sanskrit Vidyapitha

TEXT SERIES

●

General Editor

Dr. G. C. Tripathi

●

No. 20

PAÑCĀYUDHA PRAPAÑCA BHĀṆA

of

Trivikrama Pandita

Edited by

Shriram Mishra

Revised and seen through press by

Dr. Jagannath Pathak

ALLAHABAD

1986

राष्ट्रियसंस्कृतसंस्थानम्
(केन्द्रीयमानवसंसाधनविकासमन्त्रालयस्याङ्गभूतम्)
नवदेहली

—•—

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठग्रन्थमाला
प्रधानसम्पादकः
डॉ० गयाचरण त्रिपाठी

—•—

विंशं प्रसूनम्

पंचायुधप्रपञ्चभाणः

त्रिविक्रमपण्डितविरचितः

—•—

संपादकः
श्रीराम मिश्रः

पुनरीक्षकः
डा० जगन्नाथ पाठकः

—•—

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्
चन्द्रशेखर आज़ाद पार्क
प्रयागः–२
१९८९

त्रिविक्रमपण्डितविरचितः

पंचायुधप्रपञ्चभाणः

•

सम्पादकः

श्रीराम मिश्रः

पुनरीक्षकः

डा० जगन्नाथ पाठकः

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्

चन्द्रशेखर आज़ाद पार्क

प्रयाग-२

१९८६

प्रकाशक:
डॉ० गयाचरण त्रिपाठी
प्राचार्य:
गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्
चन्द्रशेखर आजाद पार्क
इलाहाबाद-२११००२

●

●

मूल्यम्

978-93-83135-36-3

●

मुद्रक:
शाकुन्तल मुद्रणालय:
३४, बलरामपुर हाउस
इलाहाबाद

FOREWORD

कोमलपदविन्यासं प्रचुररसालम्बनं स्वलंकारम् ।
तरुणीजनमिव भाणं रसिकमनोज्ञं त्रिविक्रमश्चक्रे ।।

We are presenting to the lovers of Sanskrit dramatic literature this fresh, critical edition of *Pañcāyudha-prapañca-bhāṇa* with a sense of contentment. This is a work of one Trivikrama who was a Maharashtrian scholar and lived probably in Poona towards the end of the 18th and the beginning of 19th century. The Bhāṇa was probably composed—or at least completed—in the City of Ujjain (Viśālā) in the Śaka year 1727 (=1805 A. C.) as per the statement of the dramatist himself in the colophone of the work. Though missing in the manuscript belonging to the library of this Institute, the genuineness of the colophone cannot be doubted since it is fonnd not only in the lithographed (Bombay, 1864) and the printed editions (Belgaum, 1892) but also in the paper-manucript deposited in the Saraswati Bhavan Library of Varanasi.

Pañcāyudhaprapañcaḥ is perhaps the largest hitherto known Bhāṇa of Sanskrit literature. The drama is composed in such a chaste and erudite Sanskrit, the plot is so interesting and captivating and the work is so perfect from the point of view of dramatic art that it can vie with even the best Bhāṇas of the classical and later classical age. It is surprising that such a work could be written, produced and enjoyed as late as 1805 A. C. when the Maratha power was no more in ascendence and the influence of European

Culture had already made itself felt, especially in and around Bombay, heralding an age in which traditional learning had already experienced a big jolt.

The word Bhāṇa is derived from the root *bhaṇ* = to tell, to narrate. Among the ten forms of Sanskrit plays, Bhāṇa is the form in which one single actor re-creates the whole drama with all its events and characters on the stage simply by narration, by descriptions, by repeating imaginary questions and giving their answers. The play is a running performance, the viṭa or the Bhāṇika continuously remains present on the stage, there being no division in acts.

The genre of *Bhāṇa* seems to have risen from unconventional folk theatre to a literary form. It has its origin in the witty and sarcastic remarks of a talented person accompanied by proper dramatic gestures in front of public, thus bringing to light the weaknesses of certain special caregories of people who are normally highly respected in the society It is full of humour and satire and aims at purging the society of its evil and incongruities, a very healthy and constructive approach indeed. This dramatic art is presently highly developed in western countries where the telecasts of expert artists dealing critically and sarcastically with the contemporary social and political situation send an audience of millions into roaring laughter. It seems that in ancient India too this art was practised as a full-fledged profession as a number of stone pillars and penals of Bharhut stūpa (2nd C. B. C.) have been donated by persons who call themselvess '*bhāṇaka-s*', viz :

अय इसिदिनस भानकस दानम् । कण्हिलस भानकस दानम् ।
नदगिरिनो भानकस सेलपुरकस थभो दानम् ।
भदतस अय इरिपालिनस भानकस नवकमिकस दानम् etc.

The terms *bhāṇaka* has rightly been interpreted as a person who

moves from village to village performing *bhāṇas* and is to be connected with the Hindi word भांड़ which denotes a person adept in the art of satirical sayings, farces and other sorts of humorous performances.[1] In order to cater to the taste of commonplace audience these भांड़s of North India often indulge in language bordering on obscenity which, however, seems to have its historical antecedent in the Sanskrit *bhāṇas*. In the long tradition of Sanskrit bhāṇas which started with the *Caturbhāṇī*[2] of Gupta age and continued till late in the modern times enriching the Sanskrit literature with approximately 120 Bhāṇas[3], by far the largest number of bhāṇas contain such words as शृङ्गार, अनंग, कन्दर्प, मदन, रति and रस etc. in their titles and almost invariably have one or more courtsans/dancing girls/prostitutes as their prominent characters.

It may be noted here in passing that of late this Vidyapeetha has also successfully endeavoured to stage one of the most charming. *Bhāṇas* of Sanskrit Literature, namely पद्म प्राभृतकम्. There have been four presentations of this play, three in Allahabad and one in Jammu. The roles of Dr. Azad Mishra as *Viṭa* and that of Sri Shriram Mishra as *Sūtradhāra* in these presentations have highly been appreciated by the Public.

The present edition of Pañcāyudhaprapañca-bhāṇa has been prepared on the basis of its lithographed edition (by Viṣṇu Vāsudeva Godbole, Bombay, *Śaka* year 1786) assisted by two further

---

1. Bhagavatilal Rajpurohit लोकपरम्परा में भाण in *Nāṭyam* (Sagar), Vol. IV, 1 (1985), p 73.
2. Published from Śivapuri (Madras) 1922. Hindi Tr. under the name *Sṛṅgārahāṭa* by V. S. Agrawal & Motichandra, Bombay, 1959.
3. This number has been given on the testimony of Shrinsvas Mishra, संस्कृत भाण साहित्य की समीक्षा, Meerut, 1978.

manuscripts, one deposited in the manuscripts Library of our Institue and the other procured from the Saraswati Bhavan Library of Varanasi. When the text had almost entirely been printed, I chanced upon a printed edition of this work in April 1986 in a small antiquarian shop in Poona issued by Ābāji Ramchandra Savanta in the Śaka year 1814 from Belgaum and brought it to Allahabad with me. It was unfortunately already late to make use of this book for the reconstruction of the text; however, we collated the text of the Belgaum edition with our own text and noted down the variant readings in an appendix. In case a second edition of this work is ever published, these readings will be properly taken care of and incorporated in the main body of the text; so also a few other manuscripts of this work which are available e.g. in the Manuscripts Libraries of Mysore and Baroda which could not be be procured for preparing this edition.

The task of editing this erudite work has been carried out by Shri Shriram Mishra, Lecturer in our Institute with utmost sincerity and devotion. Dr. Jagannath Pathak, Reader, has revised the script and seen the work through press. Both of them deserve my praise and gratitude. Let this work satiate the passion of literary reading of the *Sahṛdayas* and impart them aesthetic pleasure as desired by Trivikrama in the following verse :

स्मरकरतरवारिक्रूरधारानुकारी
तरुणहरिणनेत्रालोचनानां विलासः ।
कलयति हृदि येषामुच्चकैः स्वप्रभुत्वं
प्रभवति भुवि तेषामेष हर्षाय भाणः ॥

G. C. Tripathi
Principal

G. N. Jha Kendriya Skt Vidyapeetha,
Allahabad
24th March, 1986.

निवेदनम्

प्रस्तुतं संस्करणम्

त्रिविक्रमपण्डितविरचितस्य पञ्चायुधप्रपञ्चभाणस्य संस्करणमिदं मूलरूपेण, मुम्बईतः १८६४ ख्रिस्ताब्दे लिथो-लिप्यां प्रकाशितं संस्करणमाश्रित्य प्रस्तुतं वर्तते । संयोगादस्य 'निवेदनस्य' मुद्रणप्रसङ्गे एव भाणस्यास्य १८१४ शकाब्दे (१८९२ ख्रि०) बेलगांवपत्तने आवाजी रामचन्द्र सावन्तमहोदयेन प्रकाशितं प्रतीक्ष्यमाणं संस्करणमुपलब्धम् । पाठभेदनिर्देश पूर्वं अस्योपयोगः प्रस्तुते संस्करणे क्रियते एतदतिरिक्तं पाण्डुलिपिद्वयमस्य संस्करणस्य मया यथासम्भवं प्रामाण्यं नेतुमाश्रितम् ।

(क) प्रतिलिपिः—

षट्त्रिंशत्पत्रमयो हस्तलिखितोऽयं ग्रन्थोऽस्माकं विद्यापीठस्य मातृकाग्रन्थागारे सुरक्षितः । आरम्भतः पत्रत्रयमस्मिन् ग्रन्थे न लब्धम् । नागरीलिपिनिबद्धेऽस्मिन् पुष्पिका नास्ति ।

(ख) प्रतिलिपिः—

नागरीलिपिनिबद्धः पाण्डुग्रन्थोऽयं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनपाण्डुग्रन्थागारादस्माभिरुपलब्धः (क्र० सं० १२।१४४) । यद्यप्ययं पाण्डुग्रन्थः पूर्णस्तथापि अव्यवस्थितो लेखनाशुद्धिग्रस्तश्च ।

लिथोसंस्करणस्यान्ते ख—प्रतिलिप्यां ग्रन्थस्य समाप्तिकाल एभिः शब्दैर्निदिष्टः—

ऋषिनयनाचलशशिमित-
शकवर्षे(१७२७) क्रोधनामिधे शुक्रे ।
यातः सितद्वितीया-
सुरगुरुदिन एष पूर्णतां भाणः ॥
जयति धृतपुण्ड्रचाप-
श्चरणसरोजानताखिलाशापः ।
पुरहरपुण्यविवर्त्त-
स्त्रिविक्रमाघौघजन्तुसंवर्त्तः ॥

अनेनाधारेण ग्रन्थस्यास्य निर्माणकाल: १८०५ ख्रि० वर्तते । अस्य निर्माणस्थली च (पुण्यपुरं) वर्तमानं पुणे नगरमस्ति[1] ।

त्रिविक्रमपण्डितः

भाणस्यास्य प्रणेता त्रिविक्रमपण्डितः साहित्यमीमांसाशास्त्रनिष्णातस्य त्र्यम्बकपण्डितस्यानुजः शिष्यश्चासीत्[2] । अस्य जनकश्चिद्घनानन्दनाथो जननी च अनसूया [3]केनकम्मा वाऽसीत् । यादवेन्द्रमहोदय-शंकरमन्दारसौरभयोरुभयोर्ग्रन्थयोः कर्त्ता च नीलकण्ठस्तत्पुत्रः । पत्नी च पार्वत्यासीत् । एतावदेव कविवरस्य त्रिविक्रमस्य विषये ज्ञातं भवति । अष्टादशशताब्द्या अन्तश्चैकोनविंशत्या आरम्भश्चास्यानुमानिको जीवनकालः कल्पयितुं शक्यते ।

भाणस्वरूपम्

जानन्त्येव सर्वे यत् भाणः दशविधेषु रूपकेषु एकः प्रकार इति । व्योमोक्त्या (आकाशभाषितेन) नायकेन स्व-परवृत्तं प्रकाश्यते यत्रेति भाणः । तत्र

---

१. एन० सी० सी० VOLL 11 P. 73 B. ।

२. पञ्चायुधप्रपञ्चभाणः—श्लोक ८.९ ।

३. एन० सी० सी० VOLL N. P. N. 264 A.

भण् धातोर्भावे घञि कृते, अपि च करणे घञि कृते सति कथनं वक्तव्यं वा इत्यर्थमवगमयति। अपि च करणे घञि कृते सति कथनं भवेदित्यर्थो भवति। अपरञ्च भण् धातोर्णिजन्तरूपं भाणि इत्यनेन अनुकरणात्मकं तत्त्वमेकं सुस्पष्टं प्रतिभाति।

तत्र नाटयशास्त्रेऽपि भाणप्रसङ्गे व्याख्यायामाचार्याभिनवगुप्तपादेन भाणि धातोरस्य निष्पत्तिर्मन्यते[1]। सकलाभिधानकोशेष्वपि ध्वनिविशेषानुकृतिर्हि भाणि इत्येवमुच्यते।

कथावस्तु

संस्कृतसाहित्ये भाणानां निर्माणप्रवृतिर्गुप्तकालत एव लक्ष्यते। चतुर्भाणीति नाम्ना प्रकाशिते भाणसंग्रहे वररुचेः उभयाभिसारिका, शूद्रकस्य पद्मप्राभृतकं ईश्वरदत्तस्य धूर्त्तविटसंवादः श्यामिलकस्य च पादताडितकम् इत्येषां चतुर्णां भाणानां समवायः प्राकाश्यं नीतः। चतुर्भाण्याः प्रशस्तौ कस्यापि पद्यमिदमाकलनीयं वर्तते—

वररुचिरीश्वरदत्तः श्यामिलकः शूद्रकश्च चत्वारः।
एते भाणान् बभणुः का शक्तिः कालिदासस्य॥

एवं मुकुन्दानन्दभाण-रससदनभाणाद्या अनेके भाणा यथाकालं कविभिर्निर्मिताः। काव्यमालायां कतिचन प्रकाशिता अपि सन्ति। यद्यपि भाणानां कथावस्तु विटगणिकादिसमाजमध्य एव निर्मितं भवति तथापि परिहासव्यङ्ग्योस्तेषु सर्वत्रापि प्राधान्यं परिलक्ष्यते। चतुर्भाण्यां तु सर्वतोऽपि वैशिष्ट्यं वर्तत इति नास्ति संशीतिलवः।

---

१. एकेन मुखेननैव भण्यन्ते उक्तिभन्तः क्रियन्ते,
अप्रविष्टा अपि पात्रविशेषा यत्रेति भाणः॥
(अभिनवगुप्त;, अभिनवभारती टीका-ना० शा० गा० ओ० सो० पृ० ४४६)

अर्वाचीनेषु भाणेषु त्रिविक्रमपण्डितस्य पञ्चायुधप्रपञ्चभाणस्य किमपि वैशिष्ट्यं स्यादिति प्रथमं तदीयकथावस्तुविषयमालक्ष्य किञ्चिद् प्रस्तूयते—

कन्दर्पविलासाख्यो विट: स्वप्रियाया अन्वेषणार्थं निर्गत: । मध्ये तन्मित्रं मन्दारशेखरो मिलति । वार्त्तालापप्रसङ्गे मन्दारशेखरो निर्दिशति यत् कामाङ्गमञ्जर्या सह तदीय: परिचयो बाल्यकालादेवास्ति । उभयोरपि अध्ययनमेकस्यां पाठशालायां सञ्जातम् । यौवने पुष्पाण्यवचिन्वत्यास्तस्या: शरीरसंस्पर्शो जात: । तदैव तयो: प्रेम्ण: सूत्रपातोऽभूत् । कालान्तरेण कामाङ्गमजरी पतिगृहान्मन्दारशेखरं प्रति पत्रद्वयं प्रेषितवती । तदनन्तरं मणिमण्डनाख्ये ग्रामे शिवोत्सवदर्शनव्याजेन गतो मन्दारशेखर: प्रियादर्शन-विरहित: पत्रमेकं विलिख्य तद्गृहं प्रेषितवान् । प्रियाया: पत्रोत्तरेण प्रसन्न: स तां प्रतीक्षमाणस्तत्रैव स्थित: । स्वव्यवहारै: सर्वान् विजित्य कामाङ्गमञ्जरी रात्रौ भूताविष्टेव मूर्छिता सती गृहद्वारे पतिता । कुटुम्बिनस्तदुपचारं बहुविधं तान्त्रिकै: कारितवन्त:, किन्तु न किमपि सिद्धम् । भूताविष्टा च सा उच्चस्वरेण कथितवती यत्—"शृणु रे ! मणिभद्राख्योऽहं वैश्रवण:, पुरा किल अलक-नन्दायास्तटे पुत्रप्राप्त्यर्थं तपस्यमानां औशीनरस्य पत्नीं वासनयाऽपश्यं तदा रुष्टश्च मे स्वामी मां शशाप । पुनश्चानुनयेन प्रार्थनया च प्रसन्नेन स्वामि-नैतन्निर्दिष्टम् यज्जन्मान्तरे यदेयं कामाङ्गमञ्जरी इत्याख्यया प्रादुर्भविष्यति तदा पुत्रप्राप्तिपर्यन्तमस्या गृहे कन्दरायां वा पूर्णसुखोपभोगस्त्वया कर्त्तव्य: । अस्माद्धेतो: स्वामिनोऽनुज्ञयाऽत्रागतोऽहमिदानीम् । इति श्रुत्वा कामाङ्गमञ्जर्या बान्धवै: 'सर्वनाशे समुत्पन्नेऽर्धं त्यजति पण्डित' इति न्याय्यमाश्रित्य मणिभद्राय यथेच्छं रमस्वेति स्वीकृतम् । कामाङ्गमञ्जर्यामाविष्ट: मणिभद्र: पुनरवदत्—अयि कामरूपधारिणं मणिभद्रं य: कोऽपि द्रक्ष्यति तदा क्षिप्रमेव मरिष्यति । एवमु-क्त्वा सा भूमौ पतिता । किञ्चित्कालानन्तरं सा स्वस्था जाता । बान्धवेभ्य: अखिलवृत्तान्तमेतं श्रुत्वा साश्चर्यमभिनटन्ती सा कथितवती—अहह स्वप्नेऽपि परपुरुषस्पर्शो न युक्त:, कथं यक्षेण सहाभिचरिष्यामि, कुलञ्च मे कलङ्कितं भविष्यति । पुनश्च सा बान्धवानुमन्यमाना तत्परा सती स्वीकृतवती । अथ

च रमणीये केलिगृहे तया सह यथाकालं रमणं कृतवान् मन्दारशेखरः। श्रुत्वैतद्वृत्तं कन्दर्पविलासः कामाङ्गमञ्जर्याः प्रतिभां प्रशंसति स्म।

कन्दर्पविलासमन्दारशेखरयोर्वार्ताक्रममध्य एव नगरवारवधूवृत्तनिपुणो मित्रं शृङ्गारचषकस्तत्र समागतः।

सोऽपि कन्दर्पविलासं स्वप्रणयप्रपञ्चमश्रावयत्। यथा एकदा शृङ्गारचषकः स्वप्रेयस्या रसोर्मिकायाः पतिगृहं केनचिदन्यकार्यव्यपदेशेन गतवान्। तत्र च समस्तस्त्रीमध्याद् बहिर्निर्गत्य रसोर्मिका लज्जयाऽनुरागमय्या च दृष्ट्या तस्याभिनन्दनं कृतवती। गृहे तस्याः चातुर्येण स कुटुम्बिनः प्रसाद्य तस्या अङ्गाभिमर्दनमपि कृतवान्।

शृङ्गारचषकस्य कथामिमां श्रुत्वा वेशवाटीं प्रत्यागतौ तौ ताम्बूलचर्वणं कुर्वन्तमेकं यतिमपश्यताम्। ताम्बूलचर्वणे वेशवाटीभ्रमणे ईश्वराराधने च किं सामञ्जस्यमिति कन्दर्पविलासस्तमपृच्छत्। तेन कथितं यत्—

येन केनाप्युपायेन यस्य कस्यापि देहिनः।
सन्तोषं जनयेत्प्राज्ञस्तदेवेश्वरपूजनम्॥

अथ च ताम्बूलमनाथाभिः सभक्तिभावाभिः समर्पितं तासामेव सन्तोषं जनयता मया स्वीकृतं न तु कोमतः। एवमग्रे वेशवाट्यां रतिमर्दिता विलासवैजयन्ती वसन्तकलिका अनङ्गलीला अर्थतृष्णा विनोदचन्द्रिका प्रसादकन्दली नक्षत्रमाला इत्येता वारस्त्रियः पथि समागताः।

ततो ब्रह्मवटोः प्रभासकौमुद्याश्च प्रेमप्रपञ्चः। तदनन्तरं केवलमेढ्रस्य हेमप्रभायाश्च शृङ्गारकथा। तत्पश्चात्प्रपापालिकाभिः परिहसन्तौ तौ पुरः प्रस्तुतस्य मदनमङ्गलस्य मित्रस्य प्रणयवेदनां शृण्वन्तावेवास्ताम्। तदैव कमनज्योत्स्ना तत्राऽऽगता। सा कन्दर्पविलासं प्रति कलहंसलीलायाः अनुरागं विरहवेदनाञ्च वर्णितवती। श्रुत्वेदं कन्दर्पविलासेन पुरस्कृतो मन्दारशेखरः स्वमित्रस्य प्रियायाः कुशलञ्च ज्ञातुं प्रस्थितोऽभूत।

एतदनन्तरमेकाकिना पर्यटता कन्दर्पविलासेन श्रुतं यत् तस्य प्रिया कलहंसलीला केलिगृहात् कुत्रचिददृश्यत्वं गतेति प्रियां सम्बोध्य स विललाप। यावदेव कन्दर्पविलासो वियोगसागरे निमग्न आसीत् तावदेव कमनज्योत्स्नया सह भद्रजटा तत्र समागता। कन्दर्पविलासं समाश्वासयन्ती सा उक्तवती यत् कामसंतप्तायाः कलहंसलीलायाः तिरस्करिणीविद्यया तयैव अदृश्यत्वव्यवस्था आसीत्। एतदनन्तरं कलहंसलीलाञ्च कन्दर्पविलासाय समर्पितवती। भद्रजटादेवी ससाधुवादं आशीर्वचनमुक्तवतीति कथासंक्षेपः।

नाट्यशास्त्रीयं कथावस्तुसंयोजनम्

भाणेऽस्मिन् कन्दर्पविलासाख्यस्य नायकस्य कलहंसलीलायाश्च नायिकायाः प्रणयः आधिकारिकवस्तुरूपेण वर्तते। अथ चात्र मन्दारशेखरस्य तत्प्रेयस्याः कामाङ्गमञ्जर्याश्च प्रणयः प्रासङ्गिकवस्तुतया नियोजितमस्ति। मन्दारशेखरः सर्वत्रैव विटस्य सुखदुःखयोः सहायको भूत्वा प्रवर्तते। अपि चात्र रसोर्मिकाशृङ्गारचषकयोः कथा-प्रसङ्गः प्रकरीरूपेण कल्पयितुं शक्यते।

अत्र कन्दर्पविलासो विटः प्रियावियुक्तः प्रातःकालं वर्णयन् भ्रमति। ततस्तन्मित्रं मन्दारशेखरस्तत्रैव समायाति मिलति च। भाणस्यास्य द्विचतुर्थकं भागं परिसमाप्य नायिकायाश्चर्चा भवति। तत्र कदाचित् नायिकाप्राप्त्यर्थं प्रयत्नोऽपि नायकस्य न प्रतिभाति। अतस्तत्र मुखसन्धिरपूर्ण इति वक्तुं शक्यते। अपि च निर्वहणसन्धिः साङ्गोपाङ्गं पूर्णतामेति।

प्रारम्भतो भाणस्य स्वप्रियायाः कलहंसलीलायाश्चिन्तनं कन्दर्पविलासद्वारा बीज इति, अर्थप्रकृतिश्च प्रियान्वेषणे, तद्गमनमारम्भः कार्यावस्था इति शक्यते वक्तुम्। अनयोश्च संयोगेन मुखसन्धौ प्रियावियोगे विटेन चिन्तनम्, प्रातःकालवर्णनम्, मन्दारशेखरमेलनम्, सुविस्तृतप्रसङ्गः वेशस्य च, रसोर्मिकाशृंगारचषकयोः प्रेमसम्बन्धः, कमनज्योत्स्नया कलहंसलीलाशिरोवेदनायाः, तस्या तिरोभावस्य च वर्णनमित्यादयः कथा मुख्याः सन्ति। भगवत्या भद्र-

जटाया विटं प्रति सर्ववृत्तान्तसमुद्घाटनम्, धैर्य्याश्वासनञ्च, प्रेयस्या सह त्रिमासं यावद्रमणोपदेशः अर्थप्रकृतिः। एवञ्च तिरस्करिणीविद्योन्मूलने सति कलहंस-लीलाऽवाप्तिरिति फलागमः कार्यावस्था।

समेषामेतेषां समन्वयाद् घटितश्च निर्वहणसन्धिः। भद्रजटाया विटं प्रत्यागमनं कलहंसलीलासम्बन्धिसूचनयाऽवबोधनम्, द्वयोः समागम एवात्र स्वल्पीयसी घटना।

विटेन कन्दर्पविलासेन नयनमार्गाद् हृदि सन्निविष्टायाः कलहंसलीलाया नैरन्तर्येण चिन्तनं स्मरणञ्च उपक्षेपः। तथा च अस्यैव प्रसङ्गस्याग्रे क्रमशः विस्तरतः परिकरो नाम मुखसन्ध्यङ्गं प्रतिभाति। अनेन प्रकारेण भाणेऽस्मिन् द्व्यङ्गं मिलति मुखसन्धेः।

प्रियावाप्तिसूचकं विटदक्षिणनेत्रभुजस्पन्दनं बीजोपगमनादिति हेतोरत्र सन्धिः स्यात्। भगवत्या भद्रजटया प्रियावाप्तिर्भविष्यतीति ज्ञात्वा आनन्दः। कमनज्योत्स्ना-भद्रजटा-कन्दर्पविलास-मन्दारशेखरप्रभृतीनां परस्परं वार्त्तालापः परिभाषा। भगवत्याः कथनमिदं यद् वत्स! कलत्रवद् रमस्व अनया सह त्रिमासं यावदिति कृतिः। तिरस्करिणीविद्यया तिरोहिता कलहंसलीलेति, देव्या मन्दिरे च तत्कुटुम्बद्वारा स्थित्वा त्रिमासं यावत् अर्चना विधेयेति भद्रजटाया निदेशस्तदघटनाया अद्भुतत्वात्, उपगूहनम्, अन्ते च विटेन स्वभाग्योदयवर्णनं भाषणम्। भगवत्या विटं प्रति तत्प्रियत्वसिद्धिरूपः प्रश्न उपसंहारस्तथा समाप्तौ भरतवाक्यं प्रशस्तिनामान्येतानि निर्वहणसन्ध्यङ्गानि।

सन्ध्यन्तराणि यथा—कामाङ्गमञ्जर्या स्वप्रियाय मन्दारशेखराय पत्र प्रेषणं लेखः। कामाङ्गमञ्जर्या उपपतिसम्मेलने भूताविष्टत्वरूपाचरणम्, अथ च कुटुम्बिने धौर्त्यं प्रत्युत्पन्नमतित्वम् अपि च शृङ्गारचषकेण प्रियाया रसोर्मिकायाः प्राप्त्यर्थं कृतो विविधोपायः प्रत्युत्पन्नमतित्वस्योदाहरणम्।

नाट्यालङ्करणानि—प्रभासकौमुद्या वाराङ्गनया प्रताडितस्य विप्रवटो-र्विटमन्दारशेखराभ्यां साहाय्यं (साहाय्यं नाम) नेदीयसीं पुत्रवतीं दृष्ट्वा स्वकीयाश्चापुत्रां पत्नीं ताडयन्तं मदनमंगलंप्रतिविटमन्दारशेखराभ्यां भर्त्सना परीवाद:, अदृश्यविद्यया प्रिया कलहंसलीलाऽदृश्या कुत्रचिदिति श्रुत्वा विटस्य शोकाकुलत्वं रुदितप्रलापादि **आक्रन्द:**, विटस्य च प्रियया सह पूर्वरतिक्रीडा स्मरणं **आख्यानम्**, अपि च चन्द्रोदये प्रियाऽवाप्त्याशा विटस्य आकांक्षा **आशंसा**दिकानि इमानि नाट्यालङ्करणानि प्रयुक्तानि सन्ति ।

कलहंसलीलाया वियोगे विट-कन्दर्पविलासस्य मदनजन्यमनोदशाया: प्रकाशो **विलाप:**, विलासबन्धो: पत्न्या: कलहंसलीलाया: शिरोवेदनामिषेण कन्दर्पविलाससम्बन्धिविरहदशागोपनं संतापश्च **ताप:**, प्रियायाश्च दयनीयत्वं ज्ञात्वा विटस्य रोदनं **बाष्प:**, तदवसरे मन्दारशेखरेण धैर्यदानं **आश्वास:**, कम-नज्योत्स्नया मेलने विटस्य पुन: परिवेदनं **विलापश्च** । समेत्येमानि शिल्प-काङ्गानि ।

प्रस्तुतस्यास्य भाणस्य धीरललितप्रकृतिक: कन्दर्पविलासो नामा विटो नायक: । यावत्प्रभृति कलहंसलीलां नायिकां स दृष्टवान् तावदेव कामातुर-स्तद्विरहातुरश्चि तष्ठति । तामन्वेषयन् कदाचिदितस्ततो वेशवाटं अटन् मित्रेण मन्दारकेण सह नर्मालापपरस्तद्गृहं प्रति गच्छति । तत्र भद्रजटाप्रयत्नात् त्रिमासं यावत् प्रियामवाप्य प्रसन्नस्तिष्ठति ।

भाणसाहित्यविषये किञ्चित्

भाणानां परम्परायां चतुर्भाण्यां संगृहीतान् प्राचीनतमान् भाणान् विहाय न कोऽपि परवर्तिकालिको भाणस्तादृशीं परिहासव्यङ्ग्यपेशलां बहुमुखीं वाग्मितां लालित्यञ्च निसर्गसुन्दरं बिभर्तीति तद्विदां मतम् । परवर्तिकालिकेषु भाणेषु श्रीरामभद्रदीक्षितस्य शृङ्गारतिलकभाण:, श्रीनल्लाकवे: शृङ्गारतिलक-भाण:, युवराजकवे: रससदनभाण:, श्रीकाशीपते: मुकुन्दानन्दभाण:, श्रीवामन-

भट्टवाणस्य शृङ्गारभूषणाख्यो भाण:—इत्यादयोऽनेके भाणाः प्रकाशिता विदुषां सहृदयानाञ्च दृष्टिपथमागताः। तस्यामेव परम्परायां प्रस्तुतस्य त्रिविक्रम-पण्डितविरचितपञ्चायुधप्रपञ्चभाणस्यापि परिगणनं शक्यते कर्तुम्। यदि तटस्थया दृष्टचा सर्वेषामेषामाकलनं क्रियते तदा सर्वत्र सामान्य एव प्रसङ्गाः क्षुद्रा एव शृङ्गारालिङ्गिता भणितयः, मनोविरागजनका अश्लीलप्रायाः कतिचन प्रयोगाः परिलक्ष्यन्ते। हेतुभिरेतैस्तान् कविवरान् प्रति न तथा श्रद्धातिरेकः समुपजायते।

परिहासालापाः केवलं न मनो रञ्जयन्ति परं काममपि परिहासशीलस्य सूक्ष्मेक्षिकां प्रथयन्ति। दौर्भाग्यतः परवर्तिषु भाणेषु नैषा स्थितिः परिलक्ष्यते। सर्वत्रैव गणिकानां वेशवाटी भाणानां मूलस्थानतया परिगृहीता भवति। वेशवाटीं परितो विचरन् कश्चिद् विटो तादृशैरेवासामाजिकैर्जनैः सह परिहसन् प्रस्तूयते। सर्वत्रैव कस्याश्चित् केनापि सह प्रणयकलहः वञ्चितकम्, धूर्तवृत्तिः—इत्यादयोऽनेके विषयाः संवर्णिताः परिलक्ष्यन्ते।

एतावति सत्यपि भाणसाहित्यस्य प्रहसनसाहित्यस्य च संस्कृते समुपलभ्यमानस्य किञ्चिद् न्यूना स्थितिः, तथापि संस्कृतस्यैकं वैशिष्ट्यमेषु सुरक्षितं वर्तते, यत्र सामान्यतः संस्कृतसाहित्यमाहात्म्यविदां ध्यानं नाकृष्टं भवति। एतद्विषये किञ्चिदत्र निर्दिश्यते—प्रायः संस्कृतकाव्यानि महनीयानेव जनान् देवलोकवास्तव्यान् दिव्यान् वा लोकानाश्रयन्ते। परममान्येन ध्वनिकृता श्रीमदानन्दवर्धनाचार्येण ध्वन्यालोके यदुक्तम्—अस्मिन् हि महाकविपरम्परावाहिनि संसारे द्वित्राः पञ्चषा वा कालिदासप्रभृतयो महाकवयः श्रूयन्ते। तदनुसारं ये द्वित्राः पञ्चषा महाकवय आसन् न तैः कश्चन सामान्यो जनः स्वकाव्यविषयतां नीतः। केनचित् मर्यादापुरुषोत्तमं श्रीराममाश्रित्य काव्यं निर्मितं केनचित् वा कञ्चन महावंशप्रसूतं पार्थिवमवलम्ब्य काव्यनिर्माणे प्रवृत्तेन जातम्। परं पुरातनानां केषामपि दृष्टिः सामान्यजनगता नासीत्। भाणकाराणां प्रहसनकाराणां च प्रसङ्गेऽस्मिन् सुमहानुपकारः शक्यते

वक्तुम्, यैः सामान्या उपेक्षिताः समाजतो बहिष्कृताश्च जनाः स्वकाव्यविषयतां नीताः। एतावताऽप्यत्वे तेषां प्रशंसनीयत्वमुल्लसितं भवति।

अस्माभिरपि आधुनिकसाहित्यविद्भिरेतया दृष्ट्या यदि भाणानां प्रहसनानां वाऽऽकलनं क्रियेत तदा तेषु केनचिदतिरिक्तेनैव वैशिष्ट्येण परिलक्षितेन भाव्यम्। प्रस्तुते भाणे कतिचन प्रसङ्गा विशिष्य मनोरञ्जका उपनिक्षिप्ताः कविना।

यद्यपि भाणोऽयं कथावस्तुसंयोजनदृष्ट्या पूर्वनिर्मितान् भाणान् नातिशेते, तथाप्यत्र कवेः त्रिविक्रमपण्डितस्य कवित्वं पदे पदे लक्षितं भवति। कतिचन प्रयोगाः आकलयतां सहृदयानां चेतः रमयितुं समर्थाः। कथायाः संयोजने कवेरीदृशं नैपुण्यं वर्तते येन क्वचिदपि उद्वेगो न भवति।

भाषायाः सौष्ठवमलङ्काराणां नियोजनं शृङ्गारस्य च सूक्ष्मः संस्पर्शः परिहासालापा भाणमिमं संस्कृतसाहित्ये पूर्वनिर्मितान् भाणान् कांश्चनावश्यमेव अतिशय्य वर्त्तमानं प्रमाणीकुर्वते।

आभारः

भगवतो नटराजस्यानुग्रहेणैतस्य पञ्चायुधप्रपञ्चभाणस्य सम्पादितस्वरूपमिदानीं संस्कृतानुरागिणां समक्षमुपस्थापयता मया महान् हर्षोऽनुभूयते।

दिल्लीस्थ राष्ट्रिय संस्कृतसंस्थानस्य सम्मान्या निदेशका डॉ० मण्डनमिश्रमहाभागाः प्रसङ्गेऽस्मिन् मया सर्वतोभावेन सश्रद्धं स्मरणीयाः, येषामहैतुकी कृपा मम निरन्तरं सम्बलमस्ति।

विद्यापीठस्य प्राचार्यवर्यान् डॉ० गयाचरणत्रिपाठिमहोदयान् प्रति हार्दिकं कार्त्तज्ञ्यं विनिवेद्यते, येषामनुकम्पयाऽऽदेशेन च ग्रन्थस्यास्य सम्पादने प्रवृत्तिर्मे जाता। यथासमयं तेषामुपलब्धः परामर्शो मत्कृते प्रदीपवन्मार्गदर्शकः संवृत्तः। डॉ० त्रिपाठिवर्यैः सद्य एव पुणेनगरात् १८९२ खिस्ताब्दे मुद्रितं भाण-

स्यास्य संस्करणमानीय सम्पादने यत् साहाय्यं प्रदत्तं तदादर्शभूतम्, अपारहर्षोत्पादकञ्च ।

अत्र गुरुकल्पानां डॉ० जगन्नाथपाठक महाशयानां प्रणामाञ्जलिपुरस्सरं साधुवादा वितीर्यन्ते, येषां सम्पादनेऽस्मिन् वात्सल्यपूर्णपरामर्शादिनाऽविस्मरणीयं सौलभ्यमनुभूतम् ।

अन्ते च शाकुन्तलमुद्रणालयव्यवस्थापकः श्री उपेन्द्रत्रिपाठी धन्यवादेन सम्भाव्यते, यस्य सहयोगेन ग्रन्थोऽयं यथासमयं प्राकाश्यं नीतः ।

सम्पादने याः काश्चन जानताऽजानता वा मया त्रुट्यः कृतास्ता भावुकैः-सहृदयैश्च विद्वद्भिः कृपया मर्षयितव्याः ।

प्रयागः
रामनवमी
१८-४-'८६

विदुषां वशंवदः
ललितललामः श्रीराममिश्रः

इदमिह पदं मा भूदेवं भवत्विदमन्यथा
कृतमिदमयं ग्रन्थेनार्थो महानुपपादितः ।
इति मनसि यः काव्यारम्भे कवेर्भवति श्रमः
सनयनजलो रोमोद्भेदः सतां तमपोहति ।।

न प्राप्नुवन्ति यतयो रुदितेन मोक्षं
स्वर्गायितिं न परिहासकथा रुणद्धि ।
तस्मात् प्रतीतमनसा हसितव्यमेव
वृत्तिं बुधेन खलु कौरुकुचीं विहाय ।।

—श्यामिलकस्य पादताडितकभाणात्

आपारलम्बिविधृते कनकोज्ज्वलाग्रे द्वे वाससी विशदकोमलसूक्ष्मसूत्रे ।
अंसे च तुल्यचतुरस्रतनुः पटोऽयं क्षिप्तो विचित्रपरिधिर्नवकुंकुमश्रीः ।।
कस्तूरिकातिलकमाहितमाननान्ते हस्तौ च साधु रचितौ कनकाङ्गुलीयैः ।
पाटीरपङ्कसरसं च भुजान्तरालं जातोऽस्मि हन्त रसिकेष्वहमग्रगण्यः ।।

—युवराजकवेः रससदनभाणात्

वैचित्र्याद् विषयस्य मार्दवजुषः कार्कश्यभाजः कवे-
र्वाचस्तत्र मृदुत्वकर्कशतयोरास्ते विरोधः कुतः ।
तस्यांगे दलदब्जदामसुभगास्तन्व्याः कटाक्षच्छटा
यस्यासौ सुलभा तदन्यहृदये हालाहलस्योर्मयः ।।

—त्रिविक्रमपण्डितस्य पञ्चायुधप्रपञ्चभाणात्

अथ

त्रिविक्रमपण्डितविरचितः

पञ्चायुधप्रपञ्चः

(भाणः)

आताम्रे नयने स्फुरत्कुचभरः श्वासो न विश्राम्यति
स्वेदाम्भः कणदन्तुरं तव मुखं हेतुस्तु नो लक्ष्यते ।
धिक् को वेद मनः स्त्रिया इति गिरा रुष्टां प्रियां भीषयं-
स्तस्यास्तत्क्षणकातरेक्षणपरिस्पृष्टो हरिः पातु वः ॥१॥

अपि च,

विलिख्य सत्याकुचकुम्भसीम्नि
पत्रावलिन्यासमिषेण राधाम् ।
लीलारविन्देन तया सरोषं
पायाद्विटः कोऽप्यभिहन्यमानः ॥२॥

(नान्द्यन्ते)

सूत्रधारः—

(आकाशे कर्णं दत्वा)

अये ! कोऽयमभिहन्यमानमृदुमधुरमृदङ्गनिनदसंगतसंगीतभङ्गी-परिमिलनमनोहरो नागराणां कलकलः ? तन्मन्ये सकलसुरासुरशिखरशेखरी-

भवदनवद्यशासनस्तम्बस्य भगवतः शम्बररिपोर्वसन्तपूजामहोत्सवः परिसरोद्याने समारब्धः पुण्यपुरविलासिभिरिति। तदहमपि तत्र गत्वा कञ्चित् समयं मनो विनोदयामि ।

(इति परिक्रम्य, कतिपयपदानि गत्वा, वामतोऽवलोक्य सानन्दम्)

अहो मे नियतेः समुल्लासः! यत इतो मामकीनचिरप्रार्थनामर्थवतीं वितन्वानः केसरतरुपरिसरमधुरसोदारमण्डपमलंकरोति समाजः प्राप्तरूपाणाम् । तदेतत्पादपमूलमुपसृत्य किञ्चिदभ्यर्थये ।

(पुरस्तादुपसृत्य, सप्रश्रयमञ्जलिं बध्वा)

भो भो निखिलदिगन्तकान्ताजनकान्तकर्णपूरायितनिजयशोविस्ताराः सभास्ताराः ! कोऽप्येष भरतकुलकन्दलश्चिरपरिशीलितलास्यविद्याविलासेन विज्ञापयति सभाजयितुमार्यमिश्रान् ।

किं ब्रूथ ? "साधु, कुशीलवकुलनन्दन साधु । वयमपि चिरादभिनवकविकल्पितामंदरसोदारमधुरसंदर्भगर्भितरूपकाभिनयविलोकनेनात्ममनो विनोदयितुमिच्छामः। अतस्तादृशमेकं रूपकं त्वया प्रयुज्यतामविलम्बेने"ति ।

(सविनयमञ्जलिं बध्वा)

परमहमनुगृहीतोऽस्मि । किञ्च सकलकलाकलापेषु मद्विद्याऽद्य परप्रशस्तिपद्यामधिरूढा । यतः,

अल्पापि विद्या गुणवत्तराणां
या चित्तमारोहति सैव वन्द्या ।
परं सहस्रेषु[1] विलासिनीनां
मनोरमा धन्यतमा प्रियस्य ।। ।।

---

१. ख ऽपि ।

(*विचिन्त्यात्मगतम्*)

अये ! नवसरसरूपकप्रयोगमादिशन्ति सभासदः ! तदेतदिदानीमशक्य-संघटनमापतितम् । यतः—

नवीनकविकाव्ये चेज्जागर्त्ति रसशालिता ।
पारिभद्रतरोर्गर्भे किन्न स्यात्फाणितोदयः ॥४॥

(*सानुस्मरणम्*)

अये ! अतीतशारदोत्सवे विशालायां भगवत्याः कात्यायन्याश्च[1]रणारविन्द-वन्दनहेवाकसमागत[2]मिलितेन मकरन्दकन्दलनाम्ना मे भावेन,

कोमलपदविन्यासं प्रचुररसालम्बनं स्वलङ्कारम् ।
तरुणीजनमिव भाणं रसिकमनोज्ञं त्रिविक्रमश्चक्रे ॥५॥

मदुपज्ञमयमभिनवो भाणः प्रज्ञावतां समाजेषु भवताऽभिनेतव्य इति सादरमुक्त्वा मे समर्पितः। सोऽयमनतिचिराभ्यस्त एव मया सपदि सहृदय-समागमकन्दलितप्रमोदेन विस्मारितोऽपि दैवादनुस्मारितः (*प्रकाशम्*) अस्ति कश्चित् पञ्चायुधप्रपञ्चो नाम भवदुक्तलक्षणो भाणः। पुनः किं ब्रूथ "यदि तमेनमवगच्छसि निर्दोषम्, तर्हि सोऽयं त्वरितमभिनीयतामि"ति (*सप्रश्रयम्*) कः कुशलो मादृशः कृशाश्वी गुणदोषविज्ञाने काव्यस्य ? परमहमेताव-ज्जानामि—

आस्वादितं भवद्भिर्यद् गुणितं दुष्टमन्यथा ।
पीतं पयो राजहंसैर्वारि तैर्दूरमुज्झितम् ॥६॥

---

१. *क* यिन्याश्च॰ इति ।

२. *क* वन्दन उत्कण्ठाकसमागम॰ ।

अथवा,

दोषा वाक्यपदस्थितास्तु बहुधा संवर्णिताः पण्डितैः
केनापि प्रतिपादितो नहि कवेः सान्निध्यदोषोऽपरः ।
यस्मिन् जाग्रति सर्वदोषनिवहः काव्ये समारोप्यते
क्षुद्रैः सोऽस्ति परं पुरोऽद्यं भवतां भाणे मया वर्णिते ।।७।।

पुनः किं ब्रूथ ? "किमभिधानः कवयितऽस्य रूपकस्ये"ति ? स खलु विश्रुतः स्यादेव कविदृष्टपूर्वंचर आर्यमिश्रैः ।

न्यायाम्भोनिधिमन्दरः श्रुतिशिरः कासारपाठीनराट्
मीमांसात्रिमुनिश्रुतप्रकटितानल्पात्मधीवैभवः ।
यः साहित्यकलाविलोलनयनामाङ्गल्यसूत्रं दृढ़ं
सोऽयं त्र्यम्बकपण्डितो[1] विजयते यस्याग्रजः सोदरः ।।८।।

न केवलमग्रजो विद्याप्रदश्च ।

(*साश्चर्यमित्र*[2])

किं ब्रूथ ?

"किमयमनवद्यसकलविद्यानिधेस्त्र्यम्बकद्विन्मणेरनुजन्मना त्रिविक्रमेण प्रणीतो भाणः ?" तर्हि [3]विदित एवायमस्माकम् ।

यत्कारुण्यात्कवयितुरमुष्याग्रजः ख्यातकीर्ति-
र्लोके सारस्वतजलनिधेः पारदृश्वा बभूव ।

---

१. क पण्डितत्र्यम्बको ।

२. क °मिति ।

३. क विदित "'इत्यारम्य परं त्विदमेकं' पर्यन्तं नास्ति ।

सोऽयं विद्यागुणमणिखनिः सर्वमन्त्रात्ममूर्ति-
स्तातो यस्य त्रिदशदृशश्चिद्घनानन्दनाथः ॥९॥

परन्त्विदमेकं महदा[1]श्चर्यस्थानम् ।

परिपक्वगोस्तनीफलसम्मितमृदुमधुरपद[2]मये काव्ये ।
तर्काभ्यासकठोरा मृदुतामुपयाति वागमुष्येति ॥१०॥

किमत्रानुपपन्नम्, व्याहरन्ति खल्वेवं[3] भवन्त एव ।

वैचित्र्याद् विषयस्य मार्दवजुषः कार्कश्यभाजः कवे-
र्वाचस्तत्र मृदुत्वकर्कशतयोरास्ते विरोधः कुतः ।
तस्यांगे दलदब्जदामसुभगास्तन्व्याः[4]कटाक्षच्छटा
यस्यासौ सुलभा तदन्यहृदये हालाहलस्योर्मयः[5] ॥११॥

(परितोऽवलोक्य सहर्षम्[6])

अहो रमणीयताऽस्य[7] वसन्तकालस्य !

अत्र हि—

---

१. ख महत् इति नास्ति ।
२. क °पद° इति नास्ति ।
३. क °खल्वेवं° इति कीटभक्षितम् ।
४. क °स्तन्व्या° इति कीटभक्षितम् ।
५. क °स्योदयः ।
६. ख सानन्दम् ।
७. क °स्य इति नास्ति ।

माकन्दच्युतपुष्परेणुपटलीक्लृप्तालवालोदरे
मन्दस्यन्दिमरन्दपूरभरिते वातोत्थपुष्पप्लवैः ।
खेलन्तो ललितं मधोर्गुणगणान् गायन्ति पुष्पन्धयाः
कान्तानामधरे धयन्ति मधुरं सक्तं मधूलीरसम् ॥१२॥

(सगर्वस्मितम्)

अये ! सुलभसमाराधनाः सपदि सभासद इति मे निश्चयः ।

यतः,

कालः कोकिलकाकलीपिशुनितानंगप्रतापोदयो
भाणस्यास्य कवेर्गिरो मधुझरीमाधुर्यजीवातवः ।
नाट्यानामपि पारगा वयमियं संसद् गुणग्राहिणी
पुण्यैरेकपदेऽद्य नः समुदिताः सर्वे गुणा ईदृशाः ॥१३॥

(परिवृत्य, माकन्दस्तबकं निरूप्य)

गुञ्जन्मञ्जुमिलिन्द[1]वृन्दवलनैरत्यद्भुतं वेपते
पाटीरा[2]चलमारुताभिगमने दोलायितं विन्दति ।
मन्दस्यन्दिमरन्दबिन्दुकपटादश्रूणि मुञ्चत्यसा-
वुत्कण्ठाकुलितस्य सम्प्रति दशां धत्ते नु तेन स्वयम् ॥१४॥

(नेपथ्ये)

"साधु रे भरताचार्यपुत्र, साधु,

---

१. क °मलिन्द° ।

२. क °पाटीरी° ।

प्रस्तुतानुगुणवर्णन[1]महिम्नामहितोऽसि । ननु ममैव तादृशस्य विशीर्णभागधेयस्य दशां धत्त इति किं नोच्यते माकन्दस्तबकः ?''

सूत्रधारः—

(ससंभ्रमम् नेपथ्याभिमुखमवलोक्य)

अये ! कलहंसलीलाविलोकनोत्कण्ठितस्वान्तस्य कन्दर्पविलासस्य भूमिकामादाय मदीयमातृष्वसेयः[2] प्रवालदामनामा कुशीलव इत एवाभिवर्त्तते, तदिदानोमयुक्त[3]मुद्दीपनविभावानुवर्णनम् ।

(इति निष्क्रान्तः)

प्रस्तावना

(ततः प्रविशति यथानिर्दिष्टः कन्दर्पविलासः)

(सविषादोच्छ्वासम्)

तास्विन्दुसुन्दरमुखीषु विराजमाना
संवर्त्तिकासु कमलोदरकर्णिकेव ।
साकूतदर्शनपथेन हृदि प्रविष्टा
चेतो धुनोति मम सा चपलायताक्षी ॥१५॥

किञ्च,

दरोन्मीलन्मल्लीघनसुभगसौरभ्यशिशिरः
कटाक्षस्तन्वङ्ग्याः क्षणमभवदापातपतने ।

---

१. क °वर्णन° इति नास्ति ।

२. ख °स्रेयः ।

३ ख अयुक्तं इति नास्ति ।

पुनर्विश्लिष्टः सन् व्यथयति नितान्तं सपदि मा-
मतस्तं मन्येऽहं कुसुमशरनिस्त्रिंशमपरम् ॥१६॥

(क्षणं विचिन्त्य)

अये ? कियती नाम दुराशाभूयिष्ठता कामिजनमानसस्य ! यन्ममैव[1],

न दूतीसञ्चारो न सरसपरोक्षोक्तिकलना
न साम्मुख्ये हासः क्वचिदपि न वाचां व्यतिकरः ।
अहो चित्रं चेतः क्षणपरिचितालोकनवशा-
न्मुहुर्धावं धावं व्रजति सुदृशं नो विरमति ॥१७॥

धिगिदं जाल्मत्वं मे मानसस्य[2], यदिदमसुलभमपि तादृशं जनं कतिपय-स्वाभाविकानुभावविलोकनसम्भावितसुलभागमं मन्वानमत्यन्तं परिमोदते ।

(सगर्हमात्मनो हृदयं प्रति)

तत्तद्विभ्रमहावभावनटनैस्तां जातरागोदयां
मत्वा तुष्यसि मूढ चित्त सुदृशां साधारणास्ते गुणाः ।

(किञ्चिद् विमृश्य)

अयि स्वान्त ! शान्तवेदनं भव । अस्त्वेवं तथापि—

द्वित्रास्तत्र तया प्रतारितजनालोकं मयि प्रेरिताः
स्निग्धापाङ्गदृशः प्रसादशिशिराः सन्त्येव जीवातवः ॥१८॥

(साश्चर्यम्)

---

१. क ममैवं ।
२. ख चित्तस्य ।

अहो महदिदं जैवातृकत्वं मे चित्तस्य ।

हासस्तूत्कलिकाप्रदीपनपटुर्हस्तांघ्रिनेत्राननं
तन्वंग्या विषजातमेव भुजगी वेणी च रोमावलिः[1] ।
किञ्च श्रीफलमुन्नतः स्तनभरः कामं मनस्तामिमां
सर्वाकारविषोग्रमूर्तिमबलां प्राप्यापि यज्जीवति ।।१९।।

अत एव चास्य नित्यतानुवर्णनं युक्तमभियुक्तानां शास्त्रेषु । (मदनबाधां निरूप्य, सोच्छ्वासमनङ्गं प्रति) हे भगवन् !

चित्तजोऽसि मम चित्तमीदृशं
किं विदारयसि पञ्चसायक ।
क्रूरता पितरि लोकगर्हिता
श्रीभवस्य तव सौम्यता कुतः ।।२०।।

(सावधीरणम्[2])

(पुनः सदैन्यमञ्जलिं बध्वा)

भगवन् ! रतिहृदयातिसन्निहित मकरकेतो प्रवीरवरमूर्धन्यस्य तव कान्तानयनान्तविलोकनकुन्तकृतनिकृन्तने किमु साम्प्रतं मम वक्षसि निक्षेपः सायकानाम् ।

(सासूयामर्षम्)

रे रे कामहतक ! निजप्राणत्राणलम्पटस्य कामिलोकस्यायमर्थवाद एव, यद् भवान् प्रवीर इति । न[3] चेदेवम्--

---

१. क रत्नावलिः ।
२. क ख सावधा° सावधा° ।
३. क नो ।

—२—

कान्ताः कचैर्[1]नियमयन्त्यपि यस्य बाणान्[2],
बालद्विजा विदलयन्ति शरासनञ्च ।
शीर्णो रथोऽपि भुजगस्य[3] मुखं प्रपन्नो
दग्धो दृशा पशुपतेः स कथं प्रवीरः ॥२१॥

(*सविषादनिश्वासम्*)

हन्त हन्त[4] ! चिरमनुचिन्तयन्नपि हृदयसन्तापनिर्वापणोपायं न पश्यामि । कुतः पुनर्मे सुखोदयो नाम मन्दभाग्यस्य ।

(*क्षणं*[5] *विमृश्य*)

[6]अये ! स्वमनोभिलषितानामङ्गनानाम्,

स्थितिर्गेहोपान्ते परिजनपरीहासकलना
मुहुर्यातायाते सकृदपि गृहे व्याजगमनम् ।
मुहुस्तद्भोग्येऽपि क्षणपरिचयो वस्तुनि दृशः
समुत्पन्नप्रेम्णः सकलमिदमापातसुखदम् ॥२२॥

अतस्तस्या मदीयधैर्यसर्वस्वमलिम्लुचमेचकविलोचनान्तायाः कान्ताया निशान्तोपान्तविरचितसंचार एव विचिन्तयामि तदुपागमोपायम् ।

---

१. क कवे॰ ।
२. क बाणाः॰ ।
३. क भुजगस्व॰ ।
४. क 'हन्त हन्त' इति नास्ति ।
५. ख वि॰ ।
६. ख नास्ति ।

(पुनर्विमृश्य, क्षणमात्रं निःश्वस्य)

तद्विप्रलम्भविधुरं क्षणिकं जीवितं मम ।
श्रेयांसि चिरसाध्यानि तदेतद् घटते कथम् ॥२३॥

(सधैर्यावष्टम्भम्)

अथवा, तत्रैव मया प्रक्रान्ते परिक्रमे—

सा सञ्चारचमत्कृतिर्नयनयोः स भ्रूलताविभ्रम-
स्तद्बिम्बाधरपाटलस्मितयुत[१]स्यास्यस्य सा वैखरी ।
सेयं चंक्रमचातुरी चरणयोः सोऽप्यंगहारक्रमो
दिष्ट्या तन्मम नेत्रपात्रमखिलं जायेत जीवामि च ॥२४॥

अतस्तत्रैव गच्छामि ।

(इति कतिपदानि गत्वा, सर्वतोऽवलोक्य)

अहो रमणीयतास्य प्र[२]भातकालस्य ।

अत्र हि,

पद्मिन्याः सकलां विधाय विधुरां[३] ताराधिपः संपदं
तत्प्रेयस्युदयोन्मुखे सति रवावुद्विग्नतामाश्रितः ।
ताराः स्वस्य करैर्विकृष्य सहसाऽगच्छन्नितोऽस्ताचलं
लग्नाः काश्चन ताः प्रभाकरकरे पश्यन् परिम्लायति ॥२५॥

किञ्च,

---

१. क नास्ति ।

२. क °यता प्र° ।

३. क विकलां ।

संश्लिष्टा सानुरागं स्वकरपरिचयप्राप्तभूरिप्रसादा
याऽपूर्वा[1] भुक्तपूर्वा रविकरकलितां तामुदीक्ष्यामृतांशुः ।
निस्तेजाः पश्चिमाब्धौ प्रविशति हि सतां दुःसहो मानभङ्गः
किं वक्तव्यं सितांशोः स तु सकलसतां मण्डल[2]स्यापि नेता ॥२६॥

अपि च,

उत्सिक्तः कुसुमासवैः कुमुदिनीं राजप्रियां पुष्पिणी-
मालिङ्गन्निशि निर्भयं परिचयं कुर्वन् पुनः पल्लवैः ।
यावत्पङ्कजसौरभस्वमखिलं गृह्णन् लघु[3] प्रस्थित-
स्तावत्कल्य उपस्थिते मरुदयं विष्वग् भयाद् धावति ॥२७॥

अन्यच्च,

सौरभ्ये चलिते रसे विगलिते चाप्तालिवर्गे गते
म्लानाऽतीव कुमुद्वतीयमधुना मूर्च्छां परामृच्छति ।
तामुद्वीक्ष्य तथाविधां कमलिनी जाता प्रहासोन्मुखी
हन्तोदीक्ष्य विपन्नवैरिवनितां का वा न सन्तुष्यति ॥२८॥

इतश्च,

मुहुर्दिशं क्रोधकशा(षा)यिताक्षी
विलोकयन्ती चरमां सचन्द्राम् ।

---

१. क पूर्वं ।
२. क मण्डन° ।
३. क मुहुः ।

आसन्नभानुं प्रणयेन पूर्वां
प्रिये[1] समासीदति चक्रवाकी ॥२९॥

([2]इति विशिखान्तरं प्रविश्य चन्द्रशालामवलोक्य)

अहो स्पृहणीयताऽस्य युवमिथुनसंवेशस्य !

उपबर्हमम्बुजदृशो निजं भुजं
विरचय्य वक्त्रमपि गण्डमण्डले ।
निजसक्थि सक्थनि निधाय सादरं
स्वपिति स्तनार्पितकराम्बुजो युवा ॥३०॥

(वामतोऽवलोक्य)

इतोऽप्यहो धन्यतमा युवानः स्त्रीपुंसाः !

सव्यासव्योरुबाहुव्यतिकरमधुरं कूर्परन्यस्तशीर्षं
संसक्तास्याब्जयुग्मश्वसितहतचलच्चारुनासाविभूषां(षम्) ।
भूयो निद्रातिरेकात्क्रमशिथिलभुजाश्लेषदत्तावकाशो-
च्छ्वासोदञ्चत्कुचाग्रप्रतिहतहृदयं शेरतेऽमी रतान्ते ॥३१॥

(अन्यतोऽवलोक्य, साश्चर्यम्)

कथमयमुरसि गुरुतरपयोधरभाराक्रान्तकान्ताशरीरभारमुद्वहन्नपि सुखमेव स्वपिति विलासी । तथा ह्यस्य—

---

१. क पूर्वं ।

२. क सर्वं कीटभक्षितम् ।

शयानस्योत्तानं हृदि निहितवक्षोरुहभरा
तिरश्चीने वक्त्रे निबिडकलिता[1]त्मीयवदना ।
समाक्रम्योरुभ्यामतिदृढतरं सक्थियुगलं
स्वपित्यंभोजाक्षी शिथिलभुजबन्धेयमधुना ॥३२॥

अथवा,

सहजप्रेमरसानां गुरुरपि लघुतामुपैति तनुरङ्गे ।
कुसुममसोढनखाङ्कं तुन्दिलमधुपान् लघूद्वहति ॥३३॥

(*सौधान्तरं निर्वर्ण्य*)

अये ! मयाद्य निःशेषमासादितं चक्षुषः फलमेतस्या निद्राविरतिविभ्रम-विलोकनेन भ्रमरकुन्तलायाः ।

इयं हि—

उन्मृज्याक्षियुगं निबध्य चिकुरानन्योन्यसक्ताङ्गुली
पाणी सम्प्रति सम्प्रसार्य गगने भङ्गं तनोस्तन्वती[2] ।
तन्वी भाति विमर्दितं कुवलयं बद्धं तमश्चेत्यद-
स्तिग्मांशोर्गदितुं सरोजयुगलं सम्प्रेषयन्तीव मे ॥३४॥

(*अन्यतोऽवलोक्य*)

अपूर्वमिदमशिक्षितवञ्चनाचातुर्यं शातोदरीणाम्, यदियमज्ञात[3]निशावसानं प्रियतमभुजान्तरे रममाणा सीमन्तिनी,

---

१. ख °निहिता° ।

२. क स्तनो तन्वती ।

३. ख मविज्ञात° ।

व्योम व्याममितं प्रयात्यपि रवौ मुक्तानया निद्रया
सा धन्येति निशम्य यातृवचनं प्रोत्थाय तूर्णं ततः ।
भालं स्विन्नकपोलमूलमकरी[1]कस्तूरिकार्चचितं
कृत्वा याति बहिः शनैः करतले धृत्वा शिरः कुन्थति ।।३५।।

नूनमियं निजकान्तभुजान्तरविश्लेषजनितमनोवेदनां शिरोवेदनाव्याजेन व्यनक्ति ।

(अग्रतो गत्वा, विलोक्य सहर्षम्)

अये[2] ! इतस्तावत्प्रियमित्रं मे मन्दारशेखरः !

चक्षुः स्वापविलोपतोऽधरदलं वीटीरसासेकतो
वक्षः कुंकुमपत्रभंगकलितोत्तुंगस्तनालिङ्गनात्[3] ।
आरक्तं दधदेकगण्डविलसत्कान्ताकपोलस्थली-
सम्पर्कार्पितरोचनाङ्क[4]मकरीपत्रः समागच्छति ।।३६।।

(सस्मितमुपसृत्य),

सखे, स्वस्त्यस्तु तव कान्ताकपोलतल[5]परिमिलनसंक्रान्तकान्तमकरीपत्रांकुरेभ्यः ।

(*ससंभ्रमं परिवृत्य*) किं ब्रवीषि ? "कथं प्रियमित्रं मे कन्दर्पविलासः ?"

---

१. क कवरी° इति ।

२. क नास्ति ।

३. क °गितात्° ।

४. क °नांक° नास्ति ।

५. क °तल° इति नास्ति ।

एहि सखे ! परिष्वजस्व माम्, आनन्दयसि चिरदर्शनेन । क्व प्रस्थितस्त्वमिदानीम् ? (*इति सहर्षमालिंग्य*)

सखे ! त्वामेव सुचिरमन्वेषयन्निदानीमहं सफलश्रमोऽस्मि संवृत्तः । कथय, कथय कया सह कृतार्थीकृता व्यतीता विभावरी; पृथुश्रोण्या गणिकया क्रिमाहोस्वित् कुलाङ्गनया ? किं ब्रवीषि ? "सखे, किमिदं मामपूर्वमिव पृच्छसि ? अपि न जानासि गणिकाङ्गनासंगमे विरक्तो मे वयस्य इति ? किन्तूपभुक्ता प्रगल्भकलत्रं कामाङ्गमञ्जरी"ति ।

(*सविस्मयम्*)

यद्येवं तर्हि कथमुपपद्यन्ते त्वयीमानि चिरसुरतलक्षणानि । यतः खलु परकामिन्यः —

गच्छामीति वदन्त्य एव चरणं यच्छन्त्यलीढं पुरः
संस्पर्शादपि पूर्वमस्फुटमलंवादान्मुहुः कुर्वते ।
संकेते मलयानिलेऽपि चलिते तिष्ठन्ति नैव क्षणं
को धन्यो विरतिं प्रपश्यति रतेरन्याङ्गनानां भुवि ॥३७॥

किं ब्र० "एवमिदम्, न सन्देहः ! तथापि किञ्चिदत्रास्ते कारणम् ।" इति

(*सहर्षौत्सुक्यम्*)

कथय सखे ! किं तत्कारणम् ? श्रोतुमस्ति मे[1] कौतूहलम् । किं ब्र० "पुरा खलु तया[2] मया गौरीकुमारदशावस्थिताभ्यामेकशालायामधीतं लिखितञ्च । अये ! किं कथयामि—

मादृशेष्वपि मय्येव तस्याः प्रीतिरभूत्परा ।
भवितव्यानुगुण्येन घटयत्येव पद्मभूः ॥३८॥

---

१. क 'मे' इति नास्ति ।

२. ख त्वया ।

अथातिक्रान्ते बहुतिथे काले—

आलम्ब्ययष्टिः स्मरविभ्रमाणा-
मुच्छूनता काऽप्यभितः स्तनाग्रम् ।
अदृश्यतादौ तदनुक्रमेण
पुन्नागशोभाञ्च पुपोष तन्व्याः ॥३९॥

तदनु कदाचिद् गुरुनिदेशाद्विकचविचकिलकुसुमापचयाय ससम्भ्रममहमहमिकया प्रवृत्तयोरावयोर्बलवदभूदन्योन्याङ्गसंघट्टस्तदानीमित्थमिद[1]मुदीरितम्—

सखि कामाङ्गमञ्जरि !

इतः परं दुर्लभोऽयमावयोरङ्गसङ्गमः ।
प्रव्यक्तयौवना चेत्त्वं क्व मां स्पृशसि भाषसे ॥४०॥

इदमाकर्ण्य सा मामवादीत्, सखे ! मैवं वादीः ।

तव मच्चित्तवसतेर्दुर्लभो नाङ्गसङ्गमः ।
करिस्कन्धाधिरूढस्य कथं दूरेऽस्ति चूलिका ॥४१॥ इति

अथ सा कतिपयैरेव दिवसैरधिगतार्त्तवा निजजनकेन पतिसदनं प्रापिता । ततो मां प्रति रहसि पत्रिकां प्राहिणोत् । तत्र स्थितमिदं पद्यमालिखितम्—

सरसिजमुकुले नियन्त्रिताऽऽस्ते
विचकिलवाससखी तवाद्य भृङ्गी ।
अनुसर सरसीं म(मि)लिन्द नूनं
कथमपि तत्र भवेत् प्रियानुषङ्गः ॥४२॥ इति

---

१. मू० क 'इदं' इति नास्ति ।

(सश्लाघम्)

साधु, कुशले कामाङ्गमञ्जरि ! विचकिलोपकण्ठजल्पितमनुस्मारयन्त्या स्वसंवसथमुपागतेऽस्मिन् मन्दारशेखरे योग्यकाले स्वसमागमसम्भावना त्वया निपुणतरं निर्दिष्टा। सखे ! ततस्त्वया किं व्यवसितम् ? किं ब्र० "मम पुनर्गुरुपरतन्त्रस्य गमनमिषमन्वेषयतोऽन्तरा व्यतीतोऽभूदेको मासः। ततः—

अरक्तासु रक्ता[:] सरागास्वरागा
युवानो भवन्तीति शंसंति लोके।
वयं नैव जानीमहे तस्य बीजं
विजानासि चेद् ब्रूहि किं तस्य तत्त्वम् ॥४३॥

इति तया मदुपालम्भगर्भः श्लोक एको विलिख्य तथैव प्रेषित"इति।

(साश्चर्यम्)

अये ! अपूर्वोऽयं पराङ्गनानां स्वतः परपुरुषाभिगमोद्यमो बन्धुजीव इव गन्धोदयः। ततस्ततः ? किं ब्र० "ततः परमहमितः परमसाम्प्रतं विलम्ब इति निश्चित्य भगवतो मदनदमनस्य दम(मद?)नोत्सवावलोकनव्याजेन तदावासं मणिमण्डनं नाम नगरमुपेत्य प्राक्तनसंदेशहारिणीमुखेन समधिगतमदागमायाः प्रियाया वचनेन कमपि सङ्केतनिवासं प्रापितोऽस्मि। तत्र ततः—

कांश्चिद् भूरिमनोरथैः कतिपयांस्तत्कृत्य[1]सञ्चिन्तनै-
रप्यन्यांस्तदनागमोचितगुरुप्रत्यूहशङ्काशतैः।
आप्रातर्विफलान् क्षणान् गमयता मित्रेण कृच्छ्रेण[2] ते
नीताः किं कथयामि कल्पसदृशाः प्रत्येकशो रात्रयः ॥४४॥

---

१. क °न्नाहृत्य।

२. क °कृच्छ्रेण मित्रेण।

तथाप्यलब्धमनोरथेन मयेत्थमनुचिन्तितम्, सा किल कलहंसगमना श्वसुरकुलोत्थविविधनिर्बन्धनिरुद्ध[1]गमना नहि[2] प्रभवति निशायां बहिरागमे, मम पुनस्तद्गृहमुपगतस्य कदाचित् क्वचि[3]त्संभाव्यते प्रियायाः समागमः। तदेतदतीव दुर्लभम्।

यतः,

यूनः सङ्गतयौवतं परगृहं व्याजैर्विना दुर्गमं
व्याजेनापि गतस्य तद्गृहजनैर्मैत्री स्वतो दुर्लभा।
तन्मैत्रीमपहाय तत्र सततं वासो न संभाव्यते
सातत्यं वसतौ न चेदभिमतं श्रेयः कथं सिद्धयति ॥४५॥

किञ्च[4],

विश्रम्भोदयहेतवे गृहजुषामावर्जनीयं मनः
शङ्कातङ्ककलङ्कितेन मनसा स्थातव्यमेवानिशम्[5]।
प्रेयस्या मधुरा[6]वलोकनभवा भावाः पुनस्तादृशा
दुर्वारा अपि हन्त कैतवशतैः सङ्गोपनीयाः सदा ॥४६॥"इति

सखे ! सत्यमेवैतत्।

नाह्वानं सुकरं पराम्बुजदृशामम्बार्थशब्दैर्विना
ज्ञातप्रेम्णि तथा स्त्रियां व्यवहृतिर्ग्रीवा[7]मसून्नेष्यति।

---

१. क °निरुद्धा°।
२. ख °नास्ति।
३. क °कञ्चित्।
४. क नास्ति।
५. ख निशां।
६. क °मधुरौ वि°।
७. क °ग्रांवा°।

आलापेष्वकृतेषु जाग्रति पुनर्नानावितर्का नृणां
धिग्रक्तान्यवधूनिशान्तवसतिर्निस्त्रिंशधारागतिः ॥४७॥

ततस्ततः । किं ब्रवीषि —

"मास्तु त्रस्तकुरङ्गशावकदृशस्तुङ्गस्तनालिङ्गना-
द्यारम्भः कलये धृताञ्जलिरहं धातस्तव प्रार्थनाम् ।
यातायातवितर्तितानननमिलद्व्याजस्मिताम्रेडित-
स्निग्धापाङ्गविलोकनामृतलवैस्तस्याः सकृत्सिञ्च माम् ॥४८॥

तेन वा स्तोकफलितमनोरथः सन् गच्छामीति बहुतरमनुनाथयता मया प्रिया-दर्शनमपि न लब्धमेव । ततोऽहं ततो निर्गन्तुकामः पद्यमिदं विलिख्य तां प्रति प्राहिणवम् ।

गन्धाहूतमिलिन्दे केतकि निकटं समागते भृङ्गे ।
पत्रच्छन्ना मुखमपि नोन्नमयसि किमिह गच्छतु मिलिन्दः ॥४९॥

दयिताऽपि—

अलमलमयि भृंग चापलैस्ते मुकु[१]लितपङ्कजगर्भवासरुद्धा ।
अभिगम[२]समयं तवाद्य भृंगी कलयति चेतसि मा जहीहि धैर्यम् ॥५०॥

इति पद्यं कबरीकलितप्रत्यग्रकेतकपत्रे मृदुनखमुखैर्विलिख्य मां प्रति प्राहिणोत् । तेनाहं सप्रत्याशः सुस्थितोऽस्मि" इति ।

(सश्लाघम्)

सखे ! केन वर्ण्येत तादृशस्य ते पुण्यगरिमा ।

---

१. क °लैस्तैर्मु° ।

२. क अभिमत° ।

कचान्तरनिगूहितः करसरोजसंलालितो
मुहुः प्रणयसंभृतः स्तिमितलोचनेनेक्षितः ।
नखैर्विलिखितस्तया सुभगसुन्दरः सुभ्रुवा
सकेतकमृदुच्छदोऽप्यहह यस्य दौत्यं गतः ॥५१॥

ततस्तया किं व्यवसितम् ? किं ब्रवीषि "अथा तया[1] स्वार्थघटना-संविधानविदग्धया—

भक्त्या निस्तुलया पतिर्गुरुजनः शुश्रूषया यातरो
भूरिस्नेहरसार्जवैः करुणया गुर्व्या भुजिष्यादयः ।
वात्सल्येन ननांदृदेवरमुखाः संप्रश्रयैर्बान्धवाः
सत्कारैर्विविधैः सरोरुहदृशा सर्वे तया निर्जिताः ॥५२॥

तेन स्वस्यामनिवार्यविश्रम्भेषु सकलजनेषु सेयमेकदा निशीथसमये पति-मतिगाढमालिङ्ग्य शयानमप्यवधूय केनचिददृश्यरूपेणेव भूतेन विकृष्यमाणा पुनः[2] प्रसारितेन दक्षिणकरेण परिभुग्नेनावलग्नेन कटितटस्रंश(स)मानवसनाव-लम्बिना दक्षिणेतरकरेण दिशि दिशि विकीर्यमाणैर्दीनदृक्तरङ्गैस्त्रायध्वं-त्रायध्वमित्यनुकलकृतविलापसंशोषितेन वदनेन वेपमानाभ्यां चरणाभ्याञ्च गत्वा सदनालिन्दसीम्नि कश्मलमुपगतेव निपपात ।

अथ सोद्वेगमापतितैः स्वबान्धवैरानीतेषु भिषग्वरमान्त्रिकेषु तदानी-मलसोन्मीलितपक्ष्मणी विलोचने परितः सञ्चार्य, विकृतं विहस्य—

---

१. क °'तया' इति नास्ति ।
२. क ख °पुरः° ।

अलं मन्त्रैश्च तन्त्रैश्च भेषजैरपि बालिशाः ।
अहमस्म्यहमस्म्यस्यामज्ञात्वा किं विधीयते ॥५३॥

इत्युदीर्य क्षणमात्रं विरराम । अथ तदेतत्किमपि दैवतं मन्वानैस्तैर्विधीयमानासु बहुविधप्रार्थनासु पुनरेवं जगाद[1]—

अरे रे ! अहमेष मणिभद्रनामा वैश्रवणानुचरः । पुरैकदा मलयमरुद्वलनचलदलकचलदलतिलकविलसदलकनन्दातटसीम्नि पुत्रार्थं तपस्यतोरनयोरौशीनरयोर्जायापत्योरिमां[2] काम[3]यमानं मां प्रस्तरो भव, इति शशाप निजस्वामी ।

अथ सानुक्रोशेन तेनैव शापावसानमनुगृह्णता मदाशयज्ञेन, अयि मणिभद्र, नूनमिमौ दम्पती जनुषि भाविनि कामाङ्गमञ्जरीप्रगल्भनामानौ भविष्यतः । तदानीम्—

आपुत्रोदयमेतस्यां रमस्व त्वं यथासुखम् ।
गेहे वाऽस्या यथायोगं नीत्वा वा मन्दरालयम् ॥५४॥

इत्यादिष्टोऽहमिहागतोऽस्मीत्युक्त्वा विरराम ।

ततः 'सर्वनाशे समुत्पन्ने त्वर्धं त्यजति पण्डितः' इति न्यायमनुसृत्य तदीयबान्धवा विविधपूजोपहारैः सन्तर्प्य, दयालो यक्षराज ! अलमस्याः सुन्दर्या मन्दरकन्दरप्रापणेन । अस्मिन्नेव मन्दिरे समस्तभोग्यवस्तुसमन्विते रमस्वेति नाथयन्तः साष्टाङ्गं प्रणेमुः ।

अथ मन्दं मन्दमुन्मील्य लोचने[4] स्तोकं विहस्य, शृणुत रे मानवाः ! युष्मत्कृतसत्कारप्रसन्नेन—

---

१. ख व्याजहार ।
२. क नास्ति ।
३. क °काम्य° ।
४. क °विलोचने ।

पूर्वापरविभागेन विभावर्या यथाक्रमम् ।
पत्या मया च सेव्येयमिति दत्तो वरो मया ।।५५।।

अन्यत् शृणुत हितं वचः—

मणिभद्राभिधं यक्षं कामरूपधरं तु यः ।
अध्यक्षीकुरुते सोऽयं नूनं प्राणैर्वियुज्यते ।।५६।।

इति, जागर्ति मे भर्त्तुरनुशासनम् । अतो भवद्भिर्वर्तितव्यमवहितैः[१], इत्युदीर्य, समुत्प्लुत्योच्चै रटन्ती परतः[२] पपाते"ति ।

सखे ! तया ततः किमाचरितम् ? किं ब्रवीषि, "अथ सा मन्दं मन्दमुत्थाय समुन्मीलितलोचना[३] विस्मयमानमानसेव किमेतदिति तत्रत्यानन्वयुङ्क्त ।

अथ तैर्निवेदिते सकलोदन्ते दीर्घतरं निःश्वस्य—

स्वप्नेऽप्यदर्शिततनूरितरस्य पुंसो
यक्षाङ्गसङ्गमुपयातुमहं नहीशे ।
शीलक्षतौ मम कुलद्वयगर्हिताया
नैव स्थितिः समुचिता विमले कुले वः ।।५७।।

इति बाष्पप्लवपरिप्लुतलोचना श्वसुरमुख्यान् प्रणम्य स्वप्राणप्रहाणायाभ्यनुज्ञामनुननाथ । अथ तैर्बहुभिः प्रकारैः समाहिता सा स्वकृतमिदमखिलं मे समावेद्य विविक्तदेशपरिकल्पितमनल्पभोग्यवस्तुप्रपञ्चसमन्वितं हंसवरगरुद्गौरतरप्रच्छदाम्बरसंच्छादितहंसतूलकृतमहेन्द्रगोपपटतल्पकलितकाञ्चनमञ्चकम -

---

१. क समवहितैः ।
२. क परितः ।
३. ख विलोचना ।

नीय[1]मनयन्मां केलीगृहम् । तदाप्रभृति तत्कालोपदर्शितकितवयक्षप्रत्ययस्तया सह रममाणो वर्त्तेऽहं निःशङ्क'' इति ।

अये, सकललोकातिलङ्घी प्रतिभाविशेषस्तन्वंग्याः, ययेयमालोचिता निष्कण्टकसरणिः । भवतु, कथमत्रेदानीं तस्याः समागमः ? किं ब्रवीषि, "राजकार्यानुरोधादत्रैवास्ते बहून्यहानि तत्पतिरिति श्वसुरेण साऽप्यत्रैव प्रेषिते''ति । तर्हि, इदमुपपद्यते । एहि गच्छावः ।

(अग्रतो गत्वा[2]ऽवलोक्य)

सखे ! पश्य विभ्रमावर्त्तसदनाङ्गणान्निर्गत्येयं विलासखुरली—

मुक्तामुक्तविलोचनाम्बुजयुगां निद्रां दधाना तनुं
लुप्तालुप्तविशेषका कुचभरभ्रश्यद्दुकूलाञ्चला ।
स्रस्तास्रस्तकचप्रकीर्णकुसुमा भूयः स्खलन्ती गतौ
मन्दं गच्छति चोलबन्धनविधौ व्यापारयन्ती करौ ।।५८।।

किं ब्रवीषि, "केयं सखे ! विलासखुरली नामे''ति । सखे ! न जानासि किमेनाम् ? इयं खलु वाराङ्गना !

(सस्मितम्)

किं ब्रवीषि, "किमियं वार एवाङ्गना, नहि निशायाम् ?'' इति

(विहस्य)

एवमिदम्, निरन्तरमियं[3] निशायां पुरुषायते ! किं ब्रवीषि, "सखे कि[4]मेतत्,

---

१. क °रमणीय ।
२. क नास्ति ।
३. ख एषा ।
४. ख कथं° ।

ताम्बूलस्य रदच्छदादरु[1]णिमा निर्निद्रनेत्रोद्गत-
स्तन्व्याः पक्ष्मपुटौ वृणोति कलितो गण्डो नखाङ्कव्रणैः ।
अर्धक्षालितयक्षकर्दम[2]रसोदारं प्रकोष्ठद्वयं
किं त्वस्याः कुचयोरमृष्टमकरीपत्रं युगं दृश्यते ।।५९।।" इति

अयि[3] ! निसर्ग एवायं निजरूपलक्ष्मीप्रागनालस्य कुचयुगलस्य संगोपनं रूपाजीवराजीवदृशः । तथाहीयं मार्दवापातभीता—

आश्लेषेऽपहरत्यतीव हृदयं हस्तग्रहे यत्नतः
पाणिं वारयति प्रियस्य च परीहासा[4]पदेशान्मुहुः ।
उत्तानं शयने सदा[5] स्वपिति न स्वप्नेऽपि तद्व्यत्यया-
त्कामं[6] गोपयति स्तनौ जघनमप्येवं न गोपायति ।।६०।।

किं ब्रवीषि, "सखे ! सत्यमिदं जघनगोपने कथम[7]र्थलाभ" इति ।

(पुरोऽवलोक्य)

काऽसौ,

निःश्वासानिलकम्पितस्तनतटो संचारयन्ती करौ
धम्मिल्लस्य नियन्त्रणेऽसविगलच्चैलाञ्चलोदञ्चने ।

---

१ क रसच्छलादरु° ।
२. ख कार्दम° ।
३. ख सखे ।
४. क °रम्भा° ।
५. क मनाङ् ।
६. ख कामे० ।
७. ख थमासां ।

गच्छन्ती ललना किमप्यगणितश्रोणीभरं सत्वरं
वेगस्रस्तदुकूलरुद्धगमना दीनं दिशो वीक्षते ॥६१॥

किं ब्रवीषि, "सखे ! सेयं कैरवामोदस्य कलत्रं भोगदा नामे"ति । तर्हीमां[1] जानामि, अस्याः—

हासं वेद परो न दन्तवसनाद्वीक्षां न पक्ष्मेतरो
नागारप्रघणोऽपि पादपदवीं वाचं न कण्ठेतरः ।
अङ्गान्यप्यखिलानि वेद न पतिस्तद्वेद नो वाऽम्बरं
सेयं सम्प्रति पद्मपत्रनयना चित्रं बहिर्भ्राम्यति ॥६२॥

किं ब्रवीषि, "सखे ! लोकप्रतारणैकगृहीतशीलानामन्यादृशमेव साहस-रसिकत्वमसतीनाम् । तथाहि—

वेपन्ते बलवद् विलोक्य मुसलीं त्रस्यन्ति शिल्यारवाद्
गाहन्ते निरनुप्लवा न हि दिवा गर्भालयं पांसुलाः ।
कान्तारे च वने निकुञ्जभवने शैले सरित्सन्निधौ
स्वच्छन्दं विहरन्ति हन्त कमनानन्वेषयन्त्यो निशि ॥६३॥" इति

सखे ! बलवती खलु कुसुमशरमहाराजाज्ञाविभूतिः, तया परवतीनां युवतीनां नायं दोषः । (*सशिरःकम्पम्*) किं ब्रवीषि, "सखे ! सत्यमाह भवान्,

नाज्ञा पञ्चशरस्य चेद् बलवती शैलायते देहली
यासां पद्मपलाशसुन्दरदृशां तासां निशीथे पुनः ।

---

१. ख °मवधारणेन जा° ।

वृत्रो मित्रमुपानहौ च सललीपुञ्जो निकुञ्जो गृहं
शय्या लूनशिखः कृशः फणिमणिर्दीपः कथं वा भवेत् ॥६४॥" इति

सखे ! धिग्जन्म गुणिनोऽपि कृतघ्नस्य—

अधिकृतो जघनस्तनगोपने
भुजशिरोऽप्यधिरोप्य च लालितः ।
यदयमद्य विशालदृशं पटो
व्यथयति स्फुटरुद्धगतिक्रमः ॥६५॥

किं ब्रवीषि, "अये, निरन्तरबहुमानलालिताः सकृदवमानिताश्चेद् वैरीभवन्तीति न खलु वितथो लोकवादः । तदेतदाकर्ण्यताम्—

प्रियाप्राप्यस्तादृग्घनजघनवक्षोरुहतटी-
समाश्लेषः कण्ठग्रहणगरिमा पक्ष्मलदृशः ।
चिरं येन प्राप्तः स तु रत[1]समारम्भसमये
निरस्तश्चेद् दूरे[2] कथमिव न कुर्यादपकृतिम् ॥६६॥" इति

(परिक्रम्य, प्राचीमवलोक्य)

विप्रार्घ्यशस्त्रदलितोर्ध्वचरप्रमत्त-
मन्देहदेहगलितक्षतजाभिषेकैः ।
रक्ताङ्गको दशशतांशुरितोऽखिलात्मा
पूर्वावनीधरशिरः समलङ्करोति ॥६७॥

---

१. क रति° ।
२. क दूरं° ।

सखे ! किं ब्रवीषि, "किं फलमिदानीमर्घ्यदानेन विप्राणामि"ति ? सखे ! नहि नित्यो विधिः फलाभिसन्धिमपेक्षते, किञ्चा[1]हं मन्ये[2] विप्रियाचरणमेवास्मद्-विधानां तत्फलमिति; न चेदेवम्—

उद्यन्कामिमनोरथान् विघटयत्यम्भोजिनीवल्लभ-
स्तं रुन्धन्ति दयालवः सुकृतिनो मन्देहदेवद्विषः ।
तानेतान् विनिहत्य मन्त्रितपयःपूरासिधाराशतैः
किं विन्दन्तितरामुदर्कमथवा सांदृष्टिकं भूसुराः ॥६८॥इति

सखे, निशाचरत्वसाध[3]र्म्यान्मदेहेषूद्वहसि पक्षपातम् । उपकारिणस्तु नो विप्रा एव । शृणु तावत्—

रुन्धन्तो दिवसमुखे सहस्रभानुं
मन्देहा यदि न हता द्विजार्घ्यतोयैः ।
संप्राप्ता भवतु कथं पुनस्त्रियामा
सा नो चेत्कतममनोरथः फलेन्नः ॥६९॥

पश्य सखे,

अहिमार्त्तिपदं जगद्विशङ्कं कमलामोदजुषो मरुत्समूहात् ।
विरचय्य हराविहोपयाते प्रविषीदन्ति हि पांसुला बलाद्याः ॥७०॥

किं ब्रवीषि, "स्थाने खलु महेन्द्रोदयभीरुत्वं बलादीनामि"ति । *(भवनका-सारकमलिनीं निरूप्य)* सखे ! पश्य पश्य—

---

१. ख 'किञ्च' नास्ति ।

२. ख अहमन्ये° ।

३. ख °त्वमात्रसा° इत्यधिकम् ।

आलम्ब्य स्वकरैः पयोधरभरं प्रोत्सार्य नेत्रावृतिं
गात्रो[1]द्भासिनितम्बमस्फुटनभोमध्यं समाक्रम्य च ।
सम्प्राप्ते दिवसश्रियं निजपतौ रक्तेऽधुना पद्मिनी
दृष्ट्वा मन्दगलन्मरन्दक[2]पटादश्रूणि मुञ्चत्यसौ ॥७१॥

अपि च—

विषादाविर्भावं स्वगतमवलोक्यापि बहुशो
गतो यः सोपेक्षं[3] नियतमपराशावशतया ।
करैस्तस्मिन् जाता स्पृशति सविकासाद्य नलिनी
जडानां न व्रीडा[4] न हि रसवतीनामतिरुषः ॥७२॥

किं ब्रवीषि, "चरम एवात्र सखे ! प्रथमः कल्प" इति ।

अये, पश्य—

ध्वान्तोत्सारणमब्जकोशदलनं चन्द्रप्रभामोषणं
कोकीतोषणमैन्दवोपलगलद्वारिच्छटाशोषणम् ।
शश्वत् कैरवपेषणञ्च युगपत्सोऽयं तनोत्यंशुमान्

किं ब्रवीषि ?

"कर्त्तुं नैककरस्य तस्य किमिवाशक्यं जगच्चक्षुषः" ॥७३॥ इति

(सर्वतोऽवलोक्य)

---

१. क गोत्रो° ।

२. ख °मक° ।

३. क सापेक्षं ।

४. क अथवा इत्यधिकम् ।

एते नूतनपद्मरागशकलच्छायासनाभित्विष-
स्तिग्मांशोः करकन्दला नवनवा रोदो[१]न्तरं वृण्वते ।
छिन्दन्तः समुपेत्य कोमलदलभ्रान्त्या रसालस्य यान्
यत्नोदञ्चितचञ्चवः[२] पुनरमी भ्राम्यन्ति पुंस्कोकिलाः ॥७४॥

(पुरो गत्वा विलोक्य)

काऽसौ ?

पादन्यासे प्रपदविधुतप्रोच्चर[३]च्चारुचेला[४]-
वल्गद्वक्षोरुहतटनटत्तारहाराभिरामा ।
कर्णप्रान्तोच्चलितललितापाङ्गमालोकमाना
यूनः कापि भ्रमति परितः पिप्पलं पक्ष्मलाक्षी[५] ॥७५॥

किञ्च;

दरविवृतमुखान्तदृ[६]श्यदन्तालिरोचिः-
परिचयपुनरुक्तोद्योतमुक्ताच्छगुच्छान् ।
किमपि जपति[७] नासाभूषणे लम्बमानान्
दशनवसनभासा रञ्जयन्ती नितान्तम् ॥७६॥

सखे ! पश्येमामक्षस्रजम् —

---

१. क रोद° खरोदान्तरं° ।
२ क नास्ति ।
३. क °च्चल° ।
४. क °चैला ।
५. क पङ्कजाक्षी ।
६. क जयति ।

योयः पाणिग्रहणाद्रक्तो मुक्तामणिः स्रजि प्रोतः ।
स स वहति पाण्डिमानं विरहीवास्याः कराञ्चलविमुक्तः ॥७७॥

(सोत्कण्ठमक्षमालामुद्दिश्य)

एषा भ्रामयतीति पद्मनयना दोलायितं मा गम-
स्त्वं मुक्तासर तत्कराञ्चलपरिष्वङ्गेण धन्यस्त्वसि ।
पश्यैतानि मनांसि नो विधिहतान्यस्पृष्टदृष्टान्यपि
त्रस्यद्वन्यमृगीचलाचलदृशा भ्राम्यन्ति ताम्यन्ति च ॥७८॥

(पश्चादवलोक्य)

अये, सकलनगरविलासिनी[1]जनवृत्तान्तानामभिज्ञः सखा शृङ्गारचषक इत एवाभिवर्त्तते, तदेनं पृच्छावः । एहि सखे ! शृङ्गारचषक ! कथय केयं पिप्पलपार्श्वपरिवर्त्तिनी ?

किं ब्रवीषि ? "अयि कन्दर्पविलास ! कृतं ते परिहासशीलतये"ति । सखे ! भवान[2]काण्ड एवैवं ब्रुवाणः कलयति मनसि कमपि संदेहम् । किमियं त्वया भुक्तपूर्वा पूर्णे[3]न्दुमुखी ? किं ब्रवीषि "कथमिद[4]मद्यापि भवान् न जानाती"ति ? सखे को नाम विज्ञाता निगूढस्य त्वदपादानस्य ? किं ब्रवीषि, "शृणु, तर्हि कथयामि साकल्येन । इयं खलु लीलाधरकलत्रं रसोर्मिका नामे"ति । मन्दार-शेखर ! किं ब्रवीषि ? "सखे ! कथ[5]मासादिता भवते"ति । शृङ्गारचषक "किं

---

१. क °नी इति नास्ति ।
२. ख त्वं ।
३. ख मू० पूर्वे° इति ।
४. क 'इद' नास्ति ।
५. ख इयंमूल्यथिकम् ।

ब्रवीषि, "तदेव खलु मया कथ्यते, समाकर्ण्यताम्, पुरैकदा भद्रदत्तधर्मदारानात्मनो गन्धर्व[1]विद्योपाध्यायनन्दिनीं भावुकचर्चां पितृकुलोदन्तमावेदयितुं सदनमेतस्याः[2] प्रतिगतोहमभवमि"ति । कोऽसौ भद्रदत्तो नाम ? किं ब्रवीषि ? "अस्या एव भर्त्तुर्जघन्यजो भ्राते"ति । भवतु, ततस्ततः ! किं ब्रवीषि ? "तदानीम्—

आसीनास्वखिलास्वपि स्वयमथो प्रोत्थाय सद्योऽनया
सव्रीडस्मितमन्थरं स[3]ललितं यान्त्या गृहाभ्यन्तरम् ।
कर्णोपान्ततरङ्गितासितसरोजातत्विषा चक्षुषा
तन्व्या तत्र मदाभिमुख्यकलितो दृष्टो मुहुर्दर्पणः ॥७९॥

तेनाहं जनितप्रियानुरागप्रत्ययः सकलजनानुरागमन्तरेण न घटते मे वाञ्छितमिति निश्चित्य,

बालान् क्रीडनकैः स्तवैः प्रवयसो यातृः प्रियानिन्दया
यूनश्चाटुकथाविनोदनरसैर्वित्तैर्नियोज्यानपि ।
दौहित्राद्युपलालनाकलनया श्वश्रूं ननांदृः पुनः
शिल्पैर्नैकविधैर्जनान् समनयं तस्या गृहस्थान् वशम् ॥८०॥

प्रख्यापितञ्च मया कपटाभिसंधिना स्वस्मिन्[4] मिथ्येन्द्रजालकलनावै[5]दग्ध्यमि"ति ।

मन्दारशेखर ! किं ब्रवीषि, "सखे ! कुत्रोपयोगस्तत्प्रख्यापनस्ये"ति ।

---

१. क ख गान्धर्व° ।
२. क अस्याः ।
३. क सु° ।
४. ख 'स्वस्मिन्' इति नास्ति ।
५. क कलवै° ।

सखे ! किमेवं ब्रवीषि, "भविष्यत्येव कदाचित् कुत्रचित्तस्योपयोगः" ? शृङ्गार-चषक ! ततस्ततः ! किं ब्रवीषि, "तदनु गानविद्याप्रणयिनः प्रियाया देवरस्य मम सम्पन्नो गरीयान् मित्रभावः । अथैकदा निःशलाके—

प्रोदञ्चिते कुचभरे निबिडं निपत्य
पश्चान्निषेधनमितं वदनं नताङ्ग्याः ।
अंशानुविद्धमणिबन्धकरद्वयेन
यत्नादुदस्य च मयाऽधर आशु पीतः ॥८१॥

तदानीमेव नियतिप्रातिकूल्यात्तत्रैवागता सा भावुकचर्चे"ति ? हन्त, हन्त अत्याहितं प्रियमित्रस्य । ततस्ततः ! किं ब्रवीषि, "सखे ! किं कथयामि—

अतुदन्मां तदा तस्या गुरुपुञ्या निरीक्षणे ।
अत्याहितापातशङ्का किशारुरिव कञ्चुके ॥८२॥

अथ सप्रार्थनं पादयोरवनतमपि सोदर्यनिर्विशेषं मामनुरुध्य चिर-निबद्धयातृद्वेषा सैषा निजपतिमिदमखिलमावेदयदि"ति ? हन्त, हन्त !

सौख्यानुकम्पास्नेहेभ्यो वैरं प्रणयि योषिताम् ।
तदेवानुसरन्त्यस्ता गणयन्ति न तानि यत् ॥८३॥

ततः, किं ब्रवीषि, "अथ तस्या देवरस्य मयि—

निवृत्तः संलापे प्रणयरसमाधुर्यगरिमा
तनूभूतः कामं जनितततविश्रम्भमहिमा ।
समुत्पन्नः शश्वद् विनयगुरुसत्कारलघिमा
मुखे चित्तस्थेमा प्रकटित इवाभून्मलिनिमा ॥८४॥

तदानीमहं प्रयत्ननिगूहितहृदयातङ्को धृतिमवलम्ब्य, सखे ! भद्रदत्त ! तव सपदि मयि समुत्पन्न इवाभाति चित्तवृत्तिविपर्ययो हेतुस्तु न लक्ष्यते[1]। इत्युदीर्य मुहूर्त्तमिव वि[२]चिन्त्य विहस्य पुनरेवमवोचम् ।

अघटितघटनाविधौ पटीयः
सपदि सखे विदितं मयेन्द्रजालम् ।
प्रकटितमिह यत्पुरः प्रियाया-
स्तव बत नावपि यद् वभञ्ज मैत्रीम् ॥८५॥

किञ्च,

मैत्री गलितविश्रम्भे मित्रे न स्थातुमर्हति ।
स्थिताऽप्यलर्कविषवत्कालेऽनर्थाय कल्पते ॥८६॥

अतः कृतं ते स्नेहानुबन्धेन, स्वस्त्यस्तु गच्छामीति, सरोष[३]मिव भाषमाणे मयि, सोऽयमिति सरलमतिरिदमखिलमिन्द्रजालविलसित[४]मेव मन्वानो वहुविधप्रणयोक्तिभिरनुनीय जनमेनं समादधे। तेनाऽहं शिथिलातङ्कस्तया सह योग्यकाले रममाणः सन् विचरामी''ति ? सखे ! तदेतदास्ताम्, कथय किमर्थोऽयमेतस्यास्तरुपरिक्रमायासः ? किं ब्रवीषि, ''पुत्रार्थ'' इति ? *(सस्मितम्)*

---

१. क नोपलक्ष्यते ।
   ख पुर्न लक्ष्यते ।
२. ख स्मृतिमभिनीय वि° ।
४. ख विषाद इत्यधिकम् ।
६. क विलसित° नास्ति ।

अयि ! युवरसिकावतंस, त्वयाप्यनुत्पादितं सुतमेतस्यै स्थावरोऽयं प्रवृद्धविटपः[1] प्रयच्छतीत्याश्चर्यम्, अथवा प्रियायौवनापसरणभीरुणा त्वयैव समुपेक्षितः स्यादस्याः सुतप्रसवः । किं ब्रवीषि, "सखे ! ममेदं मतमपि बाढमाह भवान्—

नूनं सुतजनिचलिते तारुण्ये स्त्रीषु का रतिर्यूनाम् ।
किं विन्दन्ति मिलिन्दा गलितमधूलीषु पद्मपालीषु" ॥८७॥इति ?

एवमेनामुपगच्छावः । (*उपसृत्य*)

चलदलकं हरिमध्यं परितस्तरुमेनमङ्गना भ्रमति ।

मन्दारशेखर ! किं ब्रवीषि ?

"आत्मानुरूपमेव प्रायेण भजन्ति कामिन्यः" ॥८८॥इति ?

शृङ्गारचषक ! उपसृत्यैनाम्, किं ब्रवीषि ?

"गतिविहसितराजहंसि हंसि[2]
त्वमिह कटाक्षशिताशुगेन यूनः ।
तव तरुपरिचर्यया फलं किं
न खलु फलन्ति तपांसि हिंसकानाम्" ॥८९॥ इति ?

अयि[3] ! सुभ्रु ! (*सभ्रूभङ्गम्*) किं ब्रवीषि "शृङ्गारचषक ! जोषं गच्छ पुरः पन्थानमाकलयन् सपदि मया सोढापराधोऽसि पतिसख[4] इति । अन्यथा

---

१. क °विषयः ।

२. क कान्ते ।

३. क अथ ।

४. ख °मित्र ।

परपत्नीं[1] निःशङ्कमेवं ब्रुवाणः शिक्षणीय एव भवानि''ति ? (*अपवार्य*) सखे शृङ्गारचषक ! सान्निध्यदोषादावयोः सखि[2]शब्दमधिकं प्रयुङ्क्ते ते प्रियतमा । मन्दारशेखर ! किं ब्रवीषि ''किमेनमन्यथा पतिरित्येव व्याहरति हरिणाक्षी''ति ? शृङ्गारचषक ! सावज्ञमिव किं ब्रवीषि, ''सखे ! किमेवमुच्यते, सेयम् मां प्रति सल्लापावसरे—

दयित प्रियतम वल्लभ
कान्त प्राणेश जीवितेशेति ।
सरसानपास्य शब्दान्
पतिपदमरसं कदापि नोक्तवती'' ॥९०॥ इति ?

सत्यमिदम्, इदं पदं परिणीतजन्तुसाधारणमस्मद्विधेषु न प्रयुञ्जते परकामिन्यः । सखे ! तिष्ठतु भवाननया सह नर्मालापशर्मणः पात्रीकुर्वन्नात्मानम् । आवामितो वेशवाटीं गच्छावः ।

(*गत्वा विलोक्य*)

इयं खलु सखे धनिकविलासिसदनसङ्केतशालासमापतत्सीमन्तिनीपदपतित[2]रतिशिथिलनिविरीसकबरीभरान्तरालपरिगलितविततमालतीकुसुमगर्भकैस्तनुलतामुषितस्वकीयसौरभ्यसौकुमार्यसम्पत्तिमिव सप्रणाममनुनाथयद्भिरभ्यर्च्यमानमध्यपथा, क्वचिदभ्यस्यमानसङ्गीतकलानियमविभ्रंशकुपितसमुदञ्चितहस्तभरतविद्योपाध्यायकरिष्यमाणसन्ताडनशङ्कासमाकुञ्चितशरीरतया नवोढाङ्गनासुरतललितमिवानुकुर्वतीभिर्वेशकुमारिकाभिरलङ्कृतरङ्गशाला, क्वचित्पुनरतिमृदुलकर[4]कमलतलविरचितविमर्दनशिथिलीकृतदरविवृत[5]निद्रासमुद्रेकसमा-

---

१. क ख पतिवत्नीं ।

२. ख मित्र° ।

३. क °पंक्ति ।

४. क °तर° ।

५. क °भूतविवृत° ।

कुञ्चितपक्ष्मपुटविवरदरदरीदृश्यमानविषमपदनिहित[1]पदविस्खलद्विलासिनीजनमनोहरविभ्रमविलोकनेच्छाचलित[2]कन्धरसरभसगमनकमनाङ्ग[3]सङ्घट्टननिपातित[4]-गन्धोत्तमामदमत्तमत्तकाशिनीसमुद्धरणचटुलैककरचेटिकाकरान्तरविभ्रष्टभाजन-गलितगन्धतैलसंसेकसुरभीकृतैकदेशा, क्वचिद्वाचाट[5]कुट्टिनीजननिबध्यमानहस्तविहस्तदासीजनरताश्रुतद्रविणवितरणापटुदुर्विध[6]विटविविधानुलापमुखरित-गृहाङ्गणा, क्वचिद्वेशजरतीजनानुनीयमाननव्यकामुकमुखनिरीक्षणवुक्कदुदग्र-कुक्कुरपुच्छगुच्छनिरवधिविधूननिवारितशुण्डादंशसङ्घाता, क्वचिन्निजगानरससमास्वादनलौल्यसमुपसर्पत्सरीसृपसमुत्सारणकुशलकुशीलवाङ्गनाप्रपञ्चितषड्-जानुवादर्शितमध्येपञ्जरशुकाभिरामसञ्जवना, माण्डवीमनसेव भरतमतानुवर्तिना, कमलषण्डेनेव वसुमदालोकदर्शितप्रहर्षेण, अमरकदम्बेनेव निरन्तरसुरता[7]मोदिना, दनुजकुलेनेव प्रकटितदेव(वा)नादरेण तरुणीगणेन विकीर्णा[8], पश्य संदृश्यते वेशवाटी । यावदत्र प्रविशावः ।

(प्रवेशम् नाटयन्, वामतोऽवलोक्य)

वसानः काषायं किमपि वसनं मस्करकरः
किरन् वस्त्यालम्बिस्फुटवकुलमालापरिमलम् ।
अदन्तस्ताम्बूलं किमपि लडयन्मुद्रितमुखं
महातुन्दः कोऽसावभिपतति मन्दं यतिरितः ॥६१॥

---

१. क °विहित° ।
२. क °वलित° ।
३. क °कर्मणांग° ।
४. क °निपतित° ।
५. क °वाचाल° ।
६. क °दुर्विदग्ध° ।
७. क °मुरत° ।
८. क विकीर्णान्तकीव ।

एह्येनमालापयावः । (*उपसृत्य*)

नमोस्तु यतये निरस्तस्वधर्माय । यते[1] ! किं ब्रवीषि, "अरे रे नराधम, क इव लक्षितोऽस्मासु धर्मभ्रंश" इति ? कथय, तर्हि कतमो धर्मस्ताम्बूलचर्वणं नाम यतीनाम् ?

(*सोत्प्रासम्*)

किं ब्रवीषि, "अरे मूर्ख ! किमीश्वरमाराधयन् जनो धर्माद् भ्रश्यती"ति ? यते ! कीदृशमीश्वराराधनं ते ? ताम्बूलचर्वणेन किम् ! किं ब्रवीषि, "अरे श्रृणु, कथ्यते, श्रूयते हि—

येन केनाप्युपायेन यस्य कस्यापि देहिनः[2] ।
सन्तोषं जनयेत्प्राज्ञस्तदेवेश्वरपूजनम् ।। इति ?

अतस्तावदनाथाभिः सभक्तिभावाभिः समर्पितं ताम्बूलं तासामेव सन्तोषं जनयता मया स्वीकृतम्, न तु कामत" इति ? (*साकूतस्मितम्*) यते ! पतितद्विजोऽसि; कथं चर्वितुमर्हसि ताम्बूलम् ? मन्दारशेखर ! किं ब्रवीषि, "सखे ! किं पृच्छस्यनुकूलमेवास्य[3] ताम्बूलचर्वणे पतितद्विजत्वमि"ति ? यते ! (*अनाकर्णितकेन*) किं ब्रवीषि, "ताभिः स्वदन्तयन्त्र[4]निष्पिष्टमेव समर्प्यते मे ताम्बूलम्" इति ?

यते, न किं तासां मुखोच्छिष्टचर्वण[5]मनाचारः ? किं ब्रवीषि, "अहो खल्वपरि[6]हार्यता धर्मतत्त्वानभिज्ञस्य ते मूर्खतायाः ! अनाराधितगुरुचरण नरपशो, श्रृणु तावत्कथयामि—

---

१. क यतिः ।
२. क पद्यार्धमिदं नास्ति ।
३. क पश्य स्वमेवास्य ।
४. क यन्त्र इति नास्ति ।
५. क °भक्षण° ।
६. क °रि° इति नास्ति ।

रतिकाले मुखं स्त्रीणां शुद्धमाखेटके शुन इति जागर्ति खलु मनुसूक्तिः। अतो रतौ तदेतन्न दोषायेति[1] ? मन्दारशेखर ! किं ब्रवीषि, "यतिनो रतिः कथं न दोषाय विशेषतस्तु विश्वस्तानामि"ति ?

यते, किं ब्रवीषि, "अरे किं न जानासि सकलभूताभयदानमस्माकमाद्यो धर्म" इति[2] ? यते, किमेतत्कथनेन प्रकृतोपयोगः ? किं ब्रवीषि "शृणु वचनं मे समग्रम्—

विश्लिष्टाः पतिभिर्निजैर्युवजनैर्दूरे समुत्सारिता
विश्वस्ताः समुपेक्षिता यदि पुनर्जाग्रद्द्वयैर्मादृशैः ।
स्मारक्रूररसालकार्मुकलतानिष्ठ्यूतपुष्पाम्बक-
व्राताघातविदीर्णजीर्णवपुषां तासां कुतो रक्षिता ॥६२॥

अतस्ता एता अस्मदेकतानजीविताः स्वाश्रमधर्मगोप्तृभिरस्माभिस्त्रातव्या एवे"ति ? कथं जीर्णवपुषस्ता विश्वस्ता यासु भवान् रज्यते ? किं ब्रवीषि "कथं नु भवेयुरजीर्णवपुषस्ता निवृत्तार्त्तवा" इति ? यते, तव कीदृशी रतिर्निवृत्तरजसि योषाजने। किं ब्रवीषि "स्थाने खलु विरजसं पन्थानमधितिष्ठतामस्माकमनुरागो निवृत्तरजसि योषाजने" इति ? इति। *(सस्मितम्)* यते, सत्यमेतत्—

समालिङ्ग्याः स्वैरं विगतरसनानिक्वणभयं
सविश्रम्भं सेव्या रहसि यतिशुश्रूषणमिषात् ।
न हि भ्रूणे शङ्का विगतरजसो बीजविरहात्
कथं नो विश्वस्ताः कथय रमयन्तीह यतिनः[3] ॥६३॥

---

१. क इति दोषायते इति।

२. क एतत्पूर्णवाक्यं नास्ति।

३. क भवतः।

मन्दारशेखर ! *(सोत्प्रासम्)* किं ब्रवीषि,

"मिष्टान्नं गृहिणां गृहेषु सुलभं काषायवासो धृते-
र्विश्वस्ताः परिचारिकाः स्मरवशादन्तर्बहिर्धर्मतः ।
नो लौकायतिके मते स्थितिमतः स्वप्नेऽपि ते पापधी-
र्धिङ् मर्त्यानपरान् वृथाव्यसनिनो धन्यस्त्वमेवैकक:" ॥६४॥ इति ?

यते *(सक्रोधं दण्डमुद्यम्य)* किं ब्रवीषि "अरे रे कुलटापुत्र ! कथमस्मानपि नास्तिकान् ब्रुवाणः कुम्भीपाके न पतिष्यसि ? विमूढमते ! विलीनानर्थप्रयोजकमिथ्याज्ञानानामस्माकं कुतो नाम किल्विषमि"ति ? मन्दारशेखर, किं ब्रवीषि, "सखे पश्यास्य दण्डिनोऽपि चण्डत्वम् । हन्तुमिच्छत्यावाम् ! दण्डमुद्यम्य समुत्पतित" इति ? सखे ! किं न जानासि कामक्रोधावयुतसिद्धाविति ? किं ब्रवीषि, "सखे सर्वोऽप्ययं कलिविलास" इति ? सत्यमेतत्—

नमो युगाय महते कलये कलयेऽञ्जलिम् ।
कामं कामं कलयते निष्कलासु यतिष्वपि ॥६५॥

अलमतिप्रसङ्गेन एहि गच्छावः । *(पुरो गत्वा विलोक्य)* अये । समुत्पत्तिफलसाकल्यपात्रे सपदि मे नेत्रे, यतोऽसौ विलासवैजयन्ती निद्राविरामरमणीया संदृश्यते । इयं खलु—

स्तोकान्मीलितलोचनाम्बुजयुगं निर्गत्य लीलागृहात्
निद्राशेषवशात् स मामपि समासाद्य स्खलन्ती भुवम् ।
संलग्नानुदयारुणस्य किरणानङ्गेऽङ्गरागभ्रमा-
दुन्मार्ष्टुं सिचयाञ्चलं कुचपरिभ्रष्टं समालम्बते ॥६६॥

किञ्च—

व्यक्ताव्यक्तविमुक्तकञ्चुकसमुत्तुङ्गस्तनाभ्यन्तर-
व्यालोलामलतारहारनिकरैरस्याः सखे सुभ्रुवः ।
पश्याभ्युन्नतहेमशैलशिखरद्वन्द्वान्तरालोल्लसत्-
प्रालेयाम्बुसरित्प्रवाहलहरीलावण्यमाविष्कृतम् ॥९७॥

मन्दारशेखर ! किं ब्रवीषि, "ममैवं प्रतिभाति—

यूनां मोहमहाफलप्रसविनीं[1] नाभ्यालवालोत्थितां
सेक्तुं लोमलतां मुखामृतनिधेर्लावण्यनामामृतम् ।
नेष्यन् सारणिकां विभज्य कृतवान् कूटद्वयं पार्श्वयोः
पञ्चेषुस्तदिदं पयोधरयुगं लोकाः समाचक्षते" ॥९८॥इति ?

एहि तावदेनामपनीताङ्गरागभ्रमादेवालापयावः ।

(*उपसृत्य*)

प्रियोरःसंघर्षस्खलितपरिशिष्टं कुचतटी-
निषिक्तं हे मुग्धे घुसृणरसपात्राङ्कुररजः ।
प्रमार्ष्टुं ते यत्नः सपदि विफलो यत्र पुरुष-
प्रयत्नोऽभूत्पङ्गुः कथमिव करोत्वेतदबला ॥९९॥

विलासवैजयन्ति, सलज्जस्मितमंशुकाञ्चलमुदञ्चयन्ती किं ब्रवीषि, "अयि वाग्विलासिन् ! किमेवं मूढोऽसि ! सम्यगाकलय[2] मनसि कलहान्तरिताकृतं कोपम्। तत्र पुरुषप्रयत्नः पङ्गुर्वा जङ्घाल" इति ? मन्दारशेखर, किं ब्रवीषि, "सखे जितोऽसि त्वं वचसैवानया विशालदृशे" ति ? (*सबहुमानम्*)

---

१. क °लां रसवतीं° ।

२. क °गालय ।

अहं जितोऽस्मीति किमङ्ग कथ्यते
विशालनेत्रावचसाऽमुनाऽधुना ।
श्वसन्ति सेन्द्रा अपि ते ययाऽमरा
अनेन साऽप्येकरदे सुधा जिता ।।१००।।

(समीपमुपसृत्य करे गृहीत्वा)

अयि विलासिनि ! मा संवृणु कुचकलशौ । किं ब्रवीषि, "अयि विलासिन् ! मासात्परं किं करोमि कथये"ति ? अयि वक्रवादरसिके ! मत्कृतमात्मनः कुच-संवरणनिषेधमन्यथा मन्यसे ! किं ब्रवीषि, "कुतोऽनयोर्निषिध्यते संवरणमि"ति ? किं न जानासि ! उद्वृत्तौ पश्यतोहरावेतौ अतो, निषिघ्यते संवरणम्[1] ।

कि ब्रवीषि

"किं तवापहृतमेताभ्याम्"इति ?

अये किं कथयामि !

यन्मूलः संसारस्तदेव मे चित्तमपहृतं त्वाभ्याम् ।।१०१।।

किं ब्रवीषि, "तर्हि किमेतौ करोमी"ति ? करेऽर्पय ममैवैतौ। "किं ब्रवीषि, "त्वं वा किमेतौ करोषी"ति ? यद् रोचते मे चित्ताय तदहं करोमि । मन्दारशेखर, किं ब्रवीषि, "सखे !

अपहृतं मन इत्यमुना कुचो यदि निजेन करेण नियन्त्रितः ।
नियतमेव भवन्ति तदा तव प्रमुषिताः सकलेन्द्रियवृत्तयः ।।१०२।।

तदलमनेन साहसेन । एहि गच्छावः । स्थितिगुप्तिरेव नौ भूयान् लाभ इति !

(सादरस्मितम्)

सुन्दरि ! सत्यमेव सायमागच्छावः। सम्प्रति गच्छावः ।

---

१. क नास्ति ।

(*अभ्यतो गत्वाऽवलोक्य सानन्दम्*)

सखे ! कृतमितरालोकनकुतूहलेन ! सफलीक्रियेताम् इतो वसन्तकलिकायाः केशसंयमनकलाविलोकनेन विलोचने—

केशान् वामकरावलम्बितशिखान् भूयो रणत्कङ्कणं
व्याधूयाथ कनिष्ठिकानखमुखेनाकुञ्चितान्याङ्गुलि ।
सीमन्तं विरचय्य तस्य करभेणोन्मृज्य पार्श्वद्वयं
तान् पश्चाद्युगपत् प्रणीय करयोर्युग्मेन बध्नात्यसौ ॥१०३॥

मन्दारशेखर ! किं ब्रवीषि "पश्येदमन्यदपि चमत्कृतिस्थानम्—

यथा यथा यो वलते भुजोऽस्या
उदञ्चितः संयमने कचानाम् ।
तथा तथा वल्गति काममेकः
स एव वक्षोरुह उत्पलाक्ष्याः" ॥१०४॥इति ?

सखे ! एह्येनामालापयावः ।

(*उपसृत्य*)

स्नेहसम्बर्धितान् बालान् दृढं बध्नासि सुन्दरि !
करुणा हरिणाक्षीणां कुतः कठिनचेतसाम् ॥१०५॥

वसन्तकलिके ! किं ब्रवीषि,

"सम्प्राप्तचिकुरभावः
कचनिचयो वा युवा करे लग्नः ।
स्त्रीभिर्दृढं निबध्यः
खलु नो चेत्परतकलत्रमनुसरति[1]" ॥१०६॥इति ?

---

१. क अनुस्मरति ।

मन्दारशेखर ! किं ब्रवीषि, "अस्त्येषां[1] नियन्त्रणे नि[2]गूढं बीजान्तरमि"ति ? (*सादरं*) सखे ! किं तदुच्यताम् । किं ब्रवीषि, "शृणु तावत्—

कचभरः[3] कुटिलो न निबध्यते यदि तदा विपरीतरतोत्सवे ।
परिपतन्पुर एष मनागपि प्रियमुखं न ददाति निरीक्षितुम् ॥१०७॥

इत्यनया निबध्यत"इति ? वसन्तकलिके ! सश्लाघं तर्जनीमाघूर्णयन्ती किं ब्रवीषि, "साधु कुशाग्रमते मन्दारशेखर, सम्यग् गृहीतं त्वया मे हृदयस्थितमि"ति ?

(*साभ्यसूयम्*)

अयि मुग्धे ! किमत्र मामसमर्थं समर्थयसे इति ।

(*तस्याः कुचाभिमुखं पद्मकोशहस्तं प्रसार्य*)

विलासिनि ! विलोक्यताम्, तदेतन्मयापि गृह्यते । सभ्रूभङ्गं अङ्गानि पश्चादपहरन्ती किं ब्रवीषि, "धूर्त्त ! किमत्र ग्रहीतुमिच्छसी"ति ? (*सस्मितम्*) सुन्दरि ! यद् गृहीतं मन्दारशेखरेण तदेव मया गृह्यते ।

(*सभर्त्सनम्*)

कि ब्रवीषि, "किमत्र गृहीतं मन्दारशेखरेणे"ति ? अयि ! कथमेतावतैव विस्मृतं भवत्या यत्स्वयमेवोक्तं हृदयस्थितिमि"ति ?

---

१. क अस्त्येकं ।
२. क नि° नास्ति ।
३. क कुचभरः ।

किं ब्रवीषि, "अये मदुक्तं सम्यगनाकलयतस्ते[1] दुर्वारं[2] जडत्वं चित्तस्ये"ति ? मन्दारशेखर। किं ब्रवीषि, "अयि विलासिनि ! किमेवमुच्यते ? त्वदुक्ताकलनेनैव जडत्वोपनतिश्चित्तस्य मे वयस्यस्ये"ति ? अयि सत्यमाह मन्दारशेखरः।

हृन्मे जडं तव पयोधरमग्नमास्तां
को नो जडैः परिचयाज्जडतामुपैति।
लाभो महानयमपि[3] स्फुटवारिजात-
पत्रायताक्षि ! यदिदं प्रलयं न नीतम् ॥१०८॥

वसन्तकलिके ! किं ब्रवीषि, "किमिति जलधरमग्नं मनस्तवे"ति ?

मन्दारशेखर ! किं ब्रवीषि, "सखि त्वयात्र किमाक्रम्यते वक्रवाक्सरणिरि-"ति ? वसन्तकलिके किं ब्रवीषि,

"वक्रवाग् वक्रवाचैव विजेतव्यो न चान्यथा।
वज्रसन्तक्षणं कर्त्तुमवज्रेण न युज्यते[4]" ॥१०९॥ इति ?

अस्तु सुन्दरि ! स्वस्ति ते, गच्छावः।

(*अग्रतो गत्वा विलोक्य*)

सखे ! पश्येममभ्यङ्गारम्भमहोत्सवमस्या मत्स्याङ्कपताकायाः, इयं खलु—

---

१. क °गालपस्ते।
२. क दुर्नि°।
३. क °मिति।
४. क नि°।

आश्रान्तं दृढयन्त्रणेन कुचयोरत्यक्तकाठिन्ययो-
राबद्धस्फुटमण्डलोन्नतिमितश्चोलं विमुच्योरसः ।
नीवीविच्छुरितं विधाय तममुं वामस्तनालम्बिनीं
वेणीं पाणिनखाञ्चलैः शिथिलयत्याक्रम्य पीठं पदा ॥११०॥

मन्दारशेखर ! किं ब्रवीषि, "सखे ! सम्यगुपदर्शितं भवता ।

इतश्च—

आवर्त्य कण्ठं सिचयेन सम्य-
गाबध्य वक्षोरुहकुम्भयुग्मम् ।
काऽसौ करालम्बिततैलपात्रा
मन्द्रं समासीदति सुन्दरीं ताम्" ॥१११॥ इति ?

सखे ! सेयमस्या वयस्या कान्तिमती । पश्य पश्य—

अस्याः पीठोपविष्टाया अभ्यङ्गं वितनोत्यसौ ।
ललच्छ्रोणि चलद्वेणि नटद्गुरुपयोधरम्[1] ॥११२॥

एहि, कान्तिमतीं प्रथममालापयावः ।

(*उपसृत्य*)

अयि कान्तिमति !

नटतु कुचभरोऽस्याः केशहस्तो[2]ऽपि तन्व्याः
समुचितमिदमेतौ बन्धनाद्यद्विमुक्तौ ।

---

१. क पयोधरा ।

२. क °पाशो ।

तव तु कुचभरोऽयं गाढबद्धो नितान्तं
नटति किमिति बाले[1] ब्रूहि तन्न प्रतीमः ॥११३॥

मत्स्याङ्कपताके ! सस्मितं किं ब्रवीषि, "अयि रसिक ! कुतोऽत्र भयावसरे नाट्यावसरः[2] कुचभारस्य, किन्त्वसौ भयाद्वेपत" इति ? अये किमस्तीदानीं भयनिदानमेतस्य ? किं ब्रवीषि, "किमन्यन्नखरायुधविलोकनात्पृथुकस्य भयनिदानमेतस्ये"ति ?

कोऽसावत्र नखरायुधः ? सोत्प्रासं किं ब्रवीषि, "किं कथयामि भवानात्मानमेव तादृशं न जानाती"ति ?

मन्दारशेखर ! किं ब्रवीषि, "सखे युक्तमाह मत्स्याङ्कपताका —

रतिशिथिलितकञ्चुकं विदित्वा
खरनखशस्त्रमुखैर्विदारयन्तम् ।
अकरुणमवलोक्य किं भवन्तं
कुचभर एष भवेन्न भीतिपात्रम्" ॥११४॥ इति ?

मत्स्याङ्कपताके ! किं ब्रवीषि, 'सखि कान्तिमति[3] तमेनं निजाङ्गोद्वेगकारिणं विलासिनं नय दृढं बध्वा सवक्षोजमि"ति ? मन्दारशेखर ! किं ब्रवीषि, "सखे ! भवान् दिष्टचा वर्धते, यदियं मत्स्याकपताका कुचाभ्यां सह भवन्तमाबद्धुमादिशति कान्तिमतीमि"ति ?

(*सहर्षस्मितम्*)

---

१. क नास्ति ।

२ क °वकाशः ।

३. क मत्स्या°....°मति इति यावत् नास्ति ।

यद्येवमनया बद्धो मुक्ताहारस्तदा सखे ।
वसामि कुचभारेऽस्याः स्पृहणीयसुखास्पदे ।।११५।।

किं ब्रवीषि, "सत्यमुक्तं मुक्ताहारतापत्तिमन्तरेण कथमस्याः कुचतटे घटेत चिरसंवास" इति ? मत्स्याङ्कपताका(के) ! सोत्प्रासं किं ब्रवीषि, "अहो मानोरथिकमोदकैः कुक्षिम्भिरिता ।कन्दर्पविलासमन्दारशेखरयोः, यौ पुनर्बन्धनेन कुचसादृश्यं प्रापयेति मयोक्तमन्यथा मन्वानावकाण्डे निर्भरं प्रमोदमनुभवत" इति ?

(सहर्षम्)

अयि सरलहृदये ! एवमप्यक्षतो मनोरथः । श्रूयताम्, तथाहि—

सादृश्यमब्जाक्षिसमानधर्मता
वक्षोजधर्मस्त्वबलाहृदि स्थितिः ।
तां[1] चेदियं मां गमयत्यसंशयं
तेनैव लब्धं[2] खलु वाञ्छितं मया[3] ।।११६।।

मन्दारशेखर ! किं ब्रवीषि, "अयि ! सोऽयं बध्यतां नाम भवतीनामङ्गोद्वेगकारी कन्दर्पविलासः । किं पुनरपराद्धममुना कुचभारेण य एवं निर्दयमाबद्ध" इति ?

सखे ! ममैवं प्रतिभाति—

स्वाङ्गं कृशात्कृशतरं बलिभिर्नितान्त-
माक्रान्तमेव जलजातदृशोऽवलग्नम् ।

---

१. क तं ।
२. क सिद्धं ।
३. क मम ।

पुम्भावसम्भ्रमवशात् कुचभार एष
आकम्पयत्यतितरां तत एव बद्धः ॥११७॥

मन्दारशेखर ! किं ब्रवीषि, "सखे ! एवमिदं न सन्देह" इति ? एहि पुनरागमिष्यावः । सम्प्रति[1] मा भूदावाभ्याममुष्या अभ्यङ्गान्तरायः ।

(*कतिपयपदानि गत्वा, श्रुतिमभिनीय*)

अये मणिमाला[2]मन्दिरोदरे[3] कीरसारिकयोः संलाप इव श्रूयते । एहि तत्र गत्वा क्षणमात्रं मनो विनोदयिष्यावः ।

(*गत्वा विलोक्य सहर्षम्*)

अये आलापसाम्याद् भ्रान्तोऽस्मि । नेयं सारिका, किन्तु कीरमध्यापयति कापि नितम्बिनी । इयं खलु—

कूर्पासं दधती तुषारधवलं न्यग्भूततुङ्गस्तनं
व्यामिश्रद्युतिबन्धुरं तनु[4]रुचा चेलं कुसुम्भारुणम् ।
हैमात्पञ्जरतो निचोलमधुना प्रोत्सारयन्ती शनैः
कीरं चारुतरप्रबन्धशकलान्यध्यापयत्यङ्गना ॥११८॥

किं ब्रवीषि, "कुतोऽस्यां प्रत्यासन्नायां सत्रास इव समुत्पतति पत्ररथः" इति ? शृणु सखे ! समुत्पतनकारणमेतस्य—

---

१. क सपदि ।
२. क मालिका° ।
३. क नास्ति ।
४. ख नास्ति ।

सङ्कुमदसारपङ्किलवक्षोजोद्वान्तसौरभतरङ्गान् ।
विकिरन्ती परितोऽसावुपसर्पति तद् बिभेति कीरशिशुः ॥११९॥

यावदेनां मणिमालामुखेनावगच्छाव: ।

(*परिक्रम्यावलोक्य*)

सखे साऽप्यत्रैव वर्तते, एहि पृच्छाव: । मणिमाले ! केयमनङ्गलीलेव शरीरवती नितम्बवती ?

किं ब्रवीषि, "अयि विलासिन् ! किमुत्तरं ते प्रयच्छामि, स्वयं गृह्णन्नेव-नामास्याः पुनः पृच्छसीति किमस्या नामधेयमनङ्गलीला ?" किं ब्रवीषि, "किमियं निजाङ्कापनीतबालभावा नाद्यापि त्वया प्रत्यभिज्ञायते मे कनीयसी"ति ? अपि नामेयं कनीयसी भवत्याः ?

(*सोपालम्भम्*)

किं ब्रवीषि, "अयि बहुरसिकवल्लभानां युष्माकं कुतो नामास्मादृश-योषितां प्रत्यभिज्ञे"ति ? सुन्दरि ! नास्माकमयं दोषः, किन्तु तारुण्यवैभवोप-रुद्धानामङ्गाना[1]मेव ते भगिन्याः[2] । तथाहि—

स्थातुं नालमुरोजयोश्च हृदयं मध्यो न संलक्ष्यते
रोमालिस्थितितोऽप्यसौ कृतमुखैरुन्नीयते वा न वा ।
कर्णाभ्यर्णमुपागते अपि पुनर्नेत्रे न विश्राम्यतो
ज्ञेयाऽसौ वचसैव ते त्ववयवैर्न प्रत्यभिज्ञा मम ॥१२०॥

---

१. क °मङ्गकाना° ।
२. क भवत्या ।

(*मन्दारशेखरमालोक्य*)

किं ब्रवीषि, "किमेनां भवानपि न जानाती"ति ?

मन्दारशेखर ! किं ब्रवीषि, "नहि नहि, सख्युरेव मनीषासरणिमवगाहते ममापि मतिः । यतोऽस्याः,

वक्षः पीनकुचौ कचान् कुटिलता वाचं सुधामाधुरी
वैपुल्यं नयनेऽवलग्नमणिमा दन्ताम्बरं शोणिमा ।
श्रोणीविम्ब[1]ममुं[2] नितम्बमहिमा[3]क्षोणीधरस्यावृणोत्
ज्ञेयाऽसौ तरुणी पुरा परिचितैरङ्गैर्गिरा वा कथम् ॥१२१॥

(*सानुस्मरणम्*[4])

सखे[5], पुरा दृष्टाया अमुष्याः,

प्रतिपदस्खलनं गमने स्थितं
चलविशालदृशः परिभाषणे ।
तदधुनापि समं सविलासता
मधुरताऽलसता तु विशिष्यते ॥१२२॥ इति ?

कुतोऽसौ करतिरोहितवदना मदेन तुरङ्गमध्यापयति कुरङ्गाक्षी ? मन्दारशेखर ! किं ब्रवीषि, "सखे ! ममैवं प्रतिभाति,

---

१. क °द्वंन्द्व° ।

२. क °मिथुं° ख मिमं ।

३. क °गरिमा° ।

४. ख स्मरणमभिनीय ।

५. ख अये ।

आलोकते यदि रदच्छदनं मदीय-

माद्यून (?)एष मम नानुवदेद्वचांसि ।

इत्यङ्गुलिव्यवहितेन मुखेन कीर-

मध्यापयत्यधरवञ्चितबिम्बशोभा ॥१२३॥ इति ?

मणिमाले, अनङ्गलीलामालोक्य किं ब्रवीषि, "वत्से ! किमेनं न[1] प्रत्यभिजानासि कन्दर्पविलासम् ?

आकौमारं यदङ्गे त्वं भृङ्गीव कमलोदरे ।

लालितास्यसितापाङ्गि[2] सोऽयं बाल्यसखस्तव" ॥१२४॥ इति ?

मन्दारशेखर ! किं ब्रवीषि, "सखे ! किमर्थमियं सहुङ्कारमुखविधूननेनैव प्रयच्छति प्रतिवचनमेतस्य, न तु कण्ठत" इति ? सखे ! किमिदं मामपूर्वं पृच्छसि[3] ! किं न जानासि, सर्वत्र तारुण्यगर्वितानामयमेव पन्था मत्तकाशिनीनाम् ?

(*सावधीरणम्*)

किं ब्रवीषि ?

"लज्जा यत्र निवर्त्तयत्यपि दृशः स्वच्छन्दसञ्चारतः

स्वाधीनाऽपि निरुध्यतेऽलसतया वाणी रसस्यन्दिनी ।

स्पर्शेऽ[4]पि प्रथमं प्रियस्य भजते मूर्तिर्यवासोपमां

तादृग्यौवनसंश्रयेण धिगमूर्माद्यन्ति मुग्धाः स्त्रियः" ॥१२५॥इति?

---

१. ख नास्ति ।

२. ख ङ्गे ।

३. ख इदं वाक्यमेव नास्ति ।

४. ख स्पर्शो ।

किमेवं ब्रूषे[1]—

"युवरसिकानुद्भिन्नं दासीकुरुते यदेव तारुण्यम् ।
तद्वृद्धौ कथय सखे कथं न माद्यन्ति सुन्दर्यः" ॥१२६॥[इति?]

(अनङ्गलीलामालोक्य सस्मितम्)

किं ब्रवीषि, "अयि मिथ्योदरि[2]! शृणु, मया कथ्यते पथ्यं वचः ।

अधिरुह्य पुरा तनुं यदीयां
गमितास्ते दिवसा यदा शिशुस्त्वम् ।
अनृणा भव भीरु तं कुचौ ते
सकृदारोप्य हृतेभकुम्भदम्भौ" ॥१२७॥इति ?

अनङ्गलीले, किं ब्रवीषि, "का तत्र[3]भवन्तमाकारितवती धर्मागमसरणिप्रदर्शनाये"ति ? मन्दारशेखर ! किं ब्रवीषि, "किं तर्हि वारनारीकुलोचितमर्थागममार्गमुपदर्शयामी"ति ?

अनङ्गलीले सक्रोधं[4] किं ब्रवीषि, "अलमलमर्थेन वा धर्मेण । गच्छ, गच्छ यथागतं जोषमि"ति ? मन्दारशेखर ! सस्मितं किं ब्रवीषि, ? "कान्ते[5] तर्हि किं ते कामेन भवितव्यं, अथवा, किं ते कामेन ! ननु पूर्णकामैव भवती"ति? सखे ! किमुच्यते, पूर्णकामेति ? वपुरेवास्याः पूर्णकामम् । तथाहि,

---

१. ख ब्रवीषि ।
२. क क्षामोदरी ।
३ ख नामत्र ।
४. ख सरोषं ।
५. ख का ते ।
६. ख सखि इति विशेष ।

मन्मथवृत्तपयोधरमतनुनितम्बं प्रसूनशरहासम् ।
अम्बुरुहाम्बकवदनं काममनोज्ञं वपुस्तन्व्याः ॥१२८॥

किन्त्वेषा त्वत्सकाशान्मोक्षमपेक्षते तन्वङ्गी''ति ?

(सस्मितम्)

सखे शृणु, कथयामि ।

तिष्ठतु मोक्षः श्रौतः किं तेनाकामिलोकसुलभेन ।
येन कृतार्थः कामस्तन्नीवीमोक्षमीहते तन्वी ॥१२९॥

मणिमाले, किं ब्रवीषि, ''कथं सुलभोऽस्माकं नीवीमोक्षो विनैव भवतां नीवीमोक्षम्, विशेषतो मे भगिन्याः सर्वाकारौदार्यशालिन्या'' इति ? सखि, सत्यमाह भवती—

कर्णातिलङ्घि नयनं सुरभिस्तनुस्तु
बाहुद्वयं मथितकल्पलतावलेपम् ।
एषा स्वयं सुरमणी तत एव तन्व्यां
सर्वेऽर्थिनः[1] प्रकटयन्त्यनुरागमस्याम् ॥१३०॥

मन्दारशेखर ! किं ब्रवीषि, ''यद्येवमसौ क्षमेत युगपदेव बहूनर्थिनः कृतार्थीकर्तुमि''ति ? अनङ्गलीले ! सभ्रूभङ्गं किं ब्रवीषि, ''मणिमाले ! न रोचन्तेऽस्य मे साकूतभाषितानि । रोचन्ते चेत्तिष्ठ त्वमहं[2] गच्छामी''ति ? *(विलोक्य सविषादम्)* सखे ! चलितैव सेयं कोपना । *(व्यामेनास्याः पन्थानं रुन्धन्[3])* अयि विलासिनि !

---

१. क °र्थि° इति नास्ति ।
२. ख °मितो ।
३. ख निरुन्धन् ।

तिष्ठतु तव मयि कोपस्त्वयि दर्शितपक्षपातमनवरतम् ।
वचनानुसारिणं ते शुकमपि हित्वा क्व नु व्रजसि ॥१३१॥

भवतु, तावदतिमानमानामेनां पश्चादागत्यानुनयिष्यावः ।

(कतिपयपदानि गत्वा निरूप्य)

पश्य सखे शृङ्गारवल्ली गृहाङ्गणे—

जपारक्तचेलस्फुरत्तन्तुजाल-
प्रसर्पन्नितम्बोरुकान्तिप्ररोहैः[1] ।
हरन्ती दृशं[2] पश्यतां कापि बाला
कुचौ कञ्चुकेनाद्य बध्नाति बाढम् ॥१३२॥

असौ,

एकस्मिन्नतकण्ठनालमबला सन्धाय कूर्पासकं
तद्भिन्ने समुदञ्चितस्तनभरं बाहौ समारोप्य तम् ।
कक्षाभ्यामथ कञ्चुकाञ्चलयुगं व्याकृष्य संयोज्य च
ग्रन्थिं तत्र ददाति पश्य वदने धृत्वोत्तरीयाञ्चलम् ॥१३३॥

यावदेनां शृङ्गारवल्लीमुखेनावगच्छावः ।

(परिक्रम्यावलोक्य सहर्षम्)

अये अव्यवधानापातिनो मे भागधेयपरम्परा ! यतोऽसावुपकण्ठे—

---

१. क °हः ।
२. क दृशां ।

प्रत्याग्राभ्यञ्जनाप्लावमसृणार्द्रशिरोरुहान् ।
विधुन्वन्ती नतग्रीवमातपं सैव सेवते[1] ॥१३४॥

अस्याः,

रुन्धन्तं वदनाम्बुजं कचतमः प्राग्भारमुच्चावचं
हस्ताम्भोजयुगं धुनोति सहजज्ञाते यदार्हा[2]न्मुहुः ।
तद् दृष्ट्वा[3] कुचपङ्कजातमुकुलौ हर्षात्परं नृत्यतः
को नु स्वीयकृतावमानमहितं दृष्ट्वा न सन्तुष्यति ॥१३५॥

(उपसृत्य)

प्रिये ! शृङ्गारवल्लि ! अपि कुशलं ते तारुण्यस्य ? मन्दारशेखर ! किं ब्रवीषि, "सखे ! किमेनामनादृत्य त्वदीयकुशलानुयोगोऽस्यास्तारुण्यमवलम्बते" इति ? सखे ! उपजीव्यकुशलमूलं खलूपजीविनः कुशलम् ! अतस्तारुण्यकुशलेऽस्याः कुशलमर्थसिद्धमिति तथा पृच्छामि । किं ब्रवीषि, "किमुपजीव्यमम्बुजदृशां तारुण्यमि"ति ?

सखे ! न हि सर्वासां किन्तु वेशकुशेशयदृशामेव । कुलाङ्गनानां तु तदेतत् केवलमलङ्कारः । किं ब्रवीषि, "केनावगतं भवता वधूपजीव्यं तारुण्यमि"ति ? शृणु तावत्--

कुचे क्षितिधरश्रियं कुवलयाधिपत्यं दृशोः
कचेषु घनसम्पदं पदशयेऽथ पद्मोन्नतिम् ।
ददाति वदने पुनः सकलराजरम्योदयं
न पङ्कजदृशां सखे ! किमिव यौवनेनार्पितम् ॥१३६॥

---

१. क सेव्यते ।
२. ख यहार्दान् ।
३. क दृष्टा ।

इत्यहं तथावगच्छामि। किं ब्रवीषि "सखे! सर्वमिदं कुलवधूसाधारणम् तत्कथमेतत्प्रतिपादनेन, केवलगणिकोपजीव्यता तारुण्यस्ये"ति ? सखे ! न खल्वेतावदेव; भवादृशैर्धनमक्षय्यमुपभोग्यं[1] चेति। तथा—

(सावज्ञम्)

किं ब्रवीषि, "सखे ! छलेन भवान्मां किं मूढविटं समर्थयते ? 'ते दत्वा द्रविणं तासां तासु मूढा व्रजन्ति ही[1]' ति मदनतन्त्रेषु शतशो निशम्याप्येवं ब्रवीषी"ति ?

(सानुनयम्)

सखे, क्षन्तव्यमिदं सौहार्देन यदृच्छागतं मे वाचास्खलनम्। किं ब्रवीषि ! "सखे[2] ! स्वापगमक्षणापनीतसौभाग्यसर्वस्वं तारुण्यमाश्रित्य मुधैव माद्यन्त्यमूर्वारस्त्रिय" इति ? सखे ! मन्ये तव वचस्यत्र[3] नानर्थकं वर्णमेकमपि,

आयौवनं न गणयन्ति नितान्तशौण्डाः
सम्पन्नरूपविभवान् धनिनोऽपि यूनः।
वारस्त्रियोऽथ जरसा परिभूतदेहाः
संवाहयन्ति चरणौ तरुणीजनानाम् ॥१३७॥

शृंगारवल्लि ! किं ब्रवीषि, "अयि कन्दर्पविलास ! किमत्रागतस्य तवास्मत्परिरम्भ एव फलम्[4]—(इत्यर्धोक्ते सलज्जस्मितम्) नहि नह् युपालम्भ" इति ? (सहर्षस्मितम्)

सुन्दरि ! सत्यं तद्यत्प्रथममाह भवती—

---

१. क मू० प्र० °दृशैर्दापयति धन°...... °मुपभोगयोग्यं चेति।
२. ख अये।
३. क वचनस्य।
४. ख °रम्भ एव फल°।

सकृदाचरितः सरोजपाणेः परिरम्भस्तव गोचरैः स्मरेषोः ।
अपराद्धपृषत्कमब्जबाणं कुरुते यः स कथं भवेन्न[1] लाभः ॥१३८॥

किं ब्रवीषि, "अये ! अपूर्वोऽयं द्वीपिनीदुग्धलाभ इव[2] मद्गृहागमः कन्दर्पविलासस्ये"ति ? मन्दारशेखर ! किं ब्रवीषि, "अलमबले वक्रोक्त्या ते प्रियप्रेम्णा[3] गर्वितायाः । कथय केयमङ्गणाङ्कस्था हरिणाङ्कमुखी"ति ? शृंगारवल्लि ! किं ब्रवीषि, "सेयं मदीया भगिनी"ति ? मन्दारशेखर ! किं ब्रवीषि, सुन्दरि ! विदितमेव स्त्रीत्वनियतमेतस्या भगिनीत्वम्, किमेतत्कथनेन, कथय कथमेषा त्वदीये"ति ? शृङ्गारवल्लि किं ब्रवीषि, "अयि मन्दारशेखर ! अलं[4] ते परिहासेनं, जानीहि ममेमां सहोदरीमि"ति ?

(*सहर्षम्*)

सुतनु ! ममेदं लाभाल्लाभान्तरमापतितम्, यतस्त्वामेकां द्रष्टुमागतस्य ममात्रेदानीं त्वत्सहोदरीदर्शनलाभः । कथय किमस्या नामधेयम् ? किं ब्रवीषि, "सुमनोऽङ्गपाली"ति ? (*सशिरःकम्पम्*) सत्यमियं यथार्थनामधेया ते सहोदरी । तथाहि—

वैश्रवणलोलनयना कालकचा जम्भदम्भहारिकुचा ।
मध्ये स्वयं कृशा नु स्फुटमपि सुमनोङ्गपालीयम् ॥१३९॥

(*सुमनोङ्गपालीमालोक्य सस्मितम्*)

तथाभूते कामप्रथनसमयोत्थव्यतिकरेऽ-
प्यभग्नो यो बाले जयति कवचानावृततनुः ।

---

१. क च्च ।
२. ख इवेदानीं मद्° ।
३. ख °प्रेम° ।
४. ख कृतं ।

तमेनं किं तूष्णीं निचुलयसि वक्षोरुहभरं
कुतो भीरस्यायं नरपरिवृढैरर्पितकरः ॥१४०॥

सुमनोऽङ्गपालि, सस्मितं किं ब्रवीषि ?

"नृवरैरर्पितकरो गुरुः सत्यं पयोधरः ।
कृपणं बाधते मध्यमत एव निबध्यते ॥१४१॥

न तु भीत इति, मया संगोप्यत" इति ? मन्दारशेखर ! किं ब्रवीषि "अये कथमियमावयोरिदं प्रथमेऽपि दर्शने चिरकृतसंस्तवैव निर्लज्जमेव व्याहरति हरिणाक्षी"ति ?

सुमनाऽङ्गपालि, किं ब्रवीषि ?

"पथि सुभग ! निरङ्कुशेऽप्युषित्वा
ह्रियमपि किं समुपैमि वाञ्छितघ्नीम् ।
करधृतकरदीपिकस्तमिस्त्रे
गणयति किं कथय त्वमेव लोकः ॥१४२॥ [इति ?]

मन्दारशेखर ! किं ब्रवीषि "सुन्दरि ! कथय कथं निरंकुशा वः पदवी"ति ? सुमनोऽङ्गपालि ! किं ब्रवीषि, "शृणु तावदवहितः,

परीहासः स्वैरं प्रसरति मनो यत्र रसिके
प्रसक्तं स प्राप्यो[1] गमनमनिरुद्धं क्वचिदपि ।
अहार्यः संलापः सततमनुभावोऽपि विविधो
न निर्देश्यः[2] सेयं जयति खलु गाणिक्यसरणिः" ॥१४३॥इति ?

---

१. क सम्प्राप्यो ।

२. क निर्देशः ।

अयि सुदति ! तदपि वद, कथं लज्जा वाञ्छितविरोधिनी युवतीनाम् ? किं ब्रवीषि, "अयि सरसहृदय ! न वयमपत्रपाया: प्रतिवेशिन्योऽपि, तत्कथं कथयामस्तत्त्वम् ? लज्जाजन्मभूमयस्तु कुलकामिन्यस्ता[1] एव प्रष्टव्या" इति ? शृंगारवल्लि ! किं ब्रवीषि,

किं वक्तव्यं लज्जा कान्तानां हन्त वाञ्छितघ्नीति ।
चित्रार्पितमपि दयितं द्रष्टुं प्रददाति नैव या सम्यक्" ।।१४४।।इति?

मन्दारशेखर ! किं ब्रवीषि, "सत्यमपत्रपेति वाञ्छितघ्नी[2] कुलाङ्गनानाम् । युष्माकं तु माता नाम दग्धमुखी पिशाचिके"ति ?

(*परिवृत्यालोक्य*)

सखे ! केयमावामतिनिष्ठुरं निर्भर्त्सयन्तीत: समापतति पलिक्नी ? पश्य पश्य,

बलिभसकलदेहा सृक्कनिष्ठ्यूतवीटी
रसपरिचयशोणस्यन्दिनी शारगल्ला ।
पलितधवलशीर्णै: कुन्तलै: कीणवक्त्रा
मलिनवसननीवी क्लृप्तताम्बूलभस्त्रा ।।१४५।।

शृंगारवल्लि ! किं ब्रवीषि, "अयि ! किमेनां न जानासि मामकजननीमर्थतृष्णामि"ति ?

मन्दारशेखर ! किं ब्रवीषि, "सखे कन्दर्पविलास !

माता स्थिता चेत्पलिताङ्गयष्टि-
र्वेश्याजनानां भवनाङ्गणेषु ।

---

१. ख °मिन्यस्ततस्ता ।
२. ख विरोधिनी ।

सा मृत्युरूपा हि महाविटानां
श्रीचन्दनाद्रावुरगीव जाता ॥१४६॥

इति वदन्ति मदनतन्त्रविदः। अतोऽस्या वेश्यामातुः समीपे न स्थातव्यम्। एहि गच्छाव" इति? सोद्वेगं सखे! त्वमितः[1] क्व गन्तुमुत्सहसे? सन्निहितैव सेयं वृकमुखी पलिक्नी!

अर्थतृष्णे! मन्दारशेखरं प्रति सक्रोधं किं ब्रवीषि "अरे मम दुहितुः समुचितं धनमदत्वा क्वेदानीं गन्तुमिच्छसो[2]"ति? मन्दारशेखर, किं ब्रवीषि, "वृद्धे विवेकगन्धविधुरे!

नास्वादितोऽधररसो दुहितुस्तवास्या
नालिङ्गितः कुचभरोऽपि न लब्धमन्यत्।
किं याचसे सपदि मां वसु भूरि भूयः
किन्त्वस्ति मय्युपनिधिः कथय त्वदीयः" ॥१४७॥ इति?

पुनरेषा किं ब्रूते? "अरे बालिशाधम! किं न जानासि?

वीक्षणभाषणकुचभर-
परिरम्भणमो(मे?)हनेषु मे दुहितुः।
पंक्त्याहतपंक्तिशती
दीनाराणां क्रमात्पणः क्लृप्तः ॥१४८॥

अतः सम्भाषणोचितं प्रयच्छ मे दुहितुर्द्रव्यमि"ति?

(सावधीरणम्)

---

१. ख °मिदानीं°।
२. ख °मुत्सहसे।

धिग्वयो रूपञ्च जीनजननीपिशाचिकावेशवशंवदानां रूपाजीवराजीवदृशाम् । यदेताभिः,

स्थेयं कृच्छ्रमुदग्रयौवनभरेऽप्यादानशौण्डागमं
दुष्प्रापेष्टजनोपगूहनरसे धिग्ब्रह्मचर्यव्रते ।
सम्प्राप्यो विरसोऽपि भूरिविभवो लब्धो[1] न चेत्तादृशः
कान्तं काननकौमुदीसमदशं नेयं मुधा यौवनम् ॥१४९॥

मन्दारशेखर ! किं ब्रवीषि,

"तद् वरं कुलकामिन्यो मतो वाऽप्यमतोऽथवा ।
यासामभिमते काले प्रत्यासन्नः पतिः सखे" ॥१५०॥ इति ?

अर्थतृष्णे ! सभ्रूभङ्गं संकुचिताधरोष्ठं च कराञ्चलकृतचिबुकानोदना मन्दारशेखरं प्रति किं ब्रवीषि, "अरे रे पराङ्गनाविहारदास ! दासीपुत्र ! रङ्काधमधूर्त्त ! विटहतक ! अलमलं बहुभाषितैः । यच्छ[2] द्रविणं यदीच्छसि जीवितुमि"ति ? मन्दारशेखर ! सक्रोधहुङ्कारं किं ब्रवीषि "शृणु, वराकि ! वराङ्गाजीवे ! शृंगारवल्लीप्रणयानुरोधेन क्षन्तव्योऽयं तवापराधः । यदीतः परं कटु ब्रूयास्तदा त्वां नियतमेव गन्धानुभूतिविधुरां विधास्यति मन्दाशेखरः । गच्छेतो जोषमि"ति ? सखे ! कुतोद्यापि शृंगारवल्ल्याः प्रणयानुरोधः कठोर[3]हृदयायाः ? शृंगारवल्लि ! सविषादवैलक्ष्यं किं ब्रवीषि, "अयि सरसहृदय ! कथमहं कठोरहृदये"ति ? अयि ! कुटिलहृदये ! कथय जीनजननीकपटविकटाच्छभल्लाङ्गनागले मन्दारशेखरमावध्य स्वच्छन्दमात्मान विनोदयन्ती न कथं भवती कठोरहृदया ? अपि च—

---

१. ख प्राप्तो ।
२. ख यच्छ मे ।
३. क कठिन° ।

अपि मृदितमृणालीपेशलेष्वङ्गकेषु
स्फुरति हृदयजन्मा कर्कशो यत्कुचस्ते ।
हृदयमतिकठोरं तेन मन्ये त्वदीयं
फलगुणबलमेयो हेतुनिष्ठो गुणो हि ॥१५१॥

अर्थतृष्णे ! मां प्रति किं ब्रवीषि ? "अरे रे त्वमपि वितर दुहितुर्मे परिरम्भसम्भावितं द्रव्यमि"ति ? अयि जरतिके ! नात्रानुभूतो दुहितुस्ते परिरम्भः । कं त्वं याचयसे द्रविणं च ? सक्रोधं किं ब्रवीषि "अरे रे प्रतारक ! स्वकृतमेव दुहितुर्मे परिरम्भमपलपसि ? कृतं प्रतारणया, प्रयच्छ मे द्रविणमि"ति ? अये[1] केनोक्तं ते मयेयमालिङ्गिता तन्वङ्गीति मिथ्यावादिना ? किं ब्रवीषि, "अरे मूढान्यकृतमुपदेशमपेक्षेत तदा खलु इयमर्थतृष्णा यदि पुनः स्वतोऽवगन्तुमकुशला ! अलमलं विलम्बेन प्रयच्छ मे द्रविणमि"ति ?

(*ससान्त्ववादम्*)

अयि सत्यमियं मया न समालिङ्गिता[2], सोत्प्रासं किं ब्रवीषि "कथमन्यथावगतं मे दुहितु[3]र्भवता कुचकार्कश्यमि"ति ? मन्दारशेखर ! सरोषं किं ब्रवीषि, "अयि दुर्भगे ! अलमसंगतप्रलापेनापसर परस्तादिति"ति ? अर्थतृष्णे ! किं ब्रवीषि "भवतु रे हताशाहं दुर्भगैव, शोभनोऽस्तु भगस्तवैव जनन्या यतस्त्वमेवंविधोऽसि निर्गलित" इति ? मन्दारशेखर ! किं ब्रवीषि, "सखे ! किमेनां ब्रवीम्यनर्थज्ञामि"ति ? अर्थतृष्णे ! किं ब्रवीषि, "अरे वराक ! किं मामदृष्टधनां मन्यसे ? शृणु मया—

तारुण्यदशावस्थितया—

---

१. *ख* आर्य ।

२. *ख* ···ता॰ तन्वंगी ।

३. *ख* एतस्या ।

संपादितं बहुधनं वदान्यधनिसेवया ।
निष्काषिताः पादघातैस्त्वादृशा रङ्कपल्लवाः ॥१५२॥

अद्यापि तदेव भुज्यते। वराकीभिरेताभिर्न समार्जितं वराटकशकलमपी"ति ?

शृङ्गारवल्लि ! किं ब्रवीषि, "विरम मातः ! किमेतेन गृहागतरसिकजनहृदयोद्वेजनेन, गच्छ गच्छ गृहाभ्यन्तरमि"ति ? अर्थतृष्णे ! सक्रोधं[२] दन्तैर्दन्तान्निष्पीड्य करमुदञ्चयन्ती किं ब्रवीषि "अयि कुलधर्मपरित्यागपातकिनि ! वृषस्यन्ति ! जोषं तिष्ठ, न चेद्दास्यामि ते कपोलचपेटिकाम् ।

कार्या प्रे[१]मविडम्बना प्रथमतो नानाविधैर्विभ्रमै-
र्व्यक्तिं नेयमथ क्रमेण हृदयाकूतं विलक्षस्मितैः ।
यात्राद्युत्सवकैतवेन कमनाद्यद्यद्विलग्नं करे
तत्तद्ग्राह्यमशेषतो वसु पुनर्यावत्स निःस्वो भवेत् ॥१५३॥

एवं कुर्वाणाः सुखमविरतं भुञ्जते वारस्त्रियः । त्वं पुनरनीदृशी चलिते वयसि किमिह मृत्कर्पराङ्का भिक्षामटसी"ति ? शृङ्गारवल्लि ! सक्रोधभर्त्सनं किं ब्रवीषि, शृणु, जरामुषितविवेके मातः[३] !

मृगदंशकवद्दृष्टे विलासिनि गृहागते ।
प्रभूतधनलाभस्ते भवतीत्यस्ति निश्चयः" ॥१५४॥ इति ?

मन्दारशेखर ! किं ब्रवीषि "अर्थतृष्णे ! लब्धेऽपि धने कस्ते लाभो जरद्गणिकायाः ।

---

१. ख °सरस° ।

२. ख नास्ति ।

३. ख पंक्तिरेव नास्ति ।

वासो हन्त धृतोज्झितं युवतिभिः फेलाऽथवा भिःसटा
भोज्याङ्गं परिकर्म गन्ध[1]विधुरं शय्या परं रल्लकः ।
भूषा रीतिविनिर्मिता न समये स्वापः श्ववृत्त्याश्रया-
त्किं तृष्णावशमेत्य ताम्यसि मुधा भोगाय नाथंस्तव'' ।।१५५।।इति ?

सखे मन्दारशेखर ! एहि गच्छावो मात्रा सह। स्वैरमियं रमतां शृङ्गारवल्ली। शृङ्गारवल्लि ! सविषादवैलक्ष्यं किं ब्रवीषि[2] "अयि सरसहृदय ! मातृसनाथं वेश्याजनं कामपरतन्त्रं विजानन्नपि किमर्थमेवं क्रुध्यति भवान् मह्यमि''ति ?

(*सहर्षस्मितम्*)

सुन्दरि ! नासत्यं त्वं कामपरतन्त्रेति ।

ध्रुवं शस्त्र्यायत्तं जगति सकलं शस्त्रमबले
स्त्रियाः कामास्त्रत्वात्तव तु तदधीनत्वमुचितम् ।

इदं तु परमाश्चर्य[3]मस्त्रीभूतायां त्वयि,

असंलग्ना देहे जनयसि परेषामनुशयं
विलग्ना त्वानन्दं निरवधि किमन्तः कलयसि ।।१५६।।

अथवा, काममेव मन्ये त्वत्परतन्त्रम्, तथाहि—

---

१. क °गन्धि° ।

२. क नास्ति ।

३. ख परमेकमाश्चर्यं° ।

वदनरदनवासोहासपाण्यक्षिलीला-
हृतनिजशरसारः पञ्च[1]बाणो भवत्या ।
अपि भटतुरगांस्ते किङ्करीकृत्य वाचां
चरति पुनरदृश्यस्त्वद्वलग्नानुकारी ॥१५७॥

तिष्ठ[2], पश्चादागमिष्यावः ।

(अग्रतो गत्वा विलोक्य)

वयस्य ! मदनमञ्जुलासदनमिदम् । क्षणमात्रमत्र विश्रम्य गच्छावः ।

(इति नाट्येन प्रविश्य वामतोऽवलोक्य)

कनकासने निषण्णा पश्यन्ती मुखसरोजमादर्शे ।
अलिके कनकनिभाङ्गी मृगमदपङ्केन तिलकमातनुते ॥१५८॥

(पश्चान्निभृतमुपसृत्य)

अयि मदनमञ्जुले ! कुशलमस्तु ते तिलककल्पनावैदग्ध्यस्य ।

(ससंभ्रमं मुखमपवर्त्य[3])

किं ब्रवीषि, "सखे ! चोर इव समेत्य[4] किं मां[5] प्रतारयसी"ति ?

(सस्मितम्)

सुतनु ! को विशेषश्चोराज्जारस्य—

---

१. ख पुष्प° ।
२. ख भवतु तिष्ठ ।
३. ख विलोक्य ।
४. ख °वंशमेत्य ।
५. ख मामेव° ।

यस्मिन् जाग्रति निर्भयैव जनता सत्रासहेतुर्नृपो
यः कालस्त्वकुतोभयस्तनुभृतां सोऽयं महाभीषणः ।
यः पन्था जनसेवितः स भजते चोरस्य कान्तारतां

जारस्यापि

मन्दारशेखर ! किं ब्रवीषि, "सखे किमेवं ब्रवीषि,

"धनागमापगमयोर्भेदोऽपि[1] भूयांस्तयोः" ॥१५९॥ इति ?

(*क्षणमात्रं निर्वर्ण्य*)

ज्योत्स्नापानधृतव्रते द्विजगणे दत्वा वसूनां चयं
हुत्वा वह्निमुखे निजामपि तनुं भूयः परिक्रम्य गाम् ।
कृत्वा विष्णुपदावलम्बमपि यो हातुं न शक्यः प्रिये
सोऽयं त्वन्मुखतामुपेत्य शशिना मुक्तः कलङ्कोऽधुना ॥१६०॥

सत्यमयि ! समाश्रितं जनमाम्रेडितकलङ्कमातनोति योषाजनः । यतः,

"आदर्शदर्शितसमग्रकलासमृद्धौ
त्वद्वक्त्रचन्द्रमसि शोणसरोजपाणे ।
वैधेयदत्तशशभृत्तुलनाकलङ्केऽ-
प्यङ्कान्तरं कलयसे तिलकच्छलेन ॥१६१॥

मन्दारशेखर ! साकूतसस्मितं किं ब्रवीषि ?

"युक्तमेव खलु वारयोषितां
सन्ततेः सुमुखतामुपागते ।

---

१. ख °स्ति ।

व्याकिरद्वसुगणे कलानिधा-

वङ्कदानमपि पङ्कजानने" ॥१६२॥ इति ?

मदनमञ्जुले, किं ब्रवीषि, "मन्दारशेखर ! कृतं ते वक्रोक्तिकलनाचातुर्येण । मत्पर्यङ्कोऽयमलङ्क्रियतां युवाभ्यामासनपरिग्रहेण क्षण[२]मात्रं जिगामिषायाः परित्यागमङ्गीकृत्ये"ति ?

(सस्मितम्)

सत्यमसत्योदरि ! प्रणयोचितं त्वं व्याहरसि, परन्त्विदं नोपपद्यते ।

त्वत्पर्यंके परित्यागे त्वङ्क एवावशिष्यते ।

तत्रावयोः समावेशः कथं सुभ्रु ! भविष्यति ॥१६३॥

मन्दारशेखर ! किं ब्रवीषि, "सुन्दरि ! क्व गता ते सहोदरी ? नेह दृश्यते शृङ्गारनौके"ति ? मदनमञ्जुले, किं ब्रवीषि, "सा सपदि सपरिवारा स्वभागिनेय्या विनोदचन्द्रिकायाः प्रथमरङ्गाधिरोहमहोत्सवोचितशुभारम्भसम्भारकलनायां दत्तावधाना तत्रैवास्ते रङ्गशालायाम् । युवयोरामन्त्रणाय प्रेषितपूर्वया शृङ्गारनिकषया न दृष्टावप्यदृष्टविशेषान्मे भवन्तावत्रैवागतौ । तदिदानीं मदीयप्रार्थनाममोघीकृत्य युवाभ्यामप्यत्रोत्सवे सन्निहिताभ्यां भवितव्यमि"ति ? मन्दारशेखर ! किं ब्रवीषि, "सखे ! समुपस्थितस्ते सम्प्रति पूर्णपात्रव्यय" इति ? सुन्दरि[१] ! कतममुहूर्त्ते रङ्गावतारः ? किं ब्रवीषि, "मध्यन्दिनात्पश्चम" इति ? तर्हि पुनरागमिष्यावो गन्तुमिदानीमनुजानीही"ति ? किं ब्रवीषि, "अये, को नाम बहुवल्लभस्य यूनः पुनरागमे विश्वासः ! तदधिगलमर्प्यतां मे पुनरागमनलग्नकस्ते हस्त"इति ?

(सस्पृहमुरसि तस्याः करं दत्वा)

सुन्दरि ! न यदि पुनरावामागमिष्यावस्तर्हि शपावहे तव कठिनपीवर-

१. ख सुतनु ।

पयोधरतटघटितघुसृणरसपत्राङ्कुरेभ्यः। सप्रश्रयं किं ब्रवीषि, "त्वरितमागम्यतां प्रतिपाल्यते वां पदवी"ति ? तथास्तु, गच्छावः।

(*अग्रतो गत्वा निरूप्य*)

वयस्य ! पश्येतश्चन्द्रशालायाम्,

रणैर्मञ्जीराणां मदनगुणशिञ्जाकृतरणै-
र्दृशा कोशोदञ्चत्कुसुमशरनिस्त्रिंशसदृशा।
हरन्ती धैर्यं नो दिशि दिशि किरन्ती स्मितरुचं
भ्रमत्येषा योषाऽविकलकलदोषाकरमुखी ॥१६४॥

मन्दारशेखर ! किं ब्रवीषि, "अये ! आश्चर्यमेतत्,

अम्भोजद्वयमिन्दुमण्डलगतं फुल्लं दरीदृश्यते
शैवालं गगनान्तरालपदवीमालम्ब्य संशोभते।
नीचैरस्य सरोवरस्य पुलिनद्वन्द्वं परं राजते
चेतः कोऽपि हरत्यपूर्वविभवः सर्गोऽत्र पैतामहः ॥१६५॥ इति ?

सखे ! किमेनां त्वं न जानासि ? किं ब्रवीषि, "जानाम्येषा कान्तिमञ्जर्याः कनीयसी प्रसादकन्दली"ति ? (*साश्चर्यम्*) सखे ! किमेषा प्रसादकन्दली ?

अतीतायां शरद्यस्या वक्षो नीहित[1]संवृति।
नाद्यनिर्भरवक्षोजं[2] विजहात्यवगुण्ठनम् ॥१६६॥

तन्मन्ये, मदनेन्द्रजालकल्पितोऽस्याः कुचभार इति। किं ब्रवीषि, "एवमेतन्न सन्देहः,

---

१. क निस्थिति°।
२. क नाश्रानिर्भरवक्षोजा।

"सञ्चार्योपरिकेशहस्तकपटं बर्हं पुनर्बर्हिणं
वक्षः शून्यतरं निरूप्य तनुभावस्त्रेण संछाद्य च ।
किंचिद्वस्तु कुचाख्यमद्भुतरसं चक्रे स्मरो मायया

अथ तत्र --

दृष्ट्वा हारगणं भिया तदनु ते नोच्चाटनं विस्मृतम् ॥१६७॥

अत एव चास्य स्थिरत्वमुपपन्नमि"ति ?

(*परिवृत्यावलोक्य*)

अये ! नक्षत्रमालामलङ्करोति वामतः शृङ्गारशबला, यावदेनामुपसर्पावः ।

(*उपसृत्य*)

अयि शृंगारशबले, विफलस्त्वदीयोऽयमेतस्यामलंकारकल्पनायासः । यतः—

लीयन्तेऽधरसीम्नि विद्रुमरुचो हासेसु हीरप्रभा
दन्तेष्वम्बुजरागरम्यरुचयः केशेषु नीलत्विषः ।
मुक्ताच्छद्युतयः पुनर्भवचये गाङ्गेयभासोऽङ्गके
केनास्याः सुतनोर्नताङ्गि कतमा शोभाऽद्य संपाद्यते ॥१६८॥

प्रत्युत शशिनि विशेषकमग्निशिखोदारमद्य तन्वाना ।
शशिनमपि चक्रवाके कलयन्त्युपहास्यते भवती ॥१६९॥

अयि ! किमहमेनामालपयामि ? किं ब्रवीषि, "कयाऽत्र कृतः प्रतिषेध "इति ?

(*सहर्षमुपसृत्य*)

अयि नक्षत्रमाले !

त्वदधरमवरीणपुण्ड्रसारं
सपदि समर्पय मह्यमातिथेयम् ।
रदमुखदलितेन येन बाले
शिथिलधनुः स भवेद् रसालधन्वा ॥१७०॥

मन्दारशेखर ! सभ्रूभङ्गं किं ब्रवीषि, "विरम सखे ! कृतमनया नर्मालापप्रसंगेन शाठ्यशीलया, या पुनर्जल्पति भवादृशेऽपि मौनमेवावलम्बते" इति ? शृंगारशबले ! सप्रश्रयं किं ब्रवीषि, "अयि सरसहृदय ! मा कुरु कोपपात्रं सर्वथा विधेयमिमं जनम् । मदायत्तेयं पुरो मे न भाषते पुरुष[1]जनैः "इति ? मन्दारशेखर ! किं ब्रवीषि, "किं बीजमस्या मदपारवश्य"इति ? शृणु सखे ! कुतः करकङ्कणनिरीक्षणे दर्पणपेक्षा ! अस्याः—

विधुं वक्त्रोन्मेषो विहसति गिरीशं कुचभरो
जयत्यक्षिद्वन्द्वं कमलभवगर्हां कलयति ।
यतः[2] सेयं तन्वी मदपरवशा संप्रति सखे
जगज्जालं सर्वं तृणमिव मनस्याकलयते ॥१७१॥

शृंगारशबले ! किं ब्रवीषि, "अयि विलासिनौ ! मदधीनेयमिति मयोक्तं युवाभ्यामन्यथाऽवगम्यत"इति ?

अस्तु, नतभ्रु ! तदेतदुभयमपि समञ्जसम् ।

(श्रुतिमभिनीय)

---

१. ख विलासि° ।

२. क ख अतः ।

कोऽयमुपवनसञ्जवने कलकलः ? किं ब्रवीषि, "मित्रनन्दासुन्दरकयोरक्ष-क्रीडा प्रभवति"[इति ?]

(*सौत्सुक्यम्*)

तर्हि तत्रैव गच्छावः। (*गत्वा विलोक्य सानन्दम्*), सखे ! पश्य,

पाशक्षेपणवेल्लितस्तनतटीदत्तेक्षणः सस्पृहं
शारिन्यासविपर्ययेण सरुषा[1] सन्ताड्यमानस्तया।
शश्वद्देवनबिन्दुवृन्दगणनामोक्षग्रहेषु स्खलन्
सोयं सुन्दरकः सखाऽद्य कुतुकादक्षैरितो दीव्यति ॥१७२॥

(*समीपमुपसृत्य*)

विजयतामक्षक्रीडाभिनिवेशोऽयमलक्षितमित्रस्य मित्रस्य मे सुन्दरकस्य।

(*ससम्भ्रमम्, परिवृत्यावलोक्य*)

किं ब्रवीषि, "एहि सखे ! त्वदनुप्लवो वाऽहमसकृद्विजितः सकृद्वा जेष्यामि मित्रनन्दामि"ति ? सखे ! सर्वथैव विफला ते विजयाशा तन्वंग्याः। यतः,

नेत्रे ते वशिते[2] मुखेन सुदृशः श्रोत्रे प्रियैर्भाषितै-
र्जिह्वा बिम्बफलाधरेण हृदयं वक्षोजयुग्मेन च।
अङ्गानामथ सौरभेण[3] महता घ्राणं त्वगालिङ्गनै-
रित्थं हारितचेतनाक्षनिवहः किं दारवैर्जेष्यसि ? ॥१७३॥

---

१. ख सहसा।

२. क निशिते।

३. मू० प्रति–सौभरेण।

मन्दारशेखर ! किं ब्रवीषि, "कथय सखे सुन्दरक, कीदृशोऽत्र पणबन्ध" इति ? सुन्दरक, किं ब्रवीषि, "श्रूयतां कथयामि (*इत्यर्धोक्ते*) मित्रनन्दे ! सुन्दरकं प्रति ससंभ्रमं किं ब्रवीषि, "भवतु, तदेतत् पश्चाद् वक्ष्यसि दीयतामितो दृष्टिः परिणाय"इति ? मन्दारशेखर ! किं ब्रवीषि, "सुन्दरक, किमेवमसमग्रमुक्त्वा विरमसी"ति ? सखे किमत्र कुर्यात्सुन्दरकः ?

निषेधमाज्ञापयति प्रियेयं वक्तुं ग्लहं त्वं त्वरयस्यतीव ।
हंसद्वयेनेव विकृष्यमाणो बिसाङ्कुरोऽयं विकलस्तदास्ते ।।१७४।।

(*मित्रनन्दायाः सपाशङ्कं हस्तं गृहीत्वा*)

सखि त्वं वा कथयात्र पणबन्धं वक्तुमाज्ञापय वा सुन्दरकम् । सस्मितं किं ब्रवीषि, "कया निरुद्धं पणबन्धकथने मुखमेतस्ये"ति ? सखे सुन्दरक ! कथयेतो निःशङ्कं पणबन्धं दत्तनिदेशनोऽसि प्रेयस्या । किं ब्रवीषि, "शृणु सखे ! मत्पराजये क्लृप्तं[1]पणयुग्मं न पुनरस्याः पराजये पणनियम"इति ? (*सहर्षौत्सुक्यम्*) कथय, सखे कीदृशं तत्पणयुग्मम् ? किं ब्रवीषि, "प्रथमोऽस्याः कठिनकुचाभ्यामात्मनो हृदयास्कन्दनम्, द्वितीयस्तु अलं वित्तबन्धकलनयैतस्याश्चित्तरञ्जनमि"ति ? (*सश्लाघम्*[2]) सखे ! तर्हि जयादपि परा[3]जय एव गरीयान् ।

वित्तैश्चित्तविनोदनैर्बहुविधस्रक्चन्दनाद्यर्पणै-
र्यो यूनां युवतिस्वयंग्रहपरिष्वङ्गः स्वतो दुर्लभः ।
सोऽयं चेद् घटते घन[4]स्तनतटीसङ्घट्टितोरःस्थलः
सम्प्रत्यङ्गपराजयेन विजयायास्तु प्रणामाञ्जलिः ।।१७५।।

१. ख परिक्लृप्तं ।
२. क नास्ति ।
३. ख भवतः परा° ।
४. क °घट° ।

मन्दारशेखर ! किं ब्रवीषि, "सखे ! द्वितीयस्तु पणो न समञ्जसः ।

तिष्ठन् पाणिसमुद्धृतातिविततश्रोणीभरः सुभ्रुवा
हस्ताम्भोजयुगेन पीनकुचया कण्ठे समालम्बितः[1] ।
चुम्बन् वक्त्रमुपैति मोहनसुखं धन्यस्तदास्तामिदं
तन्वङ्ग्या विजितेन साहसरसः केनायमालम्ब्यताम्" ।।१७६।।इति?

एहि सखे गच्छावः । मित्रनन्दे, किं ब्रवीषि, "युवाभ्यामपि क्षणमात्रमत्र विधीयतामक्षक्रीडाविनोद"इति ?

सुतनु ! न रोचते मह्यमक्षक्रीडा । किं ब्रवीषि, "अयि रोचते[2] चतुरङ्ग-क्रीडे"ति ?

(*साकूतस्मितम्*)

सुतनु ! कुतोऽस्माकमनङ्गक्रीडैकरसानां[3] चतुरङ्गक्रीडारतिः ? मित्र-नन्दे[4] सस्मितं[5] किं ब्रवीषि, "अयि ! रसिक ! कथं न जानासि साऽपि चतु-रङ्गालम्बनैवे"ति ?

(*सहर्षौत्सुक्यम्*)

अयि, कथय[6] पृथुकुचे कीदृशं तच्चतुरङ्गं यदेतदालम्बनमनङ्गक्रीडायाः । समन्दस्मितं किं ब्रवीषि, "किमस्ति तेनाभिज्ञातं तथापि कथयामि—

---

१. क °लिङ्गितः° ।
२. ख °चते ते च° ।
३. क °सक्तानां ।
४. ख सुन्दरि° ।
५. ख समन्दस्मितम् ।
६. ख नास्ति ।

अधरदलं कुचभारो जघनं चालम्बनानि खलु तस्याः ।''इति ?

मन्दारशेखर ! किं ब्रवीषि, सुतनु, चतुर्थमनुक्त्वा किमेतावता विरमसी''ति ? सखे किं न जानासि ?

अनया तत्क्षणलज्जानतमुख्या कथितमेव तत्तुर्यम् ॥१७७॥

मित्रनन्दे, विजयस्व[1], चिरं सुन्दरक ! स्वैरं रमस्व प्रेयस्या[2] । वयमावामितोऽन्यत्र गच्छावः ।

(*रथ्यान्तरं प्रविश्य, ऊर्ध्वं विलोक्य*)

अये, सम्प्रत्यासन्न इव प्रतिभाति मध्यन्दिनसमयः । तथाहि—

स्वे स्वे कर्मणि सन्नियोज्य सुहृदो भूमीसुरान्मन्त्रिण-
श्चक्रं निर्भयमारचय्य भगवान् सम्प्राप्तरागोदयः ।
स्वालोकक्षणकान्दिशीकमधुनोत्खातुं विचिन्वन्निव
ध्वान्तं क्वापि निलीनमम्बरमणिर्व्योमाग्रमारोहति ॥१७८॥

इदानीम्—

स्कन्धान् सिन्धुरयूथगण्डकषणव्यासक्तदानोदकान्
सेवन्ते मधुपा महीरुहशिरःपुष्पाणि हित्वा भृशम् ।
लीयन्ते वलभीकुलायकुहरे निष्पन्दमेते खगा
जिह्वालीढवधूमुखो मृगगणश्छायासु विश्राम्यति ॥१७९॥

मन्दारशेखर ! किं ब्रवीषि,

---

१. क कथयस्व ।

२. क नास्ति ।

"स्थाने दूरगते रवौ यदभजन्मूर्च्छेति पाथोजिनीं
कामं प्रोषितवल्लभां कलयते कान्तां यतो दुःस्थता[1]।
तस्मिन्नेत्रपथातिथावपि कुतो धत्ते परिम्लानताम् ॥" इति ?

सखे किमत्र प्रष्टव्यम्,

प्रस्थानादधिकं प्रियस्य दयितां[2] क्लिश्नाति नीरागता ॥१८०॥

तदेहि, कुसुमाकरविश्रामारामममुपेत्य आतपमपनेष्यावः ।

(*अग्रतो गत्वा, विलोक्य*)

काऽसौ ?

"ग्रन्थ्युन्नेयकुचस्थिति तनुतरं कूर्पासकं बिभ्रती
कण्ठालम्बिसमुद्गकेन कनता(?)संघट्टितोरःस्थला ।
व्यालोलालकजालमृष्टभसितोदारालिका बालिका
मन्दं मन्दमुपैति कुन्दरदनोद्योतालिपीताधरा ॥१८१॥

अस्याः,

सम्पातादलिनां मरुत्परिभवात् त्रातुं मुखाम्भोरुहं
नासागन्धफलीं प्रवेणिभुजगीं कुर्वन् कुरङ्गीदृशः ।
घ्राणं गन्धवहं कचान् भ्रमरकान् चक्रे कुतः पद्मभूः
कृत्याकृत्यविवेकगन्धविमुखी धिक् श्रोत्रियाणां मतिः ॥१८२॥

पश्यैतदन्यदप्यनुचितं विश्वसृजः,

१. क °स्थिता ।
२. क ख नितरां ।

अभिनवनवमालिकाप्रसूना-
न्मृदु विरचय्य वपुः सरोरुहाक्ष्याः ।
अकुरुत यदसौ धरानुकारि
स्तनयुगलं युगलं नितम्बयोश्च ॥१८३॥

किं ब्रवीषि, "सखे ! न खल्वनुपयुक्तार्थसंस्पर्शी विधिसर्गः !

लावण्यामृतमाहितं वरतनोरङ्गे स्थितं यत्पुरा
तत्तारुण्यघनोदयेन बहुधा संवर्धितं पद्मभूः ।
वीक्ष्य स्पन्दनशङ्कितः कुचयुग[1]व्याजान्नितम्बच्छलात्[2]
चक्रे सेतुयुगं न चेदिह कुतस्तादृग्रसस्थास्नुता" ॥१८४॥ इति ?

(*परिवृत्यावलोक्य*)

इतस्तावदापतन्तीं भुजङ्गपेटीं पृच्छामि। इयं खलु सकलनगर[3]विलासिभिः सम्भूयाभिषिक्ता कुट्टीनीत्वसाम्राज्ये। अतोऽस्याः करतलगतः सकलनगरनारी[4]वृत्तान्तः ।

एहि भुजङ्गपेटिके ! अथ[5] काऽसौ मत्तकाशिनी ? किं ब्रवीषि, "अस्ति खलु गणभक्तिनामा कापालिकलिङ्गधारी महाधनिकः । तस्येयं नन्दिनी वीरश्रेष्ठिककनिष्ठतनयस्य[6] निर्वाणनाम्नः कलत्रं शिवभक्तिमञ्जरीनामे"ति ? क्वे-

---

१. क भर° ।
२. क °स्थली ।
३. मूले-°नगर° नास्ति ।
४. क °नागरी° ।
५. ख कथय ।
६. क °पुत्रस्य ।

दानीं प्रस्थिता घनातपे घनकेशी ? किं ब्रवीषि, "उपशल्यकोविदारवने भगवतः पुरशासनस्य सपर्यां निर्वर्त्तयितुमि"ति ? कः पुनरस्याः फलोद्देशः ? किं ब्रवीषि, "आत्मनि पत्युः प्रातिकूल्यनिरास"इति ?

(*साश्चर्यम्*[1])

किमस्यामपि भुवनमोहनदीपिकायां पतिहतकः प्रतिकूलः ? अथवा नियतिलब्धान्यपि निक्षेप[2]धनानि लोष्टवदवभासन्ते दुर्भगाणाम् । मन्दारशेखर ! किं ब्रवीषि, "कस्य हेतोः पतिरस्याः प्रतिकूल" इति ?

भुजङ्गपेटिके किं ब्रवीषि, "बीभत्सगुणनिकायामनिवार्यानुरक्तेरि"ति ? अयि कासौ बीभत्सगुणनिका नाम ? किं ब्रवीषि, "किं तां न जानासि, मदनविलासमञ्जर्या बहिरङ्गचेटी[3]मि"ति ?

(*स्मृतिमभिनीय*)

अये, ईदृशेऽपि जयति कलत्ररत्ने,

बन्धानर्हविकीर्णकम्पितकचप्रोद्धूतचिल्लेक्षण-
प्रोदञ्चन्मशकावलीपरिवृतं वक्त्रं सदा बिभ्रतीम् ।
लिक्षालक्षपरीतलोमशवपुःकण्डूयनव्याकुलां
वर्षादर्शनिशानिभां स चकमे धिक् तां कथं दुर्मतिः ।।१८५।।

मन्दारशेखर ! किं ब्रवीषि "स्थाने खलु चक्रीवतः कुसुमराशिमनादृत्यावकरकूटभस्मन्युपावर्त्तनमि"ति ?

(*आकाशे लक्ष्यं बध्वा*)

---

१. ख नास्ति ।
२. क नास्ति ।
३. क चेटिका° ।

पद्मद्वन्द्वविलोचना समकरा शङ्खोल्लसत्कन्धरा
नीलोदारकचोरुकच्छपलसत्पादाग्रसंशोभिता ।
कुम्भोद्भासिरदा मुकुन्दतनुजश्रीः खर्वत्क्षोरुह-
द्वन्द्वाग्राप्यमनुष्यधर्मणि विधे सैषा कथं रेऽर्पिता ॥१८६॥

मन्दारशेखर ! किं ब्रवीषि, "सखे ! एवमसमानरूपशीलदाम्पत्यघटनया किं फलमाप्नोति विरिञ्चिरि"ति ? अयि किं कथयामि,

आमोदमेदुरगलन्मकरन्दधारा-
सन्तर्पितभ्रमरराजकुटुम्बकानि ।
माल्यानि फुल्लतृणशून्यमयानि कैशे
कण्ठेऽर्पयन्त्यदुपयाति तदेव सोऽपि ॥१८७॥

अथवा तिष्ठत्वयमेवंविधशील एव पद्मभवः ! किन्तु,

घ्राणाह्लादभृता शरेण रसनासंतर्पणेष्वासना-
न्निष्ठ्यूतेन[1] मनोनुकूलदयितैर्योषिज्जनं योजयन् ।
शृङ्गारेऽधिकृतो विरिञ्चिहतकेनोपेक्षितां सुन्दरी-
मेनां कामितकामनैर्घटयितुं कामः कथं नेच्छति ॥१८८॥

(अनङ्गमुद्दिश्य)

अयि मकरकेतो ! त्वं पुनरतनुरसि । किमेवमतनुकुचायाः साम्प्रतं ते समुपेक्षा ? अथवा किमस्यां शैवाङ्गनेति प्रथयसि विद्वेषम् ? धिक् तर्हि जाल्मोऽसि ! अस्याः,

---

१. ख निर्यतेन ।

चक्षुस्तावककेतनं कचभरो मौर्वी वचः कार्मुकं
वक्त्रं ते सततं जगज्जयविधौ साहाय्यकृन्मातुलः ।
पाण्योष्ठं भटवाहजीवनमिदं गात्रं तु जैत्रायुधं
पञ्चेषो निजवैभवास्पदमिति ज्ञाता न किं सुन्दरी ॥१८९॥

(*विमृश्य*[1])

कुसुमायुध ! विज्ञातस्ते हृदयसारः ।

जलजदलदृशोऽस्या रूपशोभाजिताया
अयि निजदयितायाः क्लिष्टचित्तानुरोधात्[2] ।
कलयसि समुपेक्षां राज्यलक्ष्म्यां तवास्यां
नहि खलु कुसुमास्त्र स्त्रीजितानां विवेकः ॥१९०॥

मन्दारशेखर ! सोत्कण्ठं किं ब्रवीषि, "अयि भुजङ्गपेटि ! तर्हि किमेषा निरन्तरमेवमवसीदति बन्ध्ययौवनश्रीरि"ति ? भुजङ्गपेटि ! कराभ्यां कर्णौ पिधाय किं ब्रवीषि "शिव शिवायमश्रव्य एव प्राणति वां प्रियमित्रे कुमुदाङ्गदे बन्ध्य-यौवनश्रीरियमित्यश्लीलवादः" इति ?

(*सहर्षौत्सुक्यम्*)

कथमियं रसितरसा प्रियसुहृदा कुमुदाङ्गदेन ? किं ब्रवीषि, "अथ किमि"ति ? कथय तर्हि कथमनयोर्घटनाप्रकारः ? किं ब्रवीषि, "स्वस्वामिन्याः कुरुविन्दप्रभायाः कार्यवशाद्[2] गच्छन्त्या मे क्षणमात्रमपि स्थातुमत्र नास्त्यव-काशः । तस्मादहं गच्छामि, मुहूर्त्तमात्रमत्रास्यतां युवाभ्यां रथ्यापिचुमन्दमूले ।

---

१. ख क्षणं विमृश्य ।

२. ख °र्यानुरोधाद् ।

समागच्छत्यनेन पथा कुमुदाङ्गदः । स एव सर्वं कथयेदि''ति ? गच्छ, तर्हि क्षणमात्रमत्र[1] स्थित्वा तस्यैव पदवीं प्रतिपालयावः ।

(*वामतोऽवलोक्य सहर्षम्*)

अंशभ्रष्टतनूत्तरीयवसनव्यामृष्टरथ्यापथः
स्रस्तं पार्ष्णिविलग्नमप्यकलयन्नुष्णीषपट्टाञ्चलम् ।
घर्मक्षालितगन्धसारतिलकः पादस्खलत्पादुका-
संरुद्धाशुगतिः पदे पद इतः सोऽयं समाच्छति ।।१८१।।

भवत्वेनं[2] समुपसर्पावः ।

(*उपसृत्य*)

क्व गच्छतीदानीमलक्षितमित्रजनः कुमुदाङ्गदः ?

कुमुदाङ्गद ! परिवृत्यावलोक्य किं ब्रवीषि, ''कथं प्रियमित्रे मे कंदर्पविलासमन्दारशेखरौ ! अयि चिरसमाराधितसिद्धोपदिष्टामतनुतापापनोदिनीं कामपि सिद्धमूलिकामन्वेष्टुं सरभसमुपसर्पता मया सपदि न लक्षितयोर्युवयोः समुचितमेवाभिपतति मय्युपालम्भ'' इति ? भवतु कुत्र तस्याः सिद्धमूलिकायाः स्थितिसम्भावना ? किं ब्रवीषि, ''कोविदारवन'' इति ? मन्दारशेखर ! किं ब्रवीषि, ''किन्नामधेया सा मूलिके''ति ? *(सस्मितम्)* सखे[3] ! भवेदसौ शिवभक्तिमञ्जरी नाम । तामन्तरेण का पुनरतनुतापापनोदिनी कुमुदाङ्गदस्य । कुमुदाङ्गद ! साश्चर्यमिव किं ब्रवीषि, ''सखे ! किं त्वया लब्धमलौकिकं चक्षुः, येन[4] ममाचरितमीदृशमतिनिगूढमप्यपरोक्षमिव जानासी''ति ? सखे !

---

१. ख °मावामत्र ।
२. ख यावदेनं ।
३. क नास्ति ।
४. ख येनेदं° ।

किमत्रालौकिकचक्षुषा ? न खलु मृगमदसौरभोपलब्धिर्दीपालोकमपेक्षते । कथय कथं सा भवता कथमासादिता ? किं ब्रवीषि, "पुरैकदा कोविदारवनस्थिते मयि सुस्तनी सा विविधपूजोपहारहस्ता शङ्करायतने[1] प्रविष्टा। अथाहम[2]पि तादृशदर्शनीयरूपदर्शनलालसतया तत्रैव प्राविशम् । सा तदानीं निःशलाके मामालोक्य सलज्जमिव शिरस्युपनीतसिचयाञ्चला कथमपि कपर्दिनः पूजां निर्वर्त्य,

कामं पूरय कामारे ममेति स्मेरभाषिणी ।
विजहौ स्विन्नमुत्कम्पमन्तरा कुसुमाञ्जलिम् ॥१६२॥

ततश्च मया—

नाममात्रेण कामारिस्त्वमीशान न कर्मणा ।
आत्मानं भजतां चित्ते कामं कलयसे यतः ॥१६३॥

इति कृतः प्रणामः । ततः,

व्यवस्यन्त्यां तस्यां सदनगमने सम्प्रति मया
प्रसूनेषोश्चापच्युतविशिखनिर्भिन्नमनसा ।
गृहीतं हस्ताभ्यां द्वयमपि महासाहसवशा-
दसूभ्यो नैवापं जलमथ कुचः पक्ष्मलदृशः" ॥१६४॥ इति ?

अहो निस्त्रिंशधाराताण्डवं कुमुदाङ्गदस्य, यः पुनरज्ञातभावां कुचे जग्राह परतरुणीम् ! मन्दारशेखर ! किं ब्रवीषि, "अहं मन्ये स्वनिरीक्षणक्षणजनितैस्तथाविधसात्त्विकभावैर्विज्ञात एव तस्याः कुमुदाङ्गदेन भाव" इति ? सखे ! मैवं[3]—

---

१. ख °लये ।
२. ख तदानी° ।
३. ख न खल्वेव° ।

पश्यन्ति स्निग्धमुग्धं प्रतिकलमधुरैर्मोहयन्त्यङ्गहारैः
साकूतैर्मन्दहासैरपि परपुरुषान् शश्वदानन्दयन्ति ।
चेष्टन्ते चेत एते किमपि परिचयाद्धारयिष्यन्ति[1] तेषां
प्राणान् को वेद लोके परजलजदृशां चित्तमत्यन्तलोलम् ।।१६५।।

कुमुदाङ्गद ! किं ब्रवीषि, "सखे ! सत्यमिदं तथापि, कुसुमशरवीर-पराक्रमप्रापितपारवश्यानां कुतोऽस्माकं विमृश्यकारिते"ति ? मन्दारशेखर ! किं ब्रवीषि,

"समाधुर्यश्चापो मृदुलमृदुलो मार्गणगणो
रणे कर्णाभ्यर्णं प्रविशति परं बिभ्यति भटाः ।
सदा रत्यासक्तः स्वयमसमबाणोऽङ्गविकल-
स्तथाप्येतत्सर्वं जयति जगदित्यद्भुतमिदम्" ।।१६६।। इति ?

अत एव व्याहरन्ति—

'क्रियासिद्धिः सत्त्वे[2] वसति महतां नोपकरणे'

इत्यभियुक्ताः । कुमुदाङ्गद ! ततस्ततः ! किं ब्रवीषि "ततः—

गाढालिङ्गनमज्जदुन्नतकुचां तां कर्त्तुमुत्कण्ठया
यावत्सन्निहितोऽस्मि पक्ष्मलदृशः साकूतहासेक्षणः ।
तावद्वक्षसि मे निपत्य रभसादाघ्राय गण्डस्थलं
तन्वङ्ग्याऽथ तयैव कूणितदृशा पीतो मदीयाधरः" ।।१६७।।इति ?

---

१. ख वारयिष्यन्ति ।
२. क मू० प्र० सर्वे ।

सखे ! त्वया प्रमादगलितेनापि अमृतायितं प्रदीपनेन दैव[1]वशात् । ततः कथय किं संवृत्तम्[2] ? किं ब्रवीषि,

"नाहं वेद न सा तन्वी किमासीत्तदनन्तरम् ।
साक्षी स एकस्तद्वेद स्मरः शृङ्गारनायकः ।।१९८।।

अथ सा प्रणयगुरुणा मदीयप्रार्थनानुरोधेन तत्र क्षणमेकं कथमपि स्थित्वा गुरुजनोपास्तिसमयातिपातो भविष्यतीति कृच्छ्रेण ततो निश्चक्रामे"ति ? मन्दारशेखर ! किं ब्रवीषि, "अहो खल्वेवंविधशीलायास्तस्या अपि गुरुजनसपर्यानुरोध इत्याश्चर्यमि"ति ? सखे[3] ! सम्यगवधारय, कथयामि ते तत्त्वम्—

पत्युर्भक्तिविडम्बनाजवरसः सर्वत्र शुश्रूषया
भूयस्या गुरुतोषणं व्रतरतिः शान्तिः सतीसंश्रयः ।
सल्लापस्मितदर्शनादिनियमो भोग्येषु चानादर-
स्तानीमानि कलङ्कगोपनविधेरङ्गान्यसत्याः सखे ।।१९९।।

कुमुदाङ्गद ! ततस्ततः ? किं ब्रवीषि, "हन्ताहं किं कथयामि मन्दभाग्यः । सा मामपास्य गतैव[4] तदानीम्—

नितम्बप्राग्भारः पृथुलकुचभारोऽपि न तथा
रुरोध प्रेयस्या अपि मृदुपदं निर्गमविधौ ।
यथा तादृग्दैन्यप्रकटितविविक्तान्यरसया
दृशा मां पश्यन्त्या गमनमरुणत्प्रेमगरिमा" ।।२००।। इति ?

१. ख भाग्य° ।
२. क नास्ति ।
३. क नास्ति ।
४. ख प्रचलितैव ।

मन्दारशेखर ! किं ब्रवीषि,

"ताम्बूलहास्यपरिरम्भणनर्मगर्भ-
सल्लापचुम्बनविनोदसहासिकाभिः ।
विश्रम्भणस्तिमितचित्तसुखैकसारं
स्वस्त्रीरतं भुवि न कस्य धिनोति चेतः ॥२०१॥

तथापि धर्मदाराननादृत्य सुलभेतरसमागमानि परकलत्राणि किमर्थमनुसरन्ति नश्चेतांसी"ति ? कुमुदाङ्गद ! किं ब्रवीषि, "सौलभ्यासौलभ्य एव विरागानुरागहेतू स्वपरकलत्रयोर्विलासिलोकस्ये"ति ?

(सश्लाघम्) सखे वाढमाह कुमुदाङ्गदः ।

यस्य दूरे महानद्यः स तत्र स्नातुमिच्छति ।
तद्वारिणैव तत्रत्याः पादशौचादि तन्वते ॥२०२॥

कुमुदाङ्गद ! क्वेदानीं गच्छसि[1] ? किं ब्रवीषि, "अहमिदानीं लब्धावकाशया प्रियतमया प्रेषितया भुजङ्गपेटचा वचनेन कोविदारवनमालतीनिकुञ्जमनुसरामी"ति ? सखे, अनुकूल एवायं पराङ्गनोपभोगाय स्वस्थानविश्रान्तसकलचेतनसङ्घातो मध्यन्दिनसमयो निःशलाकश्च वननिकुञ्जः । तद्गम्यतामविलम्बेन । मन्दरशेखर ! किं ब्रवीषि,

नूनं कष्टतरः पराम्बुजदृशां सम्पर्कसौख्योदयः
सोऽयं चेद् घटते पुराणसुकृतैः स्वर्गो लघीयांस्ततः ।
आस्तां सोऽपि पराङ्गनाप्रहितया दूत्या समं भाषणं
यादृङ्निवृँतिमातनोति हृदये केनोपमीयेत[2] सा ॥२०३॥

---

१. ख प्रस्थितोसि ।
२. मू·प्र॰ केनोपनी॰ ।

अतस्त्वमीदृशनिर्वृत्तिपात्रं धन्यानामसि धन्यतम" इति ? अयि तादृशदूत्याः स्मेरमुखनिरीक्षणमेवालं निरुपमनिर्वृतये, किं पुनः सम्भाषणम् ! सखे ! कुमुदाङ्गद ! गच्छ गच्छ, सन्तु शिवास्ते पन्थानः। (*कतिपयपदानि गत्वा पुरोऽवलोक्य*) कोऽयमितः सोद्वेगमापतति विप्रवटुः ! मन्दारशेखर ! किं ब्रवीषि, "सखे ! त्वयाऽयमलक्षितवर्णिलिङ्गोऽपि वर्णीत्यवगतः केन हेतुने"ति ? सखे[1] ! दुरपह्नवब्रह्मवर्चस[2]विशेष एवावगमयति वर्णित्वमेतस्य। यावदेनमालापयामि। बटो ! को हेतुस्ते पलायने ? सगद्गदं किं ब्रवीषि, "महानुभाव ! त्रायस्व मां त्रायस्वे"ति ? कथय बटो ! कुतस्ते भयमुपस्थितम् ? मुहुः पश्चादवलोकयन् सवैलक्ष्यं किं ब्रवीषि, "अये ! किं कथयामि, वेपते मे नितान्तमन्तरङ्गम्, न स्फुरति च वक्तव्यमि"ति ? (*अग्रतो विलोक्य*[3]) अये ! किमेनमनुपतति सक्रोधं पाशहस्ता प्रभासकौमुदी ? यावदेनां पृच्छामि। सुन्दरि ! किमर्थमस्मिन् को[4]पारम्भः[5] ?

(*अनाकर्णितकेन*)

किं ब्रवीषि, "अयि विलासिन्[6] ! मुञ्चैनं[7] हताशम्। पाशैर्बध्वा नेष्यामी"ति ? सुदति[8] ! को हेतुरस्य नियन्त्रणे ? मन्दारशेखर ! किं ब्रवीषि ! "सखे ! किमत्र प्रष्टव्यम् ?

रतौ किंचित्प्रतिश्रुत्य दारिद्र्याद्दातुमक्षमः।
अतिसन्धातुमिष्टेऽसौ तदेषा बद्धुमिच्छति" ॥२०४॥ इति ?

---

१. ख वयस्य।
२. क °ब्रह्मचर्य°।
३. ख अवलोक्य।
४. ख °स्मिन् जने को°।
५. ख °रम्भः भवत्याः।
६. ख नास्ति।
७. ख विमुञ्चैनं।
८. ख सुतनु।

प्रभासकौमुदि ! सावज्ञमिव किं ब्रवीषि, "अयि मन्दारशेखर !

यदि न सन्ति ततः क्षितिमण्डले
सहृदया धनिनश्च भवादृशाः ।
भषकरासभरङ्कवटुष्त्वमू-
र्वयमिहान्यतमेन रमामहे" ।।२०५।। इति ?

कृतं वां परिहासजल्पितेन । कथय त्वां पृच्छामि—

चोरो राज्ञा दण्ड्यः परदाररतोऽपि तेनैव ।
सखि दण्ड्यते त्वयाऽयं किं पुनरागः पुरस्कृत्य ।।२०६।।

किं ब्रवीषि, "अयमेव प्रष्टव्यो हताश" इति ? कथय बटो ! किं त्वया कृतम् ? किं ब्रवीषि, "अधीतो मया साङ्गः स्वाध्यायः काशकौपीनशर्मणा कापिशायनब्राह्मणपुत्रेण कपिसगोत्रेणे"ति ? अरे मूर्ख ! किमेतत्कथनेन प्रयोजनम् ? किं ब्रवीषि, "त्वत्तः कन्यापरिग्रह[1]" इति ? जडमते ! कुतस्त्वमिदानीमाम्रान् पृष्टः कोविदारानाचष्टे इति न्यायमनुसरसि ! कथय त्वया किमपराद्धमेतस्याम् ? सशिरःकम्पं किं ब्रवीषि, "न मयाऽपराद्धं किञ्चिदपि, किन्तु भिक्षामटन् सदनमेतस्याः समागतोऽस्मी"ति ? (*सस्मितम्*) धन्योऽसि विप्रबटो ! वेश्यागारे भिक्षां चरता त्वया सम्यगुज्ज्वलितं ब्राह्मण्यम् । कि ब्रवीषि, "तर्हि किमुपाध्यायोपदिष्टमतिलङ्घनीयमि"ति ? (*सोत्प्रासम्*) अरे ! कथय कीदृशस्ते उपाध्यायोपदेशः ? किं ब्रवीषि,

"ऋग्वेदो वा यजुर्वेदः साम वा यत्र गीयते ।
पूते तत्र गृहे भिक्षां चरेति गुरुरन्वशात् ।।२०७।।

अतोऽहमेतस्या मन्दिरे मधुरतरं गीयमानानि सामान्युपश्रुत्य भिक्षार्थं

---

१. ख °प्रतिग्रह ।

प्रविष्टोऽस्मी''ति ? धिङ्मूर्ख[१] ! श्रुतिमधुरां सङ्गीतविद्यां श्रुतिरिति मन्वानो भ्रान्तोऽसि । भवतु, ततस्त्वया किं कृतम् ? किं ब्रवीषि, ''अथ मया चिरापविद्ध-मुपाध्यायचरणानां तर्पणतिलनिक्षेपकरण्डं वैल्वमन्वेषयता सादृश्यभ्रमेण कोऽपि मांसग्रन्थिस्तदेवेदमिति दृढतरं करेण गृहीत'' इति ? *(सस्मितम्)* सखे ! गृहीतः स्यादनेन कस्याश्चित् तरुण्याः पयोधरकलशः । बटो[२] किं ब्रवीषि ? ''किमुच्यते जलकलश'' इति ? अये ! कथं घटेत कंचुकान्तरे जलकलशस्थिति''रिति मन्दारशेखर ! किं ब्रवीषि' ''सखे ! स्फुटीकृतमनेन स्वयमेव ते जिज्ञासितमिवि'' ? कथय बटो ! ततः[३] किं संवृत्तम् ? किं ब्रवीषि ''महानुभाव ! किं कथयामि तत्क्षणमेव मदीयं तादृशं कौशेयकौपीनमपि समुत्पाट्य समुत्थितः प्रतिभयदर्शनः कोऽपि महासत्त्वः तत्स्मरणमद्यापि वपुषि समुदश्चयति मे सकम्परोमाञ्चमि''ति ? धिङ्मूर्ख ! स्वाङ्गज[४]मपि विकारं न जानासि ? भवतु, ततस्ततः । किं ब्रवीषि, ''ततोऽहं प्रकुपितोपाध्यायमुखनिरीक्षणेनेव तदुद्वीक्षणेन कन्दलितमहाभयो[५] न किञ्चिदवेदिषमि''ति ? अये[६] ! सम्यग् गौरवमानीतो भवन्तमध्यापयन्नुपाध्यायः । ततस्ततः ? किं ब्रवीषि ''इयं जानाति पृच्छेमामनन्तरवृत्तान्तमि''ति ? त्वं[७] कथय[८] प्रभासकौमुदि ! अथ किं कृतं त्रिप्रबटुना ? किं ब्रवीषि ''अयि किं कथयामि पिशाचमुखस्यास्य दुर्विलसितम्, या[९] पुनरद्या[१०]प्यनारूढपुरुषपर्यंका-करभांका मे कनीयसी निकाममासीद् विकलीकृते''ति ?

---

१. क धिगिमां ।
२. ख बटो सोत्प्रास किं ।
३. ख ततः परं ।
४. ख निजाङ्गजं ।
५. ख °भयोस्तदानीं ।
६. ख सस्मितं अये ।
७. आर्यं ।
८. ख नास्ति ।
९. ख येन ।
१०. ख नास्ति ।

(सौत्सुक्यस्मितम्[1])

अयि, कथय कीदृशं तद् वैकल्यम् ? सलज्जस्मितं किं ब्रवीषि, "अहो[2] का नाम[3] च्छद्मानुयोगिनं जनमुत्तरयेदि"ति ?

(सशिरःकम्पं बटोः पृष्ठमास्फालयन्)

धन्योऽसि भूसुरवटो द्रविणैकसाध्यं
वाराङ्गनारतमुपेत्य विना श्रमेण ।
आदौ व्रताय भवताऽथ मनोभवाय
दत्तो जलाञ्जलिरहो कुसुमाञ्जलिश्च ॥२०८॥

कथय बटो कस्ते हेतुः पलायने ? किं ब्रवीषि "अथ तत्रत्यैः स्त्रीजनैः प्रस्फोटनसम्मार्जन्यादिभिरुच्चावचं सन्ताड्य, ब्राह्मणप्रसूतिरिति कथञ्चिन्निष्कासितोऽस्मि । अथेयं तदवसरमेव सद्यःप्रसूता होमशालान्तरालादुत्प्लुत्य पाशहस्ता सक्रोधं मामनुपपाते"ति[4] ? अरे मूर्ख ! कुतो नाम होमशाला वेश्यागृहे ? किं ब्रवीषि, "कथमन्यथा तत्र दर्व्याज्यस्थाल्योरवस्थानमि"ति ? सखे ! न मयाऽर्थोऽवगतो बटुवचनस्य । मन्दारशेखर ! किं ब्रवीषि "ममैवं प्रतिभाति,

केलिगृहसीम्नि निहितां महतीं[5] च पतद्ग्रहं च संवीक्ष्य ।
दर्व्याज्यस्थाल्याविति सोयं बभ्राम विप्रवटुः ॥२०९॥ इति ?

युज्यत एतत् । बटो ततोऽनया किं कृतम् ? किं ब्रवीषि ?

---

१. ख नास्ति ।
२. ख अये ।
३. क नास्ति ।
४. क मामुपपातेति ।
५. ख वीणां ।

"मेखलां ब्रह्मसूत्रञ्च भैक्षमन्नं सवस्त्रकम् ।
गृहीत्वा बद्धुमारब्धं ततोऽस्माभिः पलायितम्" ।।२१०।। इति ?

बटो ! अन्यदपि किञ्चिद् गृहीतं स्यादनया त्वदीयम् ? सशिरःकम्पं[1] किं ब्रवीषि "नहि नही"ति ! विमूढमते ! तर्हि दण्डस्ते कुत्रास्ते ? ससम्भ्रममङ्गान्यभितोऽवलोक्य किं ब्रवीषि "अये ! केन हृतो मे दण्ड" इति ?

(*साकूतस्मितम्*)

किं बटो ! अनयैव असंशयं हृतस्ते स्मरदण्डः । किं ब्रवीषि, "स्मृतः, सत्यमनयैवापहृतः सोऽयमि"ति ? प्रभासकौमुदि ! सक्रोधहुङ्कारं किं ब्रवीषि, "अरे, हताश ! कंदर्पविलास इव किं भवानपि मां परिहसितुमिच्छति ? पश्य, गृध्रबलीकरोम्येवम्भूतं वाचाटमि"ति ? बटो ! सत्रासकम्पं किं ब्रवीषि "अम्ब ! मा कुरु मां गृध्रबलिम् । प्रयच्छामि हेमसूत्रसञ्चितं[2] मे कौपीनार्धं तुभ्य[3]मि"ति ? बटो ! कुतस्ते कौपीनम् ? ससम्भ्रमं कौपीनस्थानमभिमृशन् सशोकावेगं किं ब्रवीषि, "हा हन्त, गतं मे कौपीनेन; पुनर्गतं प्राणहतकैः ! हन्ताहं किं करोम्यशरणः—

दत्तं पुरा मम पितुः प्रपितामहाय
तन्मातुलैश्च मिलितैर्व्रतबन्धकाले ।
तेनाविवाहविधृतं तदिदं कुले नः
पुत्रक्रमादुपगतं नु मया[4]पविद्धम् ।।२११।।

अये सुकृतैकसुलभकौपीनप्रवेक !

---

१. क नास्ति ।
२. क °सूचित ।
३. क नास्ति ।
४. ख ममा ।

निषिद्धमपि तातेन धारणं तव धिङ् मया ।
धृतमस्याद्य जाल्मेन दुर्लङ्घ्या भवितव्यता ॥२१२॥

अयि कौपीनप्रवर ! त्वयाद्य वियुक्तोऽहं मन्दभाग्यः[1] ।

ताते कुप्यति किं करोमि जननीं शोकाकुलां वच्मि किं
त्वद्रिक्तं बत वेत्रसम्पुटमहं द्रष्टुं कथं शक्नुयाम् ।
गर्वोदीर्णमुखश्रिया तव बलाद् ये ये मया धिक्कृताः
प्रम्लानेन मुखेन तान् प्रहसतो द्रक्ष्ये सतीर्थ्यान् कथम् ॥२१३॥

रज्यन्ते मयि किं समीक्ष्य कुलजाः कन्याः सुरूपान्विताः
कौपीनप्रवर त्वयि प्रमुषिते पाणिग्रहो मे कुतः ।
सम्प्राप्य प्रथमाश्रमत्रयफलं विन्दन्ति तुर्याश्रमं
तन्न्याय्यं[2] कथमद्य मां समभजत्संन्यासयोगः स्वयम् ॥२१४॥

चीर्णा विश्वजिदादयो बहुमखास्तप्तं सुघोरं तपो
दत्तं भूरिधनं तथा प्रवचनं त्वध्यापितं नैकशः ।
लब्धं त्वं सुकृतेन तेन महता कौपीन मत्पूर्वजै-
र्धिङ् धिङ् मां दुरितैकतानजनुषं योऽस्मि त्वया प्रोज्झितः ॥२१५॥

किं विद्यया किमु कुलेन किमार्यशीलैः
किं जीवितेन विफलेन विना त्वया मे ।

---

१. ख °भागधेयः ।
२. ख °नार्या ।

स्याद् वज्रसारघटितं हृदयं मदीयं
कौपीनक त्वयि गतेऽपि न यद्विदीर्णम्" ॥२१६॥ इति ?

वत्स, काशकौपीनप्रमुषितेऽपि सर्वस्वे कौपीनमात्रमुत्प्रेक्ष्य किं शोचति भवान् ? सोच्छ्वासं किं ब्रवीषि "महानुभाव ! किं वक्ष्यामि क्षीणपुण्योऽहम्—

पर्णोऽरण्ये परमसुलभो मेखलातार्णरज्जु-
श्चर्मैणं मे करतलगतं यद्गृहे कृष्णसारः ।
सूत्रे याते व्यसनमिह किं यद्धृतिर्दुःखहेतुः
शोच्यं तन्मे सुकृतिसुलभं किन्तु कौपीनमेकम्" ॥२१७॥ इति ?

बटो ! आशिषैनामभिनन्दय । दास्यति ते कौपीनम् । सहर्षं किं ब्रवीषि "सुभगे ! भवतु ते भगवृद्धिः । देहि मे कौपीनमि"ति ? प्रभासकौमुदि ! सक्रोधं हस्तमुद्यम्य किं ब्रवीषि "अरे हताश बीभत्सवादिन् किमद्यपि न विरमसि कदर्यवादान्मा जल्प[1] मा जल्पे"ति ?

(*सानुनयम्*)

अयि भामिनि ! कृतमतिऋृजावस्मिन्मन्युना । नैकश्चार्थो भगशब्दस्य । गच्छत्वेष प्रयच्छ कौपीनम् । आवामितो गच्छावः ।

(*अग्रतो गत्वा विलोक्य*)

सखे ! पश्य, विस्तीर्णतरकदलीगर्भदलविरचितभाजनान्तरसम्भृतरवि-करसन्तापविलीनघृतविन्दुनिष्यन्दशङ्कया निभृतकृतचरणविन्यासः, दक्षिणेतर-भुजशिरोदेशलम्बमानपटच्चरग्रन्थिरन्ध्रपरिच्यवमानविविधधान्यनिरोधनव्यापा-रितदक्षिणकरतया शिथिलीकृतकक्षविवरपरिपतत्पटोलकोशातकीनियन्त्रण-संकुचितविकटकटितटस्रंसमानराङ्कवपटखण्डसम्पादितबहुलवैकल्पः, कण्ठलोल-विततकरवीरमाल्यपरिकल्पितहृदयकलितमलयजातपङ्कपरिमोषः, विभिन्नललाट-

---

१. ख नास्ति ।

विक्षरितरक्तधारा[1]सीमन्तितकपोलनासिकोऽपि नवनवप्रसादविशेषानुमीयमान-मतिवेलमन्तःप्रमोदमादधानः, विस्रस्तशिखागर्भनिर्गलद्धरिद्राक्षतः, कुण्डमुष्क-शर्मणो ब्राह्मणस्य मध्यमपुत्रः कम्बलमेढ्र इत एवाभिवर्तते। यावदेनमालाप-यामि। अये कम्बलमेढ्र ! त्वमद्य स्फुटितनिटिलोऽपि व्यञ्जनैः प्रमुदित इवालक्ष्यसे। कथया[2]द्य शोकावसरे को[3] हेतु[4]स्ते प्रमोदस्य ? किं ब्रवीषि,

"न शस्त्रैः संक्षुण्णं रणभुवि न वा वृत्तिकलहे
शिलाभिर्निर्भिन्नं निटिलमिह शोचामि किमिति।

अपि तु—

समुद्यत्तारुण्यद्रविणमदशौण्डेन्दुवदना-
तुलाकोटीकोटिस्फुटकठिनसङ्घट्टदलितम्" ॥२१८॥ इति ?

मन्दारशेखर ! किं ब्रवीषि "तर्हि भग्नेऽपि निटिले मग्नोऽसि प्रमोद इति युक्तमेतत्" इति ? सखे ! त्वयेदं कथमासादितं शुभसांदृष्टिकम् ? किं ब्रवीषि, "अद्याहं हेलावतीस्वसुर्हेमप्रभायाः प्रथमपर्यङ्काधिरोहमहोत्सवे स्वस्तिवाचनकाय गतोऽस्मि। अन्येऽपि तत्र समवेता विलासिनो विलासिन्यश्च। अथ तस्मिन्नुत्स-वारम्भे--

वीणावेणुमृदङ्गडिण्डिमरवैराकीर्णकर्णामृतै-
र्नृत्यत्कैरवबन्धुबन्धुवदनामञ्जीरसिञ्जारवैः[5]।
शैलूषप्रवरप्रगीतमधुरालापैर्मदास्योद्गतै-
र्मन्त्रैर्नैकविधैश्च तद्गृहमभूच्छब्दैकतानान्तरम् ॥२१९॥

---

१. क °धारा° इति नास्ति।
२. ख 'अद्य' इति नास्ति।
३. ख किं।
४. ख बीजं।
५. ख भूषाविशेषारवैः।

इदानीं तत्कलकलश्रवणसञ्जनितभयः[1] संक्षुभितो निकृत्तलोहशृङ्खलो बन्धस्तम्भादुत्प्लुत्य,

शश्वत्पक्ष्मनिमीलनैश्च विवृतैर्दन्तैर्नितान्तोन्नमद्-
भ्रूयुग्मैरवलोकनैश्च विकृतैः कुर्वन् जनोद्वेजनम् ।
मध्यालम्बिनिकृत्तशृङ्खलिकया लाङ्गूलयुग्मभ्रमं
कुर्वन् कोऽपि महाकपिः समपतत्तत्राङ्गनामण्डले ॥२२०॥

ततः,

कासाञ्चिद्वसनं निकृष्य जघनात्कासाञ्चिदास्याम्बुजं
दृष्ट्वा दन्तमुखैर्विदार्य[2] नखरैः कासाञ्चिचिदूरुस्तनम् ।
कासाञ्चित्कचभारगर्भितसरान् हृत्वा प्रकीर्याभितः[3]
सिञ्चंस्तत्र समग्रचन्दनरसांश्चिक्रीड शाखामृगः" ॥२२१॥ इति ?

(*सश्लाघम्*) अये नहीशः केशवोऽपि कीशपुण्यमभिवर्णयितुम्, येन पुनरनायासमीदृशी संपत्तिरनुभूता । भवतु, ततस्ततः ? किं ब्रवीषि "अथ तत्र व्यतिकरे भयातुरतया परितः पलायमाने तत्रत्ययौवते समुत्तुङ्गतरकुट्टिमोद्देशादुत्प्लुत्य गच्छन्त्या मातङ्गलीलायास्तुलाकोटिसंघट्टनेन विभिन्नमधःस्थितस्य मे ललाटमि"ति ? (*सश्लाघम्*) धन्योऽसि कम्बलमेढ्र ! धन्योऽसि !

उन्निद्रशोणसरसीरुहगर्भभासा
यस्याः पदेन न कदापि वियुज्यते यत् ।
तत्तादृगङ्गदकृतव्रणभालसीम्नो
दूरे तवैव सुकृतं वचसां च सीम्नः ॥२२२॥

---

१. ख °कन्दलिमहाभयः ।
२. क विदीर्य ।
३. ख °शितः ।

ततस्ततः ? किं ब्रवीषि,

"मामुद्वीक्ष्य तदैव सा सचकितं हा हेति नेदीयसी
वल्गन्मौक्तिककङ्कणं करतलं वामं निधायावटौ ।
अन्येन स्तनकुम्भघर्मसलिलासङ्गान्मिलत्सौरभं
हस्तेन त्वरयावलम्ब्य सिचयं चक्रेऽसृजो मार्जनम्" ॥२२३॥इति ?

अहो श्रोत्रिय ! प्रसूतस्ते भाग्यपरिणामः !

अद्यापि प्रलुठन्ति हन्त धनिनस्तस्या गृहालिन्दके
ये दातुं प्रभवन्ति काञ्चनगिरिं तन्व्याः सकृद्दर्शने ।
तैरप्राप्यमिदं त्वयाद्य कृतिना श्रेयः समासादितं
पुण्यैरेव समुन्मिषन्ति न पुनर्यत्नेन सम्पत्तयः ॥२२४॥

गच्छ तावदतिक्रामति यजमानगृहे भोजनावसरः । आवामन्यत्र गच्छावः ।

(अग्रतो गत्वा, विलोक्य)

पश्य, सेयमुपकण्ठोन्मिषद्धाराकङ्कणाभिरामा सरसतरकायमानाभिदृश्यं[1] दधाना मध्यदेशम्, अतनुकेतनविलोलनेत्राञ्चलसमीरणनिरस्तपान्थजनसन्तापा निबिडतरोरुपयोधरकलशविराजमाना संदृश्यते पानीयशाला, बाला च तदधिष्ठात्री । एहि, क्षणमात्रमत्र विश्रम्य गच्छावः ।

(गत्वाविलोक्य, सहर्षम्)

जालोदञ्चितपूर्वकायमबला निष्पन्दवक्षोरुह-
व्यावृत्तांशुकपल्लवा कलयते पाथोऽद्य पान्थाञ्जलौ ।

---

१. ख दृश्यमिति नास्ति ।

सोऽयं जर्जरिताङ्गुलिर्घनरसासारेक्षणव्याजतः
पश्यन् पीनकुचौ धुनोति न शिरस्तृप्तोऽप्यतृप्तो यथा ।।२२५।।

(*समुपसृत्य*)

बाले पयोधरघटस्तव हस्तलग्नः
पान्थान्न तोषयति सोऽतनुतापभाजः ।
अन्यस्तुदत्यविरतं बत दृष्टमात्रः,

सखे ! अपवार्य किं ब्रवीषि, "सखे ! पराङ्गनामेवं ब्रुवाणो न कथं न बिभेषी"ति ? सखे ! कुतोऽत्र भीः ? जगतः कलत्रनिर्विशेषाः खलु प्रपापाल्यः । प्रपापालि ! सस्मितं किं ब्रवीषि "अयि सरस ! किं न जानासि ?

सोऽयं कराकलित एव हि दुःखहेतु" ।।२२६।। इति ?

मन्दारशेखर ! किं ब्रवीषि "सखे ! पश्चादनया सह संल्लपिष्यसि रसिकया ! कथय सपदि मत्सनाथः कुत्रापनयस्येतमातपावेगम्" इति ? प्रपापालि ! किं ब्रवीषि, "अत्रैव ममोपवने विलसत्पृथुलकुचान्तरालस्थले विश्रम्यतां युवाभ्यामि"ति ?

(*सस्मितम्*)

सुन्दरि ! यद्यपि त्वया प्रणयानुरूपमाज्ञप्तं तथापि,

शुद्धाः शुक्तिपयोधृतैकवपुषः कामं गुणैकाश्रया
यत्संवासकृते नितान्तनिशितैर्भिन्नाश्च सूचीमुखैः ।
ते मुक्तामणयोऽपि नैव तदिदं वक्षोजयोस्तेऽन्तरं
प्रापुर्नौ शतपत्रपत्रनयने तत्रावकाशः कुतः ।।२२७।।

समन्दस्मितं किं ब्रवीषि, "अयि सरसहृदय ! युक्तमेवेदमधःकृतनायकाः

कान्तामणयोऽपि सहृदयान्तरङ्गं नावगाहन्त" इति ? शृणु विलासिन्यमतमेतदस्माकम् ।

पद्मोदञ्चितमौक्तिकं विलुलितस्फूर्जत्तमिस्रोत्करं
लोलत्कामशरासनाटनि नटत्तुङ्गक्षमाभृद्युगम् ।
तन्वाना ललितं रहः किमपि तत्कृत्वाऽप्यधो नायकान्
कैः कान्तामणयः कृताः सहृदयैर्मुग्धेऽन्तरङ्गाद् बहिः ॥२२८॥

किं ब्रवीषि "का नाम शक्नुयाद् वाक्चातुर्ये तुलां भवता समं समारोढुम् ! पीयतामत्र बकुलकुसुमासवामोदिकुमुदमित्रोपलामत्रसंवासशीतलममृतम् । विश्राम्यतामातपशान्तिपर्यन्तमि"ति ? सुन्दरि ! तव वचोमृतेनैव मे संप्राप्तं सौहित्यम् । सर्वथा न पिबाम्यमृतं धराहितम् । पृच्छेमं मन्दारशेखरम् । मन्दारशेखर ! किं ब्रवीषि "सत्यमिदम्, मिथ्योदरि ! नित्यमयमधराहितममृतमेव पिबति कन्दर्पविलास"इति ? प्रपापालि ! समन्दस्मितं किं ब्रवीषि, "स्वस्वाम्येकसुलभं तदेतद्वो दुर्लभमेवे"ति ? अयि[1] सुतनु[2] ! श्रूयताम् ।

मूर्त्याऽऽसेचनकश्रियाऽनिमिषतां ते प्रापिताः स्मो वयं
नाक्रान्ता जरया तवेदृशगिरा नाकं समारोपिताः ।
त्वत्पाणिग्रहतो महासवशतस्यासादितं चेत्फलं
स्वस्वामित्वमुपेत्य तादृगमृतं स्वैरं धयामस्तदा ॥२२९॥

किं ब्रवीषि "यद्येवं पुन[3]र्भू[4]परिग्रहदोषेण नियतमेव निन्दिष्यते भवानि"ति ?

---

१. ख तर्हि ।
२. क नास्ति ।
३ ख नास्ति ।
४. ख नास्ति ।

(सस्मितम्)

सुन्दरि ! कः पुनर्भूपरिग्रहे[1] सति साम्राज्यमापन्नो निन्दिष्यते ? मन्दारशेखर ! किं ब्रवीषि "अये ! कथमियमपत्रपानिरपेक्षं व्याहरति नवयुवतिः ! अथवा,

पत्यौ रोगिणि निर्धने च विरसे व्यङ्गे प्रपापालिकाः
सैरन्ध्र्यः परवेश्मपाकनिरताः प्रायो भवन्ति स्त्रियः ।
तास्तन्वन्ति ततो नियन्तृविरहात्पुम्भिः सहैकासिकां
शीलं तेन विलीयते बत कुतः शीले विलीने त्रपा" ॥२३०॥ इति ?

सखे ! न वक्तुं युक्तमेवं प्रेमशालिनीष्वस्मद्विधानाम् । प्रपापालि ! किं ब्रवीषि, "वदतु नाम को दोषः ! परिहासशीलोऽयं विलासी । अतिथिरसिक ! कथय[2] किं वाञ्छसि मत्त आतिथ्यमि"ति ?

(सहर्षम्)

प्रत्यग्रक्षतवेगकम्पितदलं नव्येन्दुरेखाश्चित-
व्यावल्गत्पटुचक्रवाकयुगलं कल्लोत्थझञ्झानिलम् ।
शङ्खोदीर्णकपोतपोतविरुतं रक्ताब्जदि(?)न्दीवरं
कालं विक्रममाणकाञ्चनलतं वाञ्छाम्यहं वीक्षितुम् ॥२३१॥

किं ब्रवीषि "तर्हि कदा भवेत्ते पुनरागम" इति ? यदा भवती समाज्ञापयति । मन्दारशेखर ! किं ब्रवीषि "सखे किमियमदत्तोत्तरैव ऊर्ध्वप्रसृताङ्गुलीकं तिर्यक्करं कुचद्वयान्तराले विन्यस्य जोषमास्ते कोकस्तनी"ति ? सखे, तेनैव कोकमिथुनविश्लेषकालमेव सङ्केतसमयमावेदयति प्रगल्भेयमिति जानीहि । एहि पुनः सायमागच्छावः ।

१. ख परिग्रहेण ।
२. क नास्ति ।

(कतिपयपदानि गत्वा, वामतोऽवलोक्य)

मन्दारशेखर ! किं ब्रवीषि सखे ! केयमेतस्याः,

वक्त्रे केवलपाण्डिमा विजयते नो चित्रकं दृश्यते
वासःकेशभराङ्गकेषु बहुधा मालिन्यमालक्ष्यते ।
वक्तुं प्रोषितवल्लभेति तदियं युक्तं न पद्मानना
वीजैः क्रीडति सप्रमोदमधुना यत्कृष्णवृन्तोद्भवैः" ॥२३२॥ इति ?

सखे, सुधाकरकलत्रमियमनङ्गरसतरङ्गिणी सखीभिः सह खेलति कालमतिवाहयितुं रजस्वला । किं ब्रवीषि "किमियं रजस्वला ? तर्हि युज्यतेऽस्याः केशाम्बरमालिन्यमाननपाण्डिमा चे"ति ? भवतु[1] सखे ! एहि, क्षणमेकं स्वच्छन्दमनया संल्लपावः । साश्चर्यं किं ब्रवीषि "अये ! कथ[2]मेवमुच्यते, स्वप्नदुर्लभः खलु विटानां परवधूटीभिः स्वच्छन्दसंल्लाप" इति ? सखि !

पतिभयमूलः सुदृशां विलासिलोकैरसंल्लापः ।
अनया पटुघटकुचया घटयति कमनान् स्वयं नाथः ॥२३३॥

अतोऽनया युज्यते नः स्वच्छन्दं[3] संल्लापः । किं ब्रवीषि "अहो नहि पुरुषाः पुरुषान्तरनिरीक्षणमपि क्षमन्ते स्वकलत्रस्य । कथमयं स्वत एव कुरूपं पन्थानमवतारयति स्वकलत्रमि"ति ? सखे ! पतिः क्लीब एतस्याः किं कुर्यात् ? किं ब्रवीषि "किमस्याः पतिः क्लीब" इति ? कुतोऽत्र सन्देहः । सश्लाघं किं ब्रवीषि,

---

१. ख नास्ति ।
२. ख किं ।
३. ख स्वैरं ।

सेवां दासजनोचितां वितनुते पश्येत् प्रसन्नेति मां
सप्रेमास्तु सदा मयीयमिति च स्वं[1] कामनान्नेर्ष्यति ।
कौलीनान्न भयं तथाविधपथे पत्युर्मते वर्त्तनाद्
धन्यं क्लीबकुटुम्बिनीजनमहं मन्ये धिगन्याः स्त्रियः ।।२३४।।

सखे केचन वर्षवरा[2] अपि गृहबहिर्द्वारदेहलीदर्शनमपि[3] न सहन्ते स्वकलत्रस्ये"ति ? (*कराभ्यां कर्णौ पिधाय*) शान्तं पापम्, शान्तं पापम् !

नामापि तेषां न ग्राह्यं विरम त्वं ततः सखे ।
निबध्नन्ति स्वयं षण्डा[4] ये पापास्तरुणीजनम् ।।२३५।।

किं ब्रवीषि "सखे ! किमेतत्,

स्थगयति निटिलार्धं पाणिना पद्मभासा
भ्रुवमपि करशाखापल्लवेनाथ वामाम् ।
वदनमपि पिधत्ते गाढमोष्ठाधरेण
स्फुट[5]पदनखजालं चाऽपि चेलेन बाला ।।२३६।।

किञ्च,

यत्नोदञ्चितदोर्लता निजसखी तिष्ठत्यमुष्याः पुरो
बालेयं परिमातुमुत्क्षिपति यद्वल्गत्कुचक्रीडनम् ।

---

१. क स्वां ।
२. क-ख °भवा ।
३. ख °निरीक्षणमपि ।
४. ख क्लीबा ।
५. क °घराभ्यमथ° ।

ऊर्ध्वाधःप्रसरद्दृगुन्नतनतं वक्त्रं तदालोकने
भात्यस्या नमदुन्नमज्जलजवद्भृङ्गाभिपातोद्गमैः" ॥२३७॥ इति ?

सखे ! सर्वोऽयमस्यां क्रीडायामवान्तरनियमनिर्वन्धः । *(तस्याः समीपमुपसृत्य)* अयि वामनयने !

नटत्कुचघनस्तनं जघनभूललत्सप्तकी-
विलोलमणि किङ्किणीगणविमुक्तमौनव्रतम् ।
वलग्नवलनोच्चलद्विमलतारहारं हर-
त्यदो रतविशेषवत्सुतनुखेलनं नो मनः ॥२३८॥

(सोपालम्भम्)

किं ब्रवीषि "सत्यमेव कुतो हरेन्मामकं सुरतं खेलनं वा मनस्ते बहुरसिकवल्लभस्ये"ति ? सुतनु[1] ! कथ[2]मजनि मदुक्ते ते विपरीतरतस्फूर्त्तिः ?

मन्दारशेखर समन्दस्मितं किं ब्रवीषि "सखे ! युक्तैव खलु कामिनीनां कामनालोके रतस्फूर्त्तिरि"ति ? अनङ्गरसतरङ्गिणि ! किं ब्रवीषि "अद्यायं मे शोभनोदयो दिवसः, यत्र स्मृताऽहमीदृशी कन्दर्पविलासेने"ति ? सुतनु ! किमेवं मामुपालम्भसे ? त्वदभिज्ञाधारणे[3]नैव प्राणित्यसौ कन्दर्पविलासः । *(पश्य पश्येति ससंभ्रममुरो निरीक्ष्य सविषादम्)* हन्त हन्त समापतितः प्रमादः !

अभिज्ञानं यत्ते हरिणमदपत्राङ्कुरमयं
स्थितं वक्षोजातव्यतिकरवितीर्णं हृदि मम ।

---

१. ख सुमुखि ।
२. ख कुतो ।
३. ख °दर्शने ।

तदेतावद् गुप्तं सपदि तव सान्निध्यजनित-
प्रभूतस्वेदाम्भःसमुदयपरिक्षालनहृतम् ॥२३९॥

परन्तु, अस्ति किञ्चिदान्तरमभिज्ञानमनुस्मरतु भवती यदावयोः प्रथमरतावनिवृत्तरतेच्छया भवत्या प्रभातसमये—

म्लानं सुन्दरि कर्णिकाकुवलयं कम्पेन सम्पातितं[1]
कूजत्कुक्कुटकण्ठकन्दलरवः काञ्चीरवैर्निह्नुतः ।
आयाते हृतनूतनाम्बुजमिलद्गन्धेऽथ[2] मन्दानिले
यद्यद्रोषभयोचितं त्वमकरोस्तत्केन विस्मार्यते ॥२४०॥

किं ब्रवीषि "अयि विलासिन् सकललोकातिलङ्घिनी ते प्रमुषितप्रणयाभिनयपरिस्फूर्तिः । न चेदेवं कथमेवमुपेक्षिता त्वयाऽहं चिरकालमि"ति ? (*सप्रणयमुपसृत्य*) सुदति[3] ! यद्यहमन्यथा ब्रवीमि तर्हि शपेयं त्वदीयलोमलताभुजङ्गिकावमर्शेन । सस्मितं[4]करपृष्ठकृत[5]गगननोदना किं ब्रवीषि "अपसर परतो मा स्पृश मां पुष्पिणीमि"ति ?

(*सोत्कण्ठम्*)

सुन्दरि ! यदि तवास्पृश्यत्वे पुष्पमेवोपाधिस्तर्हि वद त्वां पृच्छामि ।

अम्भोजानि पदं शयश्च वदनं नीलोत्पले लोचने
नासा भासुरहेमपुष्पकलिका दन्ताम्बरं ते जपा ।

---

१. क °दितं ।
२. क सु° ।
३. ख सुन्दरि ।
४. ख समन्दस्मितं ।
५. क करतलगत° ।

दन्तालिर्नवकुन्दकोरकततिर्हासः स्फुरत्कैरवं[1]
नित्यं पुष्पमयाखिलाङ्गि भवती स्पृश्या कदा स्यान्मम ॥२४१॥

सस्मितं कपोलमंशुकाञ्चलेन संछाद्य किं ब्रवीषि न बहिरङ्गपुष्पं दोषायेति"ति ? मन्दारशेखर ! किं ब्रवीषि,

"तावत्कुलस्त्रीमर्यादा यावल्लज्जावगुण्ठनम् ।
हृते तस्मिन् कुलस्त्रीभ्यो वरं वेश्याङ्गनाजनः ॥२४२॥ इति ?

सुदति[2] । सक्रोधवैलक्ष्यं किं ब्रवीषि "अयि सरसहृदय । सत्यमाह ते मित्रम् ।

"धनाशा कैतवस्नेहो वितथैश्चित्ततोषणम् ।
एकमप्यस्ति नास्मासु कथं वेश्याधिका[3]वयम् ॥२४३॥

अलमधुना कदर्यजनसंल्लापेन । गच्छामि ?

(इति विलोक्य[4] सविषादम्)

हन्त हन्त गतैव सखे हरिणाक्षी ! त्वयैवं प्रणयिनि जने वैरस्यमापादयता सपदि कृतः खलु कलशकरीरे जम्बीररससेकः ।

भवतु, पश्चादहमेवागत्य कोपमस्याः परिहरिष्यामि । एहि गच्छावः ।

(अग्रतो गत्वा विलोक्य)

पाटीरगौरातिमनोज्ञसाटी
चेटीकरग्राहितचारुवीटी ।

---

१. क °कैतव ।
२. ख भामिनि ।
३. ख °समा ।
४. ख नास्ति ।

घाटी जिताम्भोरुहजातघोटी
का टीकते तूर्णमितो वधूटी ।।२४४।।

(*निपुणं निरूप्य*)

इयं खलु सुधालहर्य्याः कनीयसी चमत्कारवैखरी ! यावदेनामालापयामि । प्रिये ! चमत्कारवैखरि ! क्व गच्छसीदानीमेतावता त्वरितगमनेन ? किं ब्रवीषि "सम्प्रति सम्प्रवर्त्तमाने वसन्तोत्सवे मत्स्याङ्कमभिपूजयितुं गता मे भगिन्यादयो विलासिन्यः कुसुमाकरविश्राममारामम् । अतोऽहमपि तत्रैव गच्छामि" [इति ?] सुन्दरि ! क्षणं विलम्ब्यताम्, सहैव गच्छामः । किं ब्रवीषि "अयि रसिक ! कृतमत्र मे गतिप्रतिरोधेन । नखं पचति मितम्पचो मे वसन्तदिवस" इति ? सुन्दरि ! न साम्प्रतं ते प्रियैकपक्षपातिन्याः प्रियाविशेषे वसन्तवासरे विद्वेषः ।

श्रोणी सङ्गतमम्बरं न सहते न त्वज्जनानां तनोः
सम्पर्कं क्षमते ददाति न मनाङ् निद्रातुमेकं क्षणम् ।
कस्तूरीकलितानुबोध[1]मुरसो दूरीकरोत्यङ्गने
चित्तेशोऽपि तथा वसन्तसमयः को नाम भेदस्तयोः ।।२४५।।

भवतु, गच्छ तावदावामपि तत्रैवागच्छावः ।

(*कतिपयपदानि गत्वा निरूप्य*)

सखे ! पुरः पश्य, मलयानिलचलितललितलवङ्गलतावितानगलित[2]विततकुसुमरसासारसम्पातमसृणतरतुषारकिरणशिलातलसञ्चरणसमयनिस्सरच्चरणपरिपतन्नितम्बिनीसमुद्धरणसरभसप्रसारितकरतरुणविलासिनखमुखविरचितपयोधरभरपरिसरव्रणवेदनाकृतसीत्कृतिव्यतिकरितरणितमणिकङ्कणविराजमानहस्त -

---

१. क °वबोध° ।
२. ख गलित इति नास्ति ।

विहतविकलमालतीलतान्तसमुत्पतद्विहस्तमत्तमधुकरनिकरसम्पातशिथिलितरसालमञ्जरीपुञ्जविकीर्णपरागपूगदूषितविलोचनव्याकुलकोकिलकुलकलकलमुखरितान्तरालसीमान्तमेनमारामम् । सखे ! किं ब्रवीषि,

"तीव्रपतन्नखविकलित-
गणिकालिकुचाभिरामपत्रश्रीः ।
त्वमिव विभाति पुरस्ता-
दारामः सोऽयमत्र विहरावः ॥२४६॥ इति ?

(नाट्येन वनं प्रविश्य, परितोऽवलोक्य)

अये सपदि खलु सफलं मे चक्षुरेतद्दर्शनेन—

अन्योन्यस्तनताडिताः स्तनतटप्रभ्रष्टमुक्तासरा
गाढाश्लिष्टपरस्परोरुयुगला लोलद्दुकूलाञ्चलाः ।
वल्गद्वेणिलताः कलं प्रतिकलं सिञ्जत्तुलाकोटयो
विन्दन्त्यत्र सरोजपत्रनयना हिन्दोललीलासुखम् ॥२४७॥

(अन्यतो गत्वा, विलोक्य)

इतः पश्य सखे, कृतमितरालोकनेन—

दीर्घोदञ्चितमध्यलुप्तवलयः संदृश्यनाभीगुहाः
पादाग्रस्थितिवेपमानचरणा वल्गद्गुरुश्रोणयः ।
शश्वद्वृन्तनिकृन्तनावधिरणद्रत्नोल्लसत्कङ्कणाः
प्रोद्यद्वक्त्रकुचा जयन्ति सुदृशां पुष्पावचायक्रियाः ॥२४८॥

(परिवृत्यावलोक्य सहर्षम्)

अये साऽप्यत्रैव कुसुमान्यवचिनोति पत्त्ररथपत्त्रपुत्त्रकलत्त्रविभ्रमाविभ्रम-

—१४—

तरङ्गिणी ! यावदेनामुपसर्पामि। *(उपसृत्य)* मुग्धे ! कृतं ते कुसुमावचयसाहसेन। यदि हितं मे न शृणोषि वचनं तदा--

फुल्लेन्दीवरपद्मरक्तकधिया नेत्रास्यदन्ताम्बरे
रोलम्बान् पततो निवारयतु ते नासालसच्चम्पकम् ।
अन्त्ये सम्प्रति संनिपत्य दशतो बिम्बप्रवालभ्रमा-
न्मुग्धे कीरपिकान्निवार्य भवतीं त्रातुं पटुः को भवेत् ॥२४९॥

अनादरमिव किं ब्रवीषि,

"क्षणविरचितहर्षै केवलं वाग्विलासैः
कलयति मुखरागं चैकतः पक्षपातम् ।
दशति रदनवासो मामकं त्वादृशे वा
शठक इव विशेषः कोकिले वा शुके वा" ॥२५०॥ इति ?

(आत्मगतम्)

अये, मामियमन्यासङ्गादात्मनि शिथिलरागानुबन्धं मन्वाना साकूतं वचोभिरधिक्षिपति पक्ष्मलाक्षी, तदेनामन्यतो नयामि ।

(प्रकाशम्)

अयि विलासिनि, विकचाः कान्ताः सुमनसः कराङ्कगता विहाय किमन्वेष्टुमिच्छसि कोरकप्रकरम् ? साकूतस्मितं किं ब्रवीषि "तादृश्यस्तास्तुभ्यमेव रोचन्ते नास्मभ्यमि"ति ? अलमबले ! ते परिहासेन। अहमपि स्वो देवतार्हणार्थ[1]मत्रचिनोमि कुसुमविसरम् । विभ्रमतरङ्गिणि, किं ब्रवीषि "अये, कुसुमं देवतार्हं वदन्ति पर्युषितम् । अतः सद्यस्तनमेनं गृहीत्वा किं न पूजयसि

---

१. ख °र्चनार्थं° ।

कामं त्वं देवमि''ति ? *(सहर्षस्मितम्)* प्रिये, त्वदाज्ञप्तं मे नातिलङ्घनीयम्। अतस्तथैव करिष्यामि ।

(इति कुचं तस्याः करेण निपीड्य, सशिरःकम्पम्)

कलशकन्दुकचक्रचया मया
परिचिता मदिराक्षि सहस्रशः ।
मसृणवर्त्तुलकर्कशतेदृशी
बत न तेषु न तेषु न तेष्वपि ॥२५१॥

अयि सुभ्रु ! सभ्रूभङ्गं किं ब्रवीषि "गच्छ गच्छ शठामुना ते कृतमसमञ्जसचेष्टितेने''ति ? अयि भामिनि, स्वयमेव स्तनग्रहणेन सद्यः कामदेवार्चनं समादिश्य किमेवं मुधा कुप्यसि ! भवतु, तर्हि प्रशान्तकोपां भवतीं सायमनुसरिष्यामि ।

(पदान्तरं गत्वा पुरः पार्श्वयोश्च विलोक्य, ससम्भ्रमम्)

सखे, पश्य दक्षिणतः,

कान्तागण्डूषभीत्या कृतकृतकसरोलङ्घनस्तत्र काञ्चित्
भ्रष्टं स्वीयोत्तरीयं त्वरितमनुपतन् धावमानां गृहीत्वा ।
अन्यारुद्धोत्तरान्तां किमपि च सरलां वञ्चयित्वा समञ्चन्नाकृष्टोऽयं पराभिर्विहरति तरुणीमण्डले कोऽपि धन्यः ॥२५२॥

(निपुणं निरूप्य सहर्षम्)

अये, सोऽयं प्रियमित्रं नौ मदनमङ्गलः ! न चेत्कः पुनरीदृशभाग्यपात्रमन्योऽत्र विलासी । एहि तावदनेन सह स्वैरमारामे विहरावः । *(उपसृत्य)* सखे मदनमङ्गल, किमावामपि न पश्यसि नेदीयांसौ प्रेयसीगणविलासरसमग्नः ! विलोक्य सहर्षं किं ब्रवीषि "कथं प्रियमित्रे मे कंदर्पविलासमन्दारशेखरौ ? अयं

वयमनल्पकालसमवेताः क्षणमात्रमत्र नलिनीपत्रास्तरे शारदतरुनिकरमारात्सहासिकासुखमनुभविष्याम"इति ? सखे ! तदिदमावयोरप्यभिलषितमेव । (*हस्ते गृहीत्वा*) सखे, एह्यु पविशावः । (*यथोक्तं कृत्वा*)

मदनमङ्गल ! निपुणं मां निरूप्य किं ब्रवीषि,

"अविश्रान्तः श्वासो वदनमतिशुष्कं तव सखे
भृशालस्या दृष्टिर्विषयमनुबद्धा न चलति ।
समस्तं त्वास्तां तत्प्रभवति हि हेत्वन्तरवशात्
कपोले धावल्यं कथयति रहस्यं किमपि मे ॥२५३॥

तत्कथय, कया पुनरिदं पदमवतारितो मे वयस्य"इति ? (*साश्चर्यम्*) अये, प्रयत्ननिगूहितेऽपि कथमनेन विज्ञातो मे विप्रलम्भविकारः ? मन्दारशेखर ! किं ब्रवीषि "सखे, कथं तह्य'नुक्तमप्यूहति पण्डितो जन इति वचनमयथातथमि"ति ? (*सविषादवैलक्ष्यम्*) सखे मदनमङ्गल, किमिह कृतेन वा न कृतेन दुर्लभजनानानुरागप्रस्तावेन ! तथापि प्रष्टरि सुहृदि भवादृशे न साम्प्रतमुपेक्षेति कथयामि[1] श्रूयताम्[2],—

पुरैकदा शृङ्गारचषकमुख्यैः सखिभिः शुक्लसितपञ्चदश्यां न्यग्रोधयात्राविलोकनकुतूहलेन पुरपरिसरसरस्तीरमुपागमम्, यस्य च नातिदूरे न्यग्रोधमूलभुवि समर्चिता पुरन्ध्रीभिर्भगवतो सावित्री । ततः,

तत्रागताः समदसिन्धुरमन्दयाना
नानाविधाम्बरविभूषणभूषिताङ्ग्यः ।
विद्युल्लता इव तपान्तघनापविद्धाः
पूजोपहारपरिसम्भृतपात्रहस्ताः ॥२५४॥

---

१. ख कथनीयमेव संवृत्तं ।
२. ख आकर्ण्यतां ।

सखे ! किं कथयामि, तदानीम्—

पूजापरिक्रमनमस्कृतिदानमुख्य-
तत्तत्क्रियोचिततथाविधविभ्रमैस्तैः ।
ताभिर्निरस्तविषयान्तरचित्तवृत्ति-
र्गाढं प्रमोदजलधौ विनिमज्जितोऽस्मि ॥२५५॥

अथ विविधपूजासम्भारभरितकनकभाजनकराभिः कतिपयसुवेषयोषाभिः परिवारिता कापि नितम्बिनी—

अन्तर्दृश्यार्द्धहारं तनुतरसिचयं वामवक्षोजकुम्भा-
दासज्यांसे तदन्यं शशिधवललसत्कञ्चुकाबद्धभुग्नम् ।
वक्षोजं दर्शयन्ती प्रपदधुतचलच्चेलविन्यस्तदृष्टिः
श्रोणीभारालसाऽपि त्वरितमुपगता स्वर्णभृङ्गारहस्ता ॥२५६॥

सखे, कथं तां वर्णयामि ! न खलु मुखे मे जिह्वासहस्रम् । पश्यसि चेज्जानासि स्वयमेव तद्रूपमासेचनकम् । किन्तु, तदानीम्—

अम्भोजासननिर्मितां क्षणचलां न्यक्कृत्य विद्युल्लतां
पञ्चास्त्रेण विनिर्मितां भुवि किमु स्थास्नुस्तडित्काऽप्यसौ ।
नेत्राग्निग्लपनासहिष्णुरथवा चान्द्री कला धूर्जटेः
सम्प्राप्ता किमिहेत्यतर्कि हृदि तामध्यक्षयद्भिर्जनैः ॥२५७॥

अथ सा सुन्दरी मन्दं मन्दं न्यग्रोधमूलतलमुपेत्य परिजनवितीर्णकनक[1]-मयकमनीयविष्टरसीम्नि चरणतलसमाश्लिष्टधरणिमण्डलैवोपविश्य दक्षिणजानुदेश-समावेशितबाहुमूला सव्यकरसरोजसमालम्बितवामचरणाग्रसीमा पार्श्वस्थित-

१. ख 'कनक' इति नास्ति ।

सैरन्ध्रिकाजनसमर्पितपूजोपकरणग्रहणसमयसिञ्जानमञ्जुमणिकङ्कणा आचार्यमुखमितिकर्त्तव्यतोपदेशेषु गन्धादिभाजनानि च गन्धाद्युपादानेषु देवता[1]धिष्ठानमुचितोपचारकल्पनायां कुचान्तरालसीमानमवान्तरपूजाविरागेषु[2] सलीलमनुक्षणमीक्षमाणा तत्राभिमतदेवतामभि[3]पूजयन्ती तत्क्षणमपजहार मनो मदीयमयस्कान्त इव कालायसक्षोदम् । ततः,

"मदालसपदार्पणे लुठदुदारतारावलि
प्रमुष्टवलिभोदरस्थलविकीर्णरोमावलि ।
परिक्रमशतं ततः प्रविरचय्य नत्वा मुहुः
स्वगेहगमनोद्यता बत बभूव सा सुन्दरी ॥२५८॥

तदानीं तामभिमुखीकर्त्तुकामेन मया अकाण्ड एवोच्चैराह्वानशब्दो विसृष्टः कमपि विदूरवर्तिनं परिचितपूर्वं प्रति[4] पृथग्जनम् । अथ तमाकर्ण्य ससम्भ्रमविभ्रमं मनागिव विवर्त्य वदनाम्बुजम्,

जीवंजीवसहोदरे दरदलत्पाथोजगर्वापहे
नीलेन्दीवरसुन्दरे निजकलाखञ्जीभवत्खञ्जने ।
प्रोष्ठीसौष्ठवभाजने शशिमुखी विस्फार्य सा लोचने
दृष्टिं मन्मथरिष्टिभासहचरीं स्तोकं मयि व्याकिरत् ॥२५९॥

आलोडितेव सा रक्तचित्ते रागिणि मामके ।
एकीभूता पृथग्जाता सखे नाद्यापि सुन्दरी ॥२६०॥

---

१. ख °दै° ।

२. ख °विरामेषु ।

३. क °अभि° इति नास्ति ।

४. क 'प्रति' इति नास्ति ।

ततः सा—

अनुरागमयीं विसृज्य मूर्त्तिं मम चित्ते गतिनुत्तराजहंसी ।
चलिता ललितं विलोक्य पश्चात्सहसा विस्मृतदर्शनच्छलेन ॥२६१॥

सखे, कथमिवाजनि त्वयि तावतैवानुरागप्रत्ययस्तन्वङ्ग्याः" इति ? सखे, अस्ति किञ्चिदनुरागप्रत्ययनिमित्तं मत्तकाशिन्याः ? किं ब्रवीषि "कथय सखे, श्रोतुमुत्सहते मे मानसमि"ति ? शृणु कथयामि—

संल्लापाय सखीजने परिजने चित्तानुवृत्त्यादरा-
ल्लोकेऽन्यत्र मनोज्ञविभ्रमवशादास्यं निजं पश्यति ।
द्वित्रास्तत्र तया प्रतारितजनालोकं मयि प्रेरिताः
स्निग्धापाङ्गदृशस्ततो मनसि तां मन्येऽनुरक्तामहम् ॥२६२॥

किं ब्रवीषि, "तर्हि स्थान एवानुरागप्रत्ययस्तन्वङ्ग्याः । भवतु, ततस्तत" इति ? ततस्तामहं गृहवहिर्द्वारदेहलीपर्यन्तमारादनुवर्त्तमानो निजचित्तवृत्तिमस्याः परिजनीकृत्य मत्तकाशिन्या गात्रमात्रसहायः कथमपि ततो निवृत्तोऽस्मि । तदाप्रभृति निजमनोरथघटनापटीयांसमाप्ततमं जनमन्वेषयन्नप्यलब्धमनोरथोऽहं निरन्तरमनुभवाम्येतादृशीं समवस्थाम् । (*परिवृत्यावलोक्य*) अये, कथमत्रैव वर्तते कमनज्योत्स्ना ? यावदेनामालापयामि । अयि कमनज्योत्स्ने ! कदाऽत्रागतासि त्रिभिरप्यस्माभिरनालक्षिता ? अनाकर्णितकेन किं ब्रवीषि, "विजयतामनुक्रोशलेशविधुरः कन्दर्पविलासः ।

उपेक्षारसनापीतरक्तकान्ताऽसुमारुते ।
भुजङ्गशब्दो रसिक नूनमेवार्थवांस्त्वयि ॥"२६३॥ इति ?

(*सहर्षौत्सुक्यम्*)

अयि कमनज्योत्स्ने ! मदुपालम्भगर्भोऽपि तावकवचनसन्दर्भोऽयमनुरक्तकान्तागमपिशुनो मे समास्वाद्यतापदमधिरोहति मत्स्यण्डिकाप्रचुर इव कटुम्भरा-

क्षोदः । तत्कथय का नाम रक्ता मया समुपेक्षिता ? सोत्प्रासं किं ब्रवीषि "अहो आश्चर्यमेतत् !

द्वित्रास्तत्र यया प्रतारितजनालोकं त्वयि प्रेरिता ।
स्निग्धापाङ्गदृशः कथं शशिमुखी सैतावता विस्मृता ॥" इति ?

(*सहर्षमात्मगतम्*)

अयि, कियान् मयि विधेः पक्षपातः, यः पुनरेवमेतस्या मुखेन सपदि[1] पीयूषमयान्यक्षराणि श्रावयति ! अथवा, किमियं मां मिथ्याप्रत्याशाप्रदर्शनेन प्रतारयति ? न जानेऽहं परिहासशीला । भवतु, तावदेवं ब्रवीमि । (*प्रकाशम्*) अयि, कमनज्योत्स्ने । किं फलं तवाऽमुना परिहासेन ? किं ब्रवीषि "निसर्ग एवायं धूर्त्तानां ये पुनरन्नीहितं परिहासपदेन परिहरन्ती"ति ?

मदनमङ्गल ! किं ब्रवीषि ? "सुतनु, मैवं वादीः । वाञ्छितमेवात्मनः परिहासशङ्कोत्थापनेन द्रढयति मे वयस्य" इति ? मन्दारशेखर ! सहर्षौत्सुक्यं किं ब्रवीषि "अयि कमनज्योत्स्ने ! सत्यमेव सख्युर्मे समुपेक्षा तां बाधत" इति ? कमनज्योत्स्ने ! सोपालम्भं किं ब्रवीषि "अयि ! कठिनहृदय कन्दर्पविलास ! मित्रमसीत्येवं ब्रवीमि ? किमुच्यते बाधत" इति ? शृणु तावदवहितः,

अस्योपेक्षा कपटसविषक्रूरनाराचदीर्णे
तस्याश्चित्ते युगपदिषवो मान्मथाः सम्पतन्तः ।
कृन्तन्ति द्राक् तदपि लवशो मूर्त्तमप्यन्यथा चेत्
किं पुष्पाणां भवति पटिमा पाटने वा तृणानाम् ॥२६४॥

अये किं कथयामि मदनदवानलप्लुष्टशरीरयष्टेस्तस्यास्तां समवस्थाम् ? कुशला खलु सीमन्तिनी,

---

१. ख नास्ति ।

पीनोत्तुङ्गस्तनकलशयोस्तारहारं न धत्ते
हस्तेनापि स्पृशति सहसा नैव कर्पूरवीटीम् ।
मञ्चं नापि श्रयति शयितुं हंसतूलास्तराढ्यं
तादृक् तन्वी गुरुजनभयाद् गोप्तुकामा स्वतापम् ।।२६५।।

किञ्च,

गण्डे पाण्डौ कलयति पुनश्चान्दनान् पत्रभङ्गा-
न्निद्रालाभे स्वयमरुणदृक् पृच्छति त्वान् निदानम् ।
प्रत्यासन्ने मधुरलपिते गृह्यके कीरशावे
कण्ठे धत्ते कमलनयना चारुवैदूर्यहारम् ।।२६६।।

कमनज्योत्स्ने ! कथमिदमवगत भवत्या ? किं ब्रवीषि "शृणु कथयामि, सा किल[1] कलहंसगमना कुलदैवतयात्रार्थमास्तनन्धयस्थविरं प्रस्थितेषु स्वजनेषु स्वयमनिवार्यतरमदनवेदना शिरोवेदनाव्याजेन सदनावस्थितिमनुननाथ स्वनाथ-मि"ति ? सत्यमसुखिताय मनसे न रोचत एवोत्सवारम्भः । कथ्यतामथ तत्पतिना किमादिष्टम् ? किं ब्रवीषि "तेन तथेति कतिपयभुजिष्याजनं तद्गोपने समादिश्य तथैव प्रस्थितमि"ति ? अतिऋजुरयं वैधेयः । भवतु, ततस्तया किं व्यवसितम् ? किं ब्रवीषि "ततः सा दुर्निवारतरमदनशरसम्पातवेदना-मसहमाना तत्र तत्र चिरकर्त्तव्ये कर्मणि परिजनमशेषं नियोज्य सदनो-द्यानमात्मनस्तापापनोदहेतोः प्राविशत् । तदानीमहमपि विदितवृत्तान्ता तत्रारामे प्रविश्य तस्याश्चरित्रमवगन्तुकामा केसरतरुतिरोहितशरीरा न्यवसमि"ति ? किं ते सा परिचितपूर्वा पूर्वेन्दु[2]मुखी ? किं ब्रवीषि "अयि,

---

१. ख खलु ।
२. क °र्णेन्दु° ।

किमुच्यते मदीयहृदयाददवीयसी सा सुदती मे वयस्ये"ति ? भवतु[1], ततस्तत: ? किं ब्रवीषि "तत: सा शातोदरी,

पञ्चत्वं यान्तु बाणा: समयपरिणतस्ते विदीर्णोऽस्तु चाप:
क्रूरक्रूरा हि वक्त्रं विशतु तव रथो मा भव त्वं शरीरी ।

अथवा,

किं ते शापेन मादृग्युवतिवध[2]महापातकिन् मीनकेतो
शप्य: पाथोजयोनि: स खलु रचितवान् पापिनो दीर्घमायु: ।।२६७।।

मन्दारशेखर ! किं ब्रवीषि "सखे, क्रुद्धापि सा नहि निसर्गादधिकं शशाप सरलहृदये"ति ? कमनज्योत्स्ने, किं ब्रवीषि "इति कृतमदनोपालम्भा स्वहस्तनलिनोपचित[3]नलिनीपत्रास्तरे सन्तापनिर्वाणाय कलेवरमपातयत् । तेन पुनरुक्तसन्तापा पुनरेवमूचे हरिणाक्षी,

नलिनच्छदतापहं भवन्तं वदता हन्त जनेन वञ्चिताहम् ।
अभजं कुरुषे त्वमङ्गदाहं न दहेर्हन्त कथं कृपीटयोने ।।२६८।।

(*सविमर्शम्*)

इति सा चिरतरं विलप्य नयनसलिलेन सह नलिनशयनमप्युत्सृज्य स्वप्राणप्रहाणाय मतिं व्यतनोदि"ति ? (*सविषादोच्छ्वासम्*) धिगिमं मां नृशंसम्,

क्रूरं प्रशंसति विषं सकलोऽपि लोक-
स्तच्चर्वितं हरति जीवितमन्यथा नो ।

---

१. ख नास्ति ।
२. ख जन ।
३. ख °नाऽपचित° ।

क्रूरस्ततोऽपि नितरामहमेव यस्मात्
प्राणान् हरामि तव सुन्दरि दृष्टमात्रः ॥२६९॥

मन्दारशेखर ! किं ब्रवीषि "कमनज्योत्स्ने ! ततः परं किं संवृत्तमि"ति ? (सदैन्यम्[1]) अयि कठिनहृदय ! विरम[2] विरम, मा पृच्छैनामनन्तरवृत्तान्तमहं श्रोतुं बिभेमि। कमनज्योत्स्ने ! किं ब्रवीषि "अये, किं कथयाम्यसुत्यागसाहसिक्यं ततस्तस्यास्तन्वङ्ग्याः !

"चलति ललितवाते पद्मसम्पर्कशीते
सिचयमथ निरस्य द्रागभूदभ्यमिख्या।
सृजति मधुरनादं कोकिले बालचूते
त्वरितमनुससार श्रोत्रमग्रेऽर्पयन्ती" ॥२७०॥ इति ?

(सबाष्पगद्गदम्)

हा हन्त प्रियतमे ! दारुणोऽयम्। अहमेव निमित्तं ते जीवितात्यये। न चेदेवम्—

सितांशुः शीतांशुर्मलयपवनोऽतीव शिशिरः
स्मरो रत्या युक्तो मधुरधिगतोदारसुमनाः।
कुतस्ते बाधेरन् सहजसरलास्त्वां प्रियतमे
हराम्येष प्राणान् सहजकुटिलोऽहं हृदि वसन् ॥२७१॥

कमनज्योत्स्ने ! किं ब्रवीषि "अलं ते परिदेवनकार्पण्येन। तदनन्तरवृत्तान्तमाकर्ण्यताम्।

---

१. ख नास्ति।
२. ख नास्ति।

ततोऽहमसाम्प्रतं विलम्ब इति निश्चित्य, ससम्भ्रममुपसृत्य करे तां गृहीत्वा, 'अलमबले, तवैवंविधसाहसाम्बुधि[1]विलङ्घनेनेत्यवोचम् । तत्क्षणमेव सा मामुद्वीक्ष्य विलक्षमुखी चकिता लज्जिता च बभूव । तदानीं मयेत्थमुदीरितम्—

अयि प्रियसखि ! कलहंसलीले !

दारा गुरोः किमभजच्छशिनं न तारा
स्वाराज्यधुर्यमपि गौतमधर्मपत्नी ।
सृष्टा त्वयाद्य किमियं पदवी नवीना
पूर्वार्चितां सरणिमेत्य विलज्जसे किम् ॥२७२॥

तत्कथय यदि मयि ते विस्रम्भः, को नाम मनसस्ते पश्यतोहरो विलासी, यदर्थं भवत्या ईदृशदशा स्वकीयं[4] प्रथयति स्वामित्वमव्याहतमि"ति ? तदानीं प्रसादसुमुखी मामालोक्य स्तोकं विहस्य—

वेत्ति स्मरः परमिदं सखि मे रहस्यं
चित्रं न तद् वसति चेतसि सन्ततं यत् ।
त्वं वेत्सि चित्तगतमेतदतीव चित्रं,
अथवा
धीशालिनामविषयोऽस्ति धियो न किञ्चित् ॥२७३॥

---

१. क °साब्धि° ।
२. क स्पृष्टा ।
३. क °मिदं ।
४. क नास्ति ।

सखि तथापि लज्जेऽहमीदृश[1]चरित्रमात्मनो भवत्या[2]मपि निवेदयितुमित्युक्त्वा विनम्रमुखी विरराम। अथ मया शपथसहस्रै[3]र्निर्बध्यमानया तयेत्थमुदीरितम्—

अयि, किं[4] कथयामि मन्दभाग्याऽहम्? अतीतायां शुक्लशितपञ्चदश्यां[5] न्यग्रोधमूलभुवि भगवतीं सावित्रीमभ्यर्च्य विनिवृत्तायां[6] मयि तदानीं कोऽपि विलासी मामभिमुखीकर्त्तुकाम एव निष्कारणमेकमाजुहावोच्चैस्तरां प्राकृतजनमिति।

मन्दारशेखर! सश्लाघं किं ब्रवीषि "अयि, कुशलाऽसि कलहंसलीले! सम्यग् ज्ञातमाकूतं त्वया मे वयस्यस्ये"ति? कमनज्योत्स्ने! ततः सा किमाह? किं ब्रवीषि "एवमाह—

द्राक्षामरन्दमाक्षिकपीयूषैरप्यलब्धमाधुर्यः।
तस्य स कोऽपि निनादस्तदभिमुखं मन्मुखं चक्रे ॥२७४॥

अथ मया सोऽयं विलासी—

कौसुम्भोष्णीषलोलद्विकचविचकिलापीडसन्ताडितांसो
वीटीरक्ताधरोष्ठो घुसृणरसलसच्चित्रकोदारभालः।
स्तोकं जल्पन् वयस्यैः किमपि परिहसन्नन्तरा मां प्रपश्यन्
दृष्टो हस्तेन पुष्पस्रजमुपरि परिप्रक्षिपन्नाददानः ॥२७५॥

---

१. क °शी।
२. क नास्ति।
३. ख °शतैः।
४. ख कथं।
५. ख पुरपरिसरसरस्तीरे इत्यधिकम्।
६. ख प्रतिविर्त्तमानायां।

तदानीम्—

निशातानुद्वीक्ष्य प्रसवशरबाणान्निपततः
प्रपेदे त्रातारं तमतिभयलोलं मम मनः ।
तदङ्गाप्यङ्गेषु भ्रमदपि तदीयेषु बहुधा
न विश्रान्तिं क्वापि व्रजति न परावर्त्तत इतः ॥२७६॥

(इति सहर्षाहङ्कारम्)

पञ्चापि मुञ्च मयि पञ्चशराशुबाणान्
पञ्चत्वमेतु वपुरद्य निसर्गलोलम् ।
एतावताऽद्य न बिभेमि यतः प्रियाया-
श्चित्ते वसन्नमृत एव मृतोऽपि धन्यः ॥२७७॥

भवतु, ततस्ततः ? किं ब्रवीषि "इत्युदीर्य सा क्षणमात्रं निःश्वस्य पुनरेवं व्याजहार –

सखि[1] । किं कथयामि तस्य विलासिनः प्रथमावलोकनात् प्रभृति क्रूरतरस्मरशरसन्तापित[2]हृदयाया मे दुःस्थताम् !

निगूढः सन्तापः कलयति हृदुन्मूलनहतं
प्रवाहः संरुद्धस्तटमिव मिलद्भूरिसिकतम् ।
सविश्रम्भेऽपीदं गदितुमथ शङ्के सखिजने
कुलस्त्रीणां छाया यदपि भयहेतुः स्ववपुषः ॥२७८॥

---

१. ख अयि ।
२. ख °डित° ।

हा हन्त कठिन[1]हृदयः खलु पुरुषलोकः, अन्यथा

मामेवं किमुपेक्षते स रसिकः ?

अथवा,

नो वेत्ति किं मे दशाम् ?

(सनिःश्वासम्)

यद्येवं कः पुनरितो वदेत्तस्य दुरवस्थाम् ?

(सविमर्शम्)

तत्र ज्ञातदशेन किन्नु वसता चित्तेन नावेदितम् ?

(सविषादम्)

अये विरलाः खलु परव्यसनेन व्यसनिनः[2]। अतो मनः कुतः कथयेत् ?

(पुनः सविमर्शम्)

चित्तं वा न वदेत् कथम् ?

(सदैन्यम्)

तेन मे कः सम्बन्धः ? (पुनः सविमर्शम्)

मम पुनस्तन्मेऽन्तरङ्गं न किम्

(सबाष्पगद्गदम्)

---

१. ख कठोर°।

२. नास्ति।

अलमन्येन विचारेण ।

नूनं पञ्चशरेण तच्छितशरैर्हा हान्तरा चूर्णितम् ।।२७९।।

इत्युदीर्य कश्मलमुपागतां तां विविधोपचारैः सन्धुक्षितचेतनां विधाय, सखि, मा विषीद, कथय तस्य विलासिनो यत्किञ्चिदभिज्ञानम् । अहमेव तमिह समानीय त्वया सह संघटयामीति[1] भाषमाणायां मयि सम्प्रहृष्टाशया सा पुनरेवं व्याजहार । अयि, किं कथयामि —

लावण्यश्रीः प्रवेणि[2]र्विलसति किमपि श्यामल[3]श्मश्रुरेखा
कर्णाभ्यर्णे विलोलं कलयति वसतिं किञ्च नेत्राञ्चलञ्च ।
एतावत्तस्य जाने विस्मृमरविलसत्कान्तिपूरे शरीरे
द्रष्टुं मे क्वावकाशः सखि कथय तदा भीतिलज्जाहृतायाः ।।२८०।।

इतीदमाकर्ण्य, सखि, किमनेन साधारणेन ! कथय किञ्चिदसाधारण-मित्यवोचमि''ति ?

मन्दारशेखर ! किं ब्रवीषि ''कमनज्योत्स्ने ! तदेतत्प्रष्टव्यमेव, निपुणमपृच्छः'' इति ? कमनज्योत्स्ने ततः सा किमाह ? किं ब्रवीषि ''अथ सा नभःस्थले निभृतनिहितवामदृष्टिः क्षणमेकं विचिन्त्य,

अङ्को यथा भगवतः शशलाञ्छनस्य
चिह्नं किमप्युरसि दक्षिणतोऽस्ति तस्य ।
अंसाद् विलासगलिते प्रतनूत्तरीये
दृष्टं मनागपि मया तनुकान्तिमग्नम् ।।२८१।।

---

१. क-ख °यिष्यामीति ।
२. क °णी° ।
३ ख ला° ।

इति व्याजहार । तेनाहमेवंविधाभिज्ञानोपलक्षितः कन्दर्पविलासाद-न्योऽत्र नास्ति विलासोऽति निश्चित्य तां सखीमकारणकारुणिकाया भद्रजटायाः करे निक्षिप्य त्वदन्तिकमुपागताऽस्मि । दैवादिदानीमकृतपरिश्रमा प्रियसख्यां प्रणयवन्तं भवन्तमवेदिषञ्चे"ति ? मन्दारशेखर ! किं ब्रवीषि "सखे, भवान् दिष्ट्या वर्धते, यतस्ते वाञ्छितार्थघटनायां धृतपरिकरा भगवती भद्रजटा सखी चेयं कमनज्योत्स्ने"ति ?

सखे, नातिचरतु व्याहारमभिधेयः ।

(*हस्तादवतार्य मणिकटकमर्पयन्*)

अयि प्रियायाः प्रियसखि ! निसर्गदयार्द्रहृदये, किं दातुमीशे तवैवं-विधोपकारानुरूपमहं पारितोषिकम्, तथापि गृहाणेमं मणिवलयममृतांशुरिव सलिलार्घ्यम् । अयि[1], सहर्षप्रश्रयं किं ब्रवीषि "अयि सरसहृदय ! मन्येऽह-मात्मनः प्रिय[2]सखीजनमनुस्पृशन्तं तावकमनुरागमुपलभ्यमानमेव पूर्णपात्र-शतादतिरिक्तम् । अतः किं मे मणिवलयेन, तथापि न लङ्घनीयस्तवायं प्रसादः ! तावदत्र सखिसनाथेन भवता सुस्थितेन भवितव्यम्, यावदहं ते प्रियान्तिकात् पुनरागमिष्यामी"ति ? (*सहर्षम्*) गच्छ, गच्छ सन्तु शिवास्ते पन्थानः । अव्या-हतं चिकीर्षितं त्वमपि तत्रैव गच्छ, वयमितः सरस्तीर[3]माधवीमण्डपमनुसरि-ष्यामः । (*कतिपयपदानि गत्वा श्रवणमभिनीय*) कोऽयमितः स्त्रीजनाक्रन्द इव श्रूयते । (*अग्रतो गत्वा, विलोक्य*)

यावदभिमुखमापतन्तीं कलभाषिणीमाहूय पृच्छामि, अये[4] कलभाषिणि ! कस्यायमाक्रन्दः ? किं ब्रवीषि "किं कथयामि, स ताडयति हताशो भार्यामसूया-

---

१. क अथ ।

२. क नास्ति ।

३. क नास्ति ।

४. ख अयि ।

ग्रन्थिस्तस्या अयमाक्रन्द''इति ? को हेतुरस्य सन्ताडने तन्वङ्ग्याः ? अनादरमित्र किं ब्रवीषि "को वेद तस्य दुराचारस्य चरित्रम्[1] ? त्वमेव पृच्छ, गच्छे''ति ? भवतु, तमहं साक्षादेव पृच्छामि ।

(*गत्वा विलोक्य*)

कषन्दन्तैर्दन्तान् मुहुरथ दशन्दन्तवसनं
सहुङ्कारं पश्यन् विकटविवृता[2]ताम्रनयनः ।
शपन्नुच्चैर्मध्ये किमपि विरमन्नुद्यतकशः
प्रधावन्तीं विष्वक् प्रहरति स एनामनुसरन् ॥२८२॥

भवत्वेनं निवारयामि । (*उपसृत्य करे तं गृहीत्वा*) जडमते ! किमर्थं ताडयसि, धर्मदारान् ? सविषादं किं ब्रवीषि "महानुभाव, किं कथयामि,

सूते सुतान् प्रतिसमं प्रतिवेशिनी मे
नाद्याप्यसूत तनयं गृहिणी वरा की ।
तस्या विलोक्य तनयान् हृदि जाततोदः
सन्ताडयामि तदिमामधुनाऽनपत्याम्'' ॥२८३॥इति ?

अये, न केवलमस्या एव दोषादनुदयः पुत्राणाम्, किन्तु[3] तवात्र दोषोऽपि कारणं भवति । तत्किमेनामभि[4]ताडयसि ? किं ब्रवीषि,

"नो पर्वाणि न संक्रमो दिनमणेर्नैवोपरागद्वयं
नो सन्ध्ये न दिनं न वा मृततिथिः पित्रोर्मया लक्षिताः ।

---

१. ख विलसित ।
२. ख विवृतविकटा° ।
३. क नास्ति ।
४. ख मुधा ।

अस्नाताधिगतार्त्तवैव वहुधा सेयं मयाऽऽसादिता
गर्भो नैव धृतोऽनया पिशुनया को नाम दोषो मम" ॥२८४॥ इति ?

मन्दारशेखर ! सस्मितं किं ब्रवीषि "अयि, सुब्राह्मण ! भवन्तमुचितकाले भार्यागामिनं को नाम कथयेत्सदोषमि"ति ? ब्राह्मणि, किं ब्रवीषि, "अये अहमपि किं करोमि--

यो यः पुम्पदमुद्वहन् मम दृशोः पन्थानमभ्यागत-
स्तत्रैकोऽपि मया न मुक्त इति न प्रायो विना बालकान् ।
तत्त्यागे किल योग्यता विरहिता हेतुर्न चानादरः
किं वक्ष्यामि तथापि नाजनि सुतो दोषोऽपि मे कीदृशः ॥२८५॥

मदनमङ्गल ! किं ब्रवीषि "अहो साहसमस्या[1] ब्राह्मण्याः, या पुनः पतिसमक्षमीदृशमात्मनः कुरूपं चरित्रमुद्घाटयन्ती न बिभेती"ति ? ब्राह्मणि ! किं ब्रवीषि, "अये ! के नाम तद्धितमाचरन्तस्तस्मात् जगति बिभ्यती"ति ? (*सस्मितम्*) अयि, ब्राह्मणि ! कीदृशं हितं पत्युस्ते स्वैराचारेण ? किं ब्रवीषि "महानुभाव ! किं त्वं न जानासि पतिमेनं पितृधोरणादुद्धर्त्तुकामया मया[2] पुनरकारि क्रियते करिष्यते चैवंविधः पुत्रोत्पादने व्यवसायः । तस्मादस्मात्कुतो विभेमी"ति ? अयि ब्राह्मणि ! आस्तामिदम्, नरकपाताद्वा कथं न बिभेषि ? किं ब्रवीषि "तदपि भयं श्रीमद्यज्ञवराहसुबोधाचार्यनाम्नः पौराणिकप्रवरस्य वचसा सुदूरमुत्सारितमेवे"ति ? अयि, कथय कथय, कथमुपदिष्टस्तेन धर्म इति ? किं ब्रवीषि "शृणु कथयामि—

तप्तकालायसस्तम्भे तीक्ष्णकण्टकदन्तुरे ।
बध्नत्या कण्टकोद्भेदं योषितं परगामिनीम् ॥२८६॥

---

१. ख मेतस्या ।
२. ख नास्ति ।

इत्येकदा पौराणिकगाथां निशम्य निर्वेदभयोद्विग्नहृदयाऽहं न्यवसम्। अथ सोऽयं पुराणतत्त्वपारदृश्वनामाचार्यः निशि लब्धावकाशो यथापूर्वं मामुपेत्य परिरब्धुमारभमाणो मया प्रतिषिद्धपरिरम्भः सखेदं परिरम्भनिषेध-कारणमन्वयुङ्क्त। अथाहं पुरत[1]स्तस्य गाथां यथा[2]श्रुतमुपन्यस्य तेनाहं बिभेमि परपुरुषाभिगमनादित्यवोचम्। इदमाकर्ण्य क्षणं विहस्य सोऽयं मामवादीत्। मुग्धे, किमेतावदेव भयनिदानम्! सरलहृदये! तर्हि सर्वथैव वञ्चितासि केनापि पुराणतत्त्व[3]लेशानभिज्ञेन पौराणिकहतकेन। अतोऽजनि मनसि तवेय-मत्याहिताशङ्का। अस्य तत्त्वं त्वन्यदेव। शृणु, कथयामि—

कल्पादौ कल्पितस्तम्भ इदानीं लुप्तकण्टकः।
तत्र बद्धास्तु विन्दन्ति तूलशय्यासुखं स्त्रियः ॥२८७॥

इति, तेनोपपत्तिमता वचनेन निरातङ्कास्मि संवृत्ते"ति ?

(*सशिरःकम्पम्*)

तर्ह्युपपद्यते ते निर्भयस्वैरचारिता। भवतु, सुखमास्व त्वम्, वयं तु गच्छामः। (*कतिपयपदानि गत्वा पुरो विलोक्य*) सखे, केयं सोद्वेगमनुक्षण-परिस्खलच्चरणा तरुणी समापतति ? भवत्वे[4]नामालापयामि। अबले! का त्वम्? कुत इदानीं क्व प्रस्थितासि ? सोद्वेगं दीर्घमुष्णञ्च निःश्वस्य किं ब्रवीषि "महानुभाव! किं कथयामि, धर्मोज्जीवनस्य मम स्वामिनो मध्यम-पुत्रस्य विलासबन्धोरद्वितीय[5]लावण्यसीमा, द्वितीया कलहंसलीला नाम[6]

---

१. क नास्ति।

२. ख नास्ति।

३. क नास्ति।

४. ख यावदे°।

५. क अतीव।

६. क निज°।

कुलदैवतयात्रार्थमास्तनन्धयस्थविरं प्रस्थितेषु स्वजनेषु, दुर्वारतरशिरोवेदनया दूयमाना, तँगृंह एव विसृष्टा वनविहारविनोदेन तामेव वेदनामपनेतुकामा, गृहारामे प्रविश्य तत्र दलितललितकमलकलितविमलकमलकमलाकरविहार-तुषारगिरिसमीरकिशोरसम्पर्कनवीकृतप्राक्तनवेदना, तत्र क्षणमात्रमपि धृतिम-वष्टम्भयितुमकुशला, ततः परावृत्य, पुनरपि केलिगृहपर्यङ्काङ्कोपहिततनुरवि-रतकृतपरिवर्तना, तत्क्षणमेव पश्यन्तीनामस्माकमदृश्या बभूव । तदिदमत्याहितं तद्बन्धुभ्यो निवेदयितुं गच्छामी''ति ?

(दीर्घमुष्णञ्च निश्वस्य, अश्रूणि विसृज्य)

हा हन्त हतोऽस्मि भग्नभागधेयः, न प्रभवामि श्रोतुमपि सुस्थितां तां प्रियतमाम् । *(क्षणमात्रं विचिन्त्य)*

भो भो प्रियमित्रे ! कथमेतत्कथयतम् ।

अकाण्डेऽदृश्याऽभूत्सुतनुरिति मिथ्यैव कलये

(विमृश्य)

अथवा

हृता स्यात्किं भूतैः

(पुनः सविमर्शं सविषादञ्च)

अलमिह वितर्केण बहुना,
विलीना हेमाङ्गी स्मरदहनसन्तापिततनुः ॥२८८॥

(सबाष्पगद्गदम्; आकाशे लयं बध्वा) प्रिये कलहंसलीले,

लुटण्टाकेन हृते हृषीकनिबहे कामेन यत्नान्मया
चित्तं न्यस्तमपि त्वयि प्रियतमेत्यत्यन्तविश्रम्भतः ।

कृत्वा न प्रतिदानमस्य भवती कुत्राप्यभूत्प्रस्थिता
नि[१]श्वासः क्व नु योषितः क्व नु पुनर्धिङ्मादृशं बालिशम् ॥२८९॥

(पुनर्विमृश्य)

सुन्दरि[२], मन्मनोमूल एवायमत्याहितापातः । तदेतदाकर्ण्यताम्—

कृत्वा मे हृदयं शरव्यमबले क्षिप्ताः स्मरेणेषव-
स्तत्त्वां लोलमुपेत्य शश्वदयि तं चक्रेऽपराद्धाम्बकम् ।
क्रुद्धस्तेन[३]नितान्ततीव्रविशिखैश्चिच्छेद स त्वां न चे-
दुच्छेत्तुं प्रभवेत्कथं नु भवतीं स्वप्रेयसीभ्रान्तिदाम् ॥२९०॥

(सबाष्पम्)

हा हन्त हन्त किमतः करोमि ! प्रियतमे !

चक्षुःप्रीत्या तव मनसि मे रोपिता हर्षवल्ली
वार्त्ता वृष्टेः[४] कमपि समयं म्लापिता नोपलब्धा ।
सख्यास्तादृग्वचनसुधया भूय उत्पल्लवाऽभूत्
सेयं कृत्ता शिव शिव तवाश्लीलवार्त्तालवित्रैः ॥२९१॥

(साञ्जलिबन्धमाकाशे लक्ष्यं बध्वा)

मदनमलयवायो माधवाङ्गे किमर्थं
मम कलयथ तापं किं मया वोऽपराद्धम् ।

---

१. क·ख वि॰ ।
२. क नास्ति ।
३. क क्रुन्तस्तेन ।
४. क दृष्टे ।

(क्षणं विचिन्त्य, दीर्घमुष्णञ्च निःश्वस्य)

विधिहृतदयिताशा वर्मं दृष्ट्वा मदङ्गं
बत बत धृतवैराः किं न कुर्युर्भवन्तः ॥२६२॥

(सदैन्यमनङ्गं प्रति)

शीतांशुः खलु राहुवक्त्रगलितोद्गीर्णः समन्दानिलः
पाटीराद्रिभुजङ्गवक्त्रखुरलीखेलारतः सन्ततम् ।
युक्तस्तस्य च तस्य मादृशवधः कामोऽसि लोकप्रिय-
स्त्वं हंसि स्मर हन्त किन्नु कथयाम्यन्यो विधेः प्रक्रमः ॥२६३॥

(पुनर्दीर्घमुष्णञ्च निश्वस्य सबाष्पगद्गदम्)

त्वदाशया परिष्टब्धानसून् वपुषि वल्लभे ।
शक्नोमि नो धारयितुं त्यजामि स्वस्त्यतोऽस्तु मे ॥२६४॥

(पुनर्विचिन्त्य)

इदमपि दुर्लभं मे मन्दभाग्यस्य । यतः पूर्वमेव मया ते विप्रलम्भवेदनासहतया प्राणप्रहाणे व्यवस्यता—

माकन्दस्तवकस्रवन्मधुरसः पीतः प्रसूनास्तरे
न्यस्तं किञ्च कलेवरं मलयभूवायुः समालिङ्गितः ।
दृष्टा पद्मवनी चिरं परभृतालापः समाकर्णितो
धिक्केनापि गतं न जीवितमिदं त्यक्ष्यामि हा हा कथम् ॥२६५॥

मन्दारशेखर ! किं ब्रवीषि "उपसंहर सखे शोकावेगमेनं कमनज्योत्स्नायाः समागमपर्यन्तम् । तस्या मुखेन सम्यगिदमाकलय्य ततः समीहितमाचरिष्याम" इति ?

(*सदैन्यनिश्वासम्*)

सखे, मन्दारशेखर, कृतं ते प्रत्याशावर्त्त[1]परिवर्त्तनेन ।

का नाम कमनज्योत्स्ना कुतस्तस्या इहागमः ।
कृत्तमूले तरौ हन्त फलोदयमपेक्षते[2] ॥२६६॥

(*वामतोऽवलोक्य*)

केयमतित्वरितगतिः समापतति सीमन्तिनी ? यावदेनामालापयामि ।

अयि सीमन्तिनि, [3]कुतस्त्वं समागता ? किं ब्रवीषि "महानुभाव[4], महाकूटतः पुण्यक्षेत्रादि"ति ? अयि, सम्प्रति सम्प्रवर्त्तमाने भगवत्याः कात्यायन्याः पुष्परथमहोत्सवे त्वमितः समागताऽऽसीत्याश्चर्यम् । किं ब्रवीषि "महानुभाव ! परतन्त्रः खलु सर्वथैव दासीजनः । अतः प्रत्यासन्नमपि देव्याः पुष्परथमहोत्सव-मुत्सृज्य स्वस्वामिनिदेशात्तद्गृहानितो गच्छामी"ति ? कस्ते स्वामी येनेदानीं त्वमेवमादिष्टा ? किं ब्रवीषि "स खलु विश्रुतो धर्मोज्जीवन" इति ?

(*आत्मगतम्*)

नूनमस्या मुखेन व्यक्तीभविष्यति प्रियायाः कृत्स्न एव वृत्तान्तः । (*प्रकाशम्*) स किमर्थं त्वामितः प्रेषितवान् ? किं ब्रवीषि "श्रूयताम्, सा खलु कुलदेवतास्वामिनो मे[5] भगवती[6] । धर्मोज्जीवनस्य तद्यात्रायां तत्कुलजनैर्निः-शेषतया गन्तव्यमिति तद्गृहेष्वनद्यतन आचारः । इदानीं तु स्वामिना मे यात्रार्थं

---

१. ख प्रत्यावर्त° ।

२. ख फलागममपेक्षते ।

३. ख इदानीमित्यधिकम् ।

४. क नास्ति ।

५. क नास्ति ।

६. क °तो । ख भगवती इति नास्ति ।

प्रस्थितेन भूयिष्ठशिरोवेदनया दूयमाना निजवधूः कलहंसलीला गृहे एव विसृष्टे''ति ?

(सहर्षशोकमात्मगतम्)

अये, किमियं कथयिष्यति, प्रियागतं प्रियमप्रियं वेति सुखदुःखयोरन्तरालमव[1]लम्बते मानसम् । भवतु पृच्छामि । (प्रकाशम्) अयि, ततः परं किं संवृत्तम् ? किं ब्रवीषि ''तदनु तत्र गत्वा कुलदेवतां तां विविधपूजोपहारैः सन्तर्प्य प्रगतोपविटेषु सकलजनेषु अकाण्ड एवाधिष्ठानाद्देव्याः वागेवं निःससार । अरे रे धर्मोज्जीवन,

यदार्यकृतमर्यादा भवता जाल्म लङ्घिता ।
तदद्य ते स्नुषा गेहान्नीता सा योगिनीगणैः ।।२९७।।

अन्योऽप्यनर्थो भविता भवत्सु गृहगामिषु ।
यदीच्छसि पुनर्भद्रमेवं मासत्रयं कुरु ।।२९८।।

अत्रागत्य महाक्षेत्रे मम पूजापरायणैः ।
स्थेयं भवद्भिरखिलैर्दासदासीजनावधि ।।२९९।।

पूजा जपो बलिर्होमस्तर्पणं विप्रभोजनम् ।
कर्त्तव्यमन्वहं सर्वैर्भवद्भिर्नक्तभोजिभिः ।।३००।।

तत्सख्या प्राणसमया दीपा देया गृहे निशि ।
हंसतूलमयी शय्या क्षीराभप्रच्छदाम्बरा ।।३०१।।

अनुलेपनताम्बूलमाल्यानि विविधानि च ।
तृप्यन्तु डाकिनीमुख्या योगिन्य इति भक्तितः ।।३०२।।

१. ख आलम्बते ।

आप्रारम्भादाविरामं कर्त्तव्यमिदमेकया ।
प्रमादः स्यादन्यथा चेदित्युक्त्वा विरराम सा ॥३०३॥

अथ तेन मम स्वामिना तदाकर्णनसमय एव समुद्विग्नान्तरात्मना श्रोत्रियेभ्यो धेनुसहस्रविश्राणनं प्रतिश्रुत्य, लुलाय[१]बलिना पिशितासवाभ्यां च सन्तर्प्य, पुनरपि वधूलाभाय सं[२]प्रार्थिता भगवती भवानी"ति ? अथ किमाह देवी ? किं ब्रवीषि, "न किमपी"ति ?

मन्दारशेखर ! किं ब्रवीषि "अथ स्वामिना ते किं व्यवसितमि"ति ? अबले, किं ब्रवीषि "ततश्च स्वामिना मे न खलु विफलीकृतभक्तानु[३]सरणपरिश्रमाणि दैवतानीति निश्चित्य, तदुदीरितमशेषमुररीकृत्य, स[४]वत्सायाः कलहंसलीलायाः प्राणातिरिक्तां सखीं[५] कमनज्योत्स्नां तादृशविधेयेषु नियोज्य, गृहजनमशेषमिहानयेति, प्रहितास्मी"ति ? (*सनिःश्वासम्*) सपदि मयि मन्दभाग्ये विमुखी जाता सापि[६] भगवती भवानी, नैव यया प्रसादीकृतः प्रार्थितयाऽपि मत्प्रियाया पुनरागमः । (*सबाष्पगद्गदम्*) प्रिये कलहंसलीले ! त्वयैवेदानीं[७] देव्यापि परिवञ्चितः किं करोत्वशरणो विधिहतकहतः कन्दर्पविलासः । शृणु[८]भवत्याः,

चक्षुःप्रीत्या प्रणयगरिमव्यञ्जकैस्तैर्विलासैः
सख्या वाक्यैर्वरतनु मृषा दर्शितः स्वानुकूल्यः ।

---

१. ख सविधपूजोपहारैर्लुलाय° ।
२ क सा ।
३. क नुराग ।
४. क नास्ति । ख प्रिय° ।
५. क नास्ति ।
६. क नास्ति ।
७. क नास्ति ।
८. ख तावद् इत्यधिकम् ।

यादृक्तोषं मयि रचितवांस्तं जहाराशु सर्वं
नीत्वेदानीं परिणतिमिमां गूढवैरी विधाता ॥३०४॥

अथवा विधातुरलमुपालम्भेन । समुपेक्षितस्त्वयैव प्रणयिन्या दुःसहवेदनोऽस्मि संवृत्तः । कथय तावद्भवती[1]मेव पृच्छामि ।

उपेक्षा नो चेत्ते मुखनयनदन्तच्छदसखाः
कुतो मां बाधेरन् शशिकमलमाकन्दनिबहाः ।

(सविमर्शम्)

धिगेतं दुस्तर्कं स्मितकरपदद्वन्द्वविजिता
इमं ते बाधन्ते प्रणयरसपात्रं तव जनम् ॥३०५॥

(सबाष्पोपालम्भम्)

अयि कठिनहृदये, मिथ्याप्रणयिनि, कलहंसलीले,

तदा ते साकूतैः प्रणयमधुरैर्मौग्ध्यविधुरै-
र्न सम्प्राप्तस्तादृङ् नियतमनुभावैरपि तव ।
त्वया ज्ञातप्रेम्णा प्रमद इह यादृङ् मयि कृतः
समं प्राणैः सोऽयं शिव शिव हृतः सम्प्रति कथम् ॥३०६॥

मन्दारशेखर ! किं ब्रवीषि, "सखे अलमत्यन्तकातरतया । सर्वथा भद्रं विधास्यति भगवती नो न सन्देह" इति ? *(सदैन्यम्)* सखे ! किमहमीक्षितुमपि प्रभवामि तमेनमनेहसं यत्र भवेन्मे श्रुतिपथातिथिः पुन[2]रागमः ?*(पुरो विलोक्य)*[3]

---

१. क त्वां पृच्छामि ।

२ ख प्रियायाः पुन° ।

३. ख ऽवलोक्य ।

कथमियमतित्वरितगतिरितः समापतति पुनश्च कमनज्योत्स्ना ! यावदेनामुपसर्पामि ।

(उपसृत्य)

सखि,[1] कमनज्योत्स्ने !

रक्ता त्वयि प्रियतमेति पुरा यया सा
कर्णेऽर्पितानि मम वर्णमयामृतानि ।
सेयं त्वमब्जमुखि मे विधिदुर्विपाकात्
किं श्रावयस्यहह सम्प्रति नैव जाने ॥३०७॥

तथापि कथय का वार्त्ता प्रवर्त्तते प्रियायाः कलहंसलीलायाः ? सशिरःकम्पं किं ब्रवीषि "त्वया श्रुतपूर्वचरान्नातिरिच्यत" इति ? (सत्रासगद्गदम्)

अरे[2] भग्नभागधेय ! यतिः[3], निःसंशयमिदानीं त्याजितमसि प्रियायाः प्रत्याशाम् ।

"दौर्लभ्यं गमिता परं प्रियतमा चेष्टामुखेन स्फुटं
प्रत्याशा[4] न निवर्तिता मम पुनस्तस्यास्तु ताटस्थ्यतः ।
सेयं[5] प्रत्ययिता निवर्तितवती तामद्य वाचे दृशा
हा हा जीवित वज्रकर्कश निरालम्बं कथं स्थास्यसि ॥३०८॥

कमनज्योत्स्ने ! साश्चर्यमिव किं ब्रवीषि "किमिदं नाहं प्रत्येमि प्रहर्षावसरे परिदेवनकारणं कन्दर्पविलासस्ये"ति ?

---

१. ख अयि ।
२. ख रे हृदय० इत्यधिकम् ।
३. ख नास्ति ।
४. ख °सेयं तटस्थायतः ।
५. ख एवं ।

(*सहर्षशोकमात्मगतम्*)

आश्वासनाय मम वक्ति किमेवमेषा
नो चेन्मृषा किमु जगाद तथा भुजिष्या ।
आप्तोदितेष्वपि निदर्शनमन्तरेण
न प्रत्ययोऽस्ति मनसो मदनातुराणाम् ॥३०६॥

भवतु, पृच्छामि । (*प्रकाशम्*) अयि कमनज्योत्स्ने ! किं तर्हि योगिनीभिर्नीतपूर्वा पुनरागता कुशलमास्ते मे प्रियतमा ? किं ब्रवीषि "केन त्वं प्रतारितोऽसि योगिनीभिर्नीता कलहंसलीलेति मृषालपितेने"ति ?

अहं मन्ये, महाकूटवृत्तान्तमावेदयितुं त्वदन्तिकं प्रहितया धर्मोज्जीवनभुजिष्यया त्वमेव पुनर्वञ्चिताऽसीति ? अथवा सा त्वया न दृष्टेत्यपि सम्भाव्यते । किं ब्रवीषि, "किं तस्या नामधेयमि"ति ? अये, तदा[1] सत्यमेव विस्मृतोऽस्माभिस्तस्या नामा[2]नुयोगः । किं ब्रवीषि "कथय पुनर्यदि जानासि, मां प्रति कीदृश[3]स्तस्याः स्वामिसन्देश"इति ?

(*सादरमुपसृत्य, कर्णे एवमेवं विमृश्य*)

किं ब्रवीषि, "अहो, महानुभावा खलु तत्रभवती भद्रजटा या पुनर्युवयोर्दुर्निवारतर[4]मदनवेदनां निध्याय दय[5]मानमानसा दयितां ते कलहंसलीलां निजविद्यानुभावतिरोहितशरीरां विधाय, स्वयमतिरोहितापि निर्वर्त्तितकार्यशेषा त्वरितं समागमिष्यामी"ति महाकूटं प्रति[6] प्रस्थिता । तयैव प्रकाशितमिदं

---

१. क नास्ति ।
२. क नास्ति ।
३. क °शी ।
४. क नास्ति ।
५. क दूय° ।
६. क नास्ति ।

युवयोर्निरन्तरघटनोपपत्तिसंविधानवैदग्ध्येन संदेह''इति ? अयि, कुशला सा तिरोधानविद्यायामपि ! किं ब्रवीषि "अयि, कुतोऽत्र संदेहः ?

दृष्ट्या विधेयविधुरीकृतशक्तिसैन्यान्
योधान्विधाय दनुजानधिमण्डयुद्धम् ।
साहाय्यकर्म विदधे त्रिपुराम्बिकायाः
साक्षात्कृता खलु तिरस्करिणी तया सा ॥३१०॥

तत्प्रसादात्करस्थैव तस्याः स्वपरतिरोधानविद्ये''ति ? अयि, प्रस्थितायां भद्रजटायां त्वमपि तादृशीं प्रियसखीमेकाकिनीं विहाय किमर्थमत्रागतासि ? किं ब्र० "चिरप्रस्थिताया भद्रजटायाः प्रवृत्तेरुपालम्भाय महाकूटपथेन गच्छन्ती अहं भवन्तमेतद्वृत्तान्तमावेदयितुमिहागतास्मि । इदानीमितः प्रतिनिवृत्य तां चेटी-मन्विष्य तत्रत्यवृत्तान्तमशेषं तथैव तन्मुखेन विज्ञाय समागमिष्यामी''ति ? (*सौत्सुक्यम्*) अयि कदा भवेत्ते पुनरागमः ? किं ब्रवीषि "नियतमेव भवन्तं प्रियन्तिकं नेतुमनुदिततारे सायमागमिष्यामी''ति ? (*सहर्षस्मितम्*) गच्छ, गच्छ भवतु निरन्तरा या ते प्रवृत्तिः ।

(*मन्दारशेखरमदनमङ्गलौ पर्यायतो विलोक्य*)

रक्ता सा दयिता व्यवस्यति परं मद्वाञ्छितावाप्तये
सेयं भद्रजटा स्वतोऽत्र कमनज्योत्स्ना निबद्धादरा ।
जातप्रायमतः प्रियाभिगमनं जानामि निःसंशयं
कस्मादद्य चलाचलं मम मनः सन्देहमालम्बते ॥३११॥

सर्वमिदं देव्या विलसितमाहोस्विद् भद्रजटाया वेत्यपि न निश्चीयते । मन्दारशेखर ! किं ब्रवीषि "सखे ! न खलु वितथोहा कदापि[1] कमनज्योत्स्ना; किन्तु तवैव प्रेमगरिमा परमत्याहितमाशङ्कत''इति ?

---

१. क °चिद् ।

(दक्षिणाक्षिभुजस्पन्दमभिसूचयन्)

सखे, मन्दारशेखर !

भजत्येष स्पन्दं नयनसहितो दक्षिणभुजः
शुभोदर्कं शंसन्मयि मुदमुदाराञ्च कलयन् ।

तथापि,

प्रियालाभात्मायं परिणमति किं वान्यविषये-
त्यतो दोलारोहं कलयति नितान्तं मम मनः ॥३१२॥

किं ब्रवीषि "सखे प्रियालाभात्मनैव परिणमति शुभोदर्कस्तेन सन्देह" इति ? (सहर्षौत्सुक्यम्) सखे, कथय कथमिदं भवताऽवगतम् ? किं ब्रवीषि "अयि, श्रूयताम्[1]—

तामन्तरेण दयितां त्रिदिवो[2]ऽपि नूनं
द्वेषास्पदं तव सुधाऽपि यथा विषाक्ता ।
ईदृङ्निमित्तपरिसूचितभाग्यलाभ-
स्तस्मान्मया खलु तदागम इत्यबोधि"[3] ॥३१३॥ इति ?

मदनमङ्गल ! किं ब्रवीषि "सखे ! सत्यमिदं यदाह मन्दारशेखर" इति ?

(सहर्षस्मितं शिरस्यञ्जलिं घटयन्)

अवितथं कुर्वन्तु वचो वां मे सर्वेष्टदेवताः । एतमितः सरस्तीरमाधवीमण्डपे कमनज्योत्स्नायाः पदवीं प्रतिपालयामः । मन्दारशेखर ! किं ब्रवीषि

---

१. ख श्रृणु तावत् ।
२. ख दिवाऽपि ।
३. ख °वेदि ।

"कतमेन पथा गन्तव्यमि"ति ? मदनमङ्गल ! किं ब्रवीषि "नन्वनेनैव नेदीयसा कुसुमापणपथेने"ति ? भवतु, तथैव करिष्याम: । (*कतिपयपदानि गत्वा, नाट्येन कुसुमापणं प्रविश्य, पार्श्वतोऽवलोक्य सहर्षम्*) अत्र खलु कुसुमलाविका:,

सिञ्चन्त्यद्भि: कुसुमनिकरं वामहस्ते ससूत्रे
धृत्वा पुष्पं ददति च रणत्कङ्कणं ग्रन्थिमाशु ।
शश्वद्दृष्टिं विपणिमभित: प्रेरयन्ति प्रकामं
मध्ये मध्ये वलितवदनं कुर्वते चाङ्गभङ्गम् ।।३१४।।

अहो ! कुसुमविक्रयरामणीयकमासां मालाकारवधूटीनाम् । एता:,

यून: क्रेतृजनान्सहासललितं पश्यन्ति तानापणा-
दन्यस्माद्विनिवर्त्य गूढनयनस्पन्दैर्नयन्त्यन्तिकम् ।
उद्यत्कक्षरुचो निवृत्तसिचयव्यक्तैकवक्षोरुहा:
प्रोन्नीय प्रतिदर्शयन्ति सुमनोहारान् प्रशंसन्ति च ।।३१५।।

किञ्च,

नीवीदेशनिवेशितामिव सखे द्रष्टुं पुनर्वीटिका-
मुत्सार्यानतकन्धरा: करयुगेनावस्तिकट्यंशुकम् ।
उत्कीलद्वलिनाभिलोमलतिकं सन्दर्शयन्त्यङ्गकं
यूनां तेन हरन्ति हन्त नितरां वित्तश्च चित्तं दृशम् ।।३१६।।

अपि च,

प्राप्ते क्रेतरि मन्दमुग्धहसितं पृच्छन्ति तद्वाञ्छितं
तन्मूल्यं परिपृच्छति प्रतिवदन्तीष्टं प्रयच्छेति ते ।

भूयः क्रेयविचारकारिणि पुनः[1] सोत्प्रासमाचक्षते
क्रेतारस्त इहान्य एव पुरुषास्त्वं गच्छ गच्छेति च ॥३१७॥

इतश्च क्रेतारः,

दोर्मूलञ्च विविक्तकान्तिकुसुमप्रोदञ्चनोन्मीलितं
भूयस्तत्पुटसूत्रवेष्टनविधौ वल्गन्तमुच्चैः कुचम् ।
लोलत्तारकमीक्षणं प्रियवचःस्मेरं मुखाम्भोरुहं
पश्यन्तः प्रतिपत्तिशून्यहृदयास्तिष्ठन्ति तासां पुरः ॥३१८॥

मदनमङ्गल ! किं ब्रवीषि "वयमप्यासां संल्लापशर्मणः क्षणमात्र पात्रीभवाम" इति ? मन्दारशेखर ! किं ब्रवीषि "अभिपतति सखे, सख्युः कन्दर्पविलासस्य सङ्केतसमयः । दुष्करं चासां नर्मालापवागुरावलयलग्नानामस्माकमितोऽपि निर्गमनम् । अतोऽद्य झटिति[2] माधवीमण्डपमेवानुसराम" इति ? सखे ! सत्यमिदं तथैव करिष्यामः[3] । (*इति ससंभ्रमं कुसुमनिषद्यामतिक्रम्य, नाट्येन माधवीमण्डपं प्रविश्य, पश्चादूर्ध्वमवलोक्य*) अयि, मालिकेन्दुकलालिकाललितविभ्रमभ्रमितचेतोभिरस्माभिर्दीनापगमोऽपि न लक्षितः । तथाहीतश्च भगवान्—

पाश्चात्याम्बुधिदृष्टपूर्ववडवासन्दर्शनोत्कण्ठया
धावद्रथ्यतुरङ्गनिष्ठुरखुरक्षुण्णेऽस्तशैलस्थले ।
तस्मादुच्चलितेन धातुरजसा लिप्तानुरक्ताङ्गको
मन्दांशुः प्रियदर्शनः खलु सहस्रांशुर्दरीदृश्यते ॥३१९॥

---

१. क मुहुः ।
२. क नास्ति ।
३. ख कुर्मः ।

इयञ्च,

पूर्वा क्षणक्रमनिरस्तसमस्तरागां[1]
हित्वा निजान्तिकमुपेत्य रवौ सरागे।
आलोकतः पुनरमुष्य धृतप्रसादा-
ज्जाताऽचिरेण चरमा परमानुरक्ता ॥३२०॥

इतश्च,

अपरागमरक्त आत्मकान्ते
गरलं ध्वान्तमयं पपे नलिन्या।
विजहौ न तथापि जीवितं[2] सा,
विषजानां न विषाद्भवन्त्यपायाः ॥३२१॥

मन्दारशेखर! किं ब्रवीषि "अयि,[3] प्रभूतबल[4]शालिनस्तेजस्विनोऽप्ये-काकिनः पुनरशक्यदमना एव लघीयांसोऽपि बहवश्चेत्परिपन्थिनः। तथाहि—

तद्रो(धो)ऽन्तरसन्ततान्धतमसं निर्भिद्यन्त तिग्मांशुभिः
सञ्छत्तुं बलिसद्मगं कृतमतिर्भानुर्जगाहेऽम्बुधिम्।
अन्यत्सम्प्रति सन्निपत्य वृणुते लोकं तमोमण्डलं
किञ्चैतस्य नयत्यहो परिभवं पाथोजिनीं वल्लभाम् ॥३२२॥ इति?

मदनमङ्गल? ऊर्ध्वमभितो विलोक्य किं ब्रवीषि

---

१. ख °रागं।
२. ख °नं।
३. ख अये।
४. क °प्रभा°।

"उद्धर्त्तुं किल शैलकेलिरभसन्नस्तानि पाथोनिधे-
रन्तर्भूषणमौक्तिकानि दिविजस्त्रीभिः समुत्कण्ठया ।
गाढं तत्र निमज्जितेन रविणा बध्वा दृढं रश्मिभिः
प्रोक्षिप्तानि निपत्य तानि गगने तारापदेशं दधुः" ॥३२३॥ इति ?

(*स्मरणमभिनीय सविषादम्*)

अनुदिततारे सायमागमिष्यामीत्युक्तवती सा सत्यवादिनी नाद्यापि समागता । अतः सत्यमत्याहितेन भवितव्यं प्रियायाः कलहंसलीलायाः, अन्यथा किमेवं चिरायति कमनज्योत्स्ना ! मन्दारशेखर ! किं ब्रवीषि "विरम सखे ! निरन्तरमेवममङ्गलमेव किमुत्प्रेक्षसे । चिरायति सा तवैव कार्यगौरवान्न सन्देह" इति ? भवतु तर्हि तस्याः पन्थानमेवाधितिष्ठन्तस्तदागमं प्रतिपालयामः । (*कतिपयपदानि गत्वा, पराङ्गसङ्घट्टमभिनीय*) अये, काऽयमङ्गनाजन इवाभिपतति ममाङ्गे । भवतु, पृच्छाम्येवम्, अये किमेवमुपरि परिपतसि ? का त्वं पूतना ? किमाहोस्विद्यक्षिणी ?

(*मन्दारशेखरं प्रति*)

सखे, किमियमुच्चैर्भर्त्सितापि न वक्ति किञ्चिदपि ? किं ब्रवीषि "सखे, कुतोऽत्र प्रभवः पूतनादीनाम्, किन्तु, सुघटितभवत्कार्या समागता स्यात् कमनज्योत्स्ना, अन्यथा भवन्तं सा कथमेवं परिहसेत्, अन्या वा यदृच्छामिलिते"ति ? तर्हीमां पृच्छामि । अलमयि कमनज्योत्स्ने ! तवामुना मे नितान्तपरिहासेन[1] । प्रयच्छ पृच्छतो मे प्रतिवचनम् । सोपालम्भं किं ब्रवीषि "अयि, सरसहृदय ! भवन्तमेतावतैव मादृशं जनमलक्षीकुर्वन्तं किं पदमवतारयिष्यति वा, न जानेऽहं प्रियोपगूहनप्रमोद"इति ? (*सहर्षमात्मगतम्*) इयमिदानीं किमपि भावुकमभिसूचयन्ती हृदि मदीये कमपि प्रमोदमङ्कुरयति (*प्रकाशम्*) अयि सखि ! दुरपह्नवतिमिरनिवारितदृक्प्रसरः सत्यमहं त्वां नावेदिषम् । किं ब्रवीषि, "अये, कुतोऽद्यापि तमःस्थितिसम्भावना किं भवान्न पश्यति—

---

१. ख नितान्तापहासेन ।

दर्पोद्रेकः कुसुमधनुषो जीवितं कैरवाणां
जीवंजीवप्रणयगरिमा भाग्यराशिर्निशायाः ।
शृङ्गारश्रीललितहसितं पानपात्रं सुराणां
पौरस्त्याद्रेर्जयति शिखरे किं तमः स्थातुमीष्टे ॥३२४॥

मन्दारशेखर ! प्राचीमवलोक्य किं ब्रवीषि "कथमयमुदितो भगवानेतावतैव शीतांशु"रिति ? मदनमङ्गल ! किं ब्रवीषि "इतः सम्प्रति पूर्वाञ्चले—

पद्मिन्या दयितेऽनुधावति रुषा स्वं पद्मिनीद्रोहिणम्
भ्रान्त्वा भीतमना दिगन्तमखिलं चन्द्रो जगाहेऽम्बुधिम् ।
गाढे तत्र च तत्र विह्वलममुं कर्षन्ति ताराः पतिं
सोऽयं तच्छ्रमवारिकुङ्कुमरसैः सिक्तोऽरुणो दृश्यते ॥३२५॥

ततश्च—

रङ्कावङ्कगते त्रिविष्टपवनीखेलत्कुरङ्गीगणैः
साकं क्रीडनकौतुकेन रभसादुत्प्लुत्य याते दिवम् ।
तच्छायानुगतात्ममूर्त्तिरधुना धर्त्तुं तमेनं शशी
मन्दं व्यायतरश्मिजालकलितः खाग्रं समारोहति" ॥३२६॥ इति ?

मन्दारशेखर ! किं ब्रवीषि,

"भानावभ्युदिते तथा मयि गते किं स्यान्मम प्रेयसी
हाहेत्यस्तमितः शशी रसवशादिन्दीवरिण्याः स्मरन् ।
सोऽयं सम्प्रति नीलिमाङ्किततनुस्तस्माद्दरीदृश्यते
ये वै यत्किल संस्मरन्ति चरमे तद्रूपमेष्यन्ति ते" ॥३२७॥ इति ?

कमनज्योत्स्ने ! किं ब्रवीषि, "ममैवं प्रतिभाति

आदायामृतपूर्णमर्कचषकं शोणारविन्दप्रभे
पाणाविन्द्रवधूर्विलोक्य च पुनस्तस्मिन्नभःश्यामिकाम् ।
चिक्षेपोपरि कोपतः परिजनोऽसंशोध्य दत्ता सुधे-
त्येनं तं शशिनं प्रशंसति जनस्तत्पाणिमुक्तार्जुनम्[1] ॥३२८॥ इति?

(इति चन्द्रमसमालोक्य, सासूयामर्षम्)

कमलविजयं नेत्रानन्दं स्मरस्य सहायतां
त्वमिव[2] तनुते पीयूषांशो प्रियावदनं मम ।
त्वदुदयफलं तस्मादन्यन्न किञ्चिदवैम्यहं
कृपणहननप्राप्ताद्दोषाकरत्वपदादितः ॥३२९॥

(सावधीरणम्)

अयि दोषाकर, सपदि, प्रिया मे न सन्निधत्त इत्येव तवायमवलेपः । न चेदेवम्—

तस्या मुखे जयति तादृशकान्तिकाले
त्वां चन्द्र चन्द्र इति के कलयन्तु लोके ।
किं ज्योतिरिङ्गणगणं गणयन्ति लोका-
स्तत्त्वेन चण्डकिरणे त्वयि वा पुरोगैः ॥३३०॥

मन्दारशेखर ! सादरं किं ब्रवीषि "अयि, कमनज्योत्स्ने ! किमशेषतो निष्पन्नं मे सुहृत्कार्यमि"ति ?

कमनज्योत्स्ने ! किं ब्रवीषि "कथयिष्यति सर्वमेव भगवती साक्षाद् वो

---

१. क °मुन्मुर्जम् ।
२. क त्वमिह ।

भद्रजटेयं समागते"ति ? (*वामतोऽवलोक्य*) अये, स्मृतेरपि पूर्वमिहोपगता सा भगवती भद्रजटा । यावदेनामुपसर्पामि । (*ससम्भ्रममुपसृत्य)* भगवति ! प्रणमति भगवतीं दुस्तरव्यसनसागरनिमग्नः पारमपश्यन् कन्दर्पविलासः । भगवति ! (*सानुनयम्)* किं ब्रवीषि "वत्स लघु समुत्तीर्णो[1] व्यसनार्णवश्चिरं रमस्व वाञ्छितपार"इति ? (*सहर्षप्रश्रयमञ्जलिं बध्वा*) भगवति ! तथाऽस्तु, भगवत्याः प्रसादात् । सखायौ किं ब्रूथः ? [2]"भगवत्या वामपि प्रणमाव"इति ? भगवति ! किं ब्रवीषि "वत्सौ स्वाविशेषस्य सख्युः कन्दर्पविलासस्य प्रणामेन किं न गतार्थो भवतोः प्रणाम" इति ? सखायौ किं ब्रूथः "भगवति, सत्यमिदं सख्युः प्रणाममेव प्रणाम आवयोराम्रेडयति । मन्दारशेखर ! किं ब्रवीषि "भगवति, कियच्छेष मे मित्र[3]कार्यमि"ति ?

किं ब्रवीषि "वत्से कमनज्योत्स्ने ! किं न ददासि पृच्छतेऽस्मै प्रतिवचनमि"ति ? कमनज्योत्स्ने, किं ब्रवीषि भगवति, भवत्याः प्रतिपालयाम्य[4]नुज्ञामि" ति ? (*सोद्वेगमात्मगतम्*) अये, मात्प्रियोदन्तमिमे स्वतो वक्तुं सन्दिहाने किमप्यमङ्गलमभिसूचयतः । हन्ताहं[5] किं करोम्यशरणः । (*प्रकाशम्*) अयि कमनज्योत्स्ने ! अलमलं ते विलम्बेन । कथय, यदत्र प्रसक्तं मे दैवदुर्वितकात्[6] । (*सस्मितम्*) किं ब्रवीषि "अयि कन्दर्पविलास ! अलं[7] ते वैक्लव्येन, स्थिरो भव सर्वं ते वक्ष्यामी"[8]ति ?

---

१. क नास्ति ।

२. क 'भगवत्या' इत्यारम्भ्य 'प्रणामाव' इति पर्यन्तं नास्ति ।

३. ख सुहृत्° ।

४. ख °मभ्यनु° ।

५. ख हा हन्त ।

६. ख °दुर्विपाकात् ।

७. ख कृतं ।

८ ख कथयामि ।

मन्दारशेखर ! किं ब्रवीषि "अयि कमनज्योत्स्ने ! आतुराणामरुन्तुदः खलु विवक्षितकथनविलम्बः । अतः कथय सत्वरमि"ति ? कमनज्योत्स्ने ! अङ्गुल्या मां निर्दिश्य किं ब्रवीषि "अयि मन्दारशेखर ! कि कथनीयमेतस्य, कलहंसलीलापर्यङ्काधिरोहणमेतदङ्काधिरोहणञ्च, कलहंसलीलाया द्वयमेवावशिष्यते । (*सहर्षम्*) हृदय, त्वया सपदि निःसंशयमवतीर्णः संशयार्णवः । (*सावष्टम्भम्*)

क्रूरास्त्राण्युपसंहर स्मर करानिन्दोस्तुषारीकुरु
त्वं मन्दीभव मन्दमारुत मधो किं त्वं मुधा चेष्टसे ।
स्वच्छन्दं रटतोच्चकैः शुकपिकाः कालो व्यतीतोऽद्य वः
सेयं पङ्कजलोचना खलु मदीयाङ्कं समारोहति ॥३३१॥

(*क्षणं विचिन्त्य, सनिश्वासम्*)

इदमपि प्रत्याशापारवश्येन केवलमाशासनीयम् । यतः सप्रत्यूहसमागमाः सर्वथैव परकामिन्यः । भगवति, किं ब्रवीषि "वत्स इदं मासत्रयात्परत एव समाशङ्कनीयम् । ततस्त्वर्वाङ् निःसंशयमेव तस्यां रमस्व स्व[१]कलत्राविशेषमि"ति ? मन्दारशेखर ! सौत्सुक्यं[२] किं ब्रवीषि "भगवति ! कथं कृतेयमघटितघटना भवत्ये"ति ? भगवति ! किं ब्रवीषि "शृणु वत्स, कथयामि, दुर्निवारतरमदनशरानलसन्तप्यमानतनुलतां वत्सां कलहंसलीलां निजविद्यानुभावतिरोहितशरीरां विधाय, स्वयमपि तिरोहिता महाकूटमुपेत्य, कात्यायन्यधिष्ठानं सन्निहिता । तदानीमहमेवमवोचम्, अरे, अरे, धर्मोज्जीवन ! यदार्यकृतमर्यादा भवता जाल्म लघिता इत्यर्धोक्ते मदनमङ्गल ! किं ब्रवीषि "भगवति ! त्वयैव किमुपन्यस्तेयं सप्तश्लोकी ? तर्हि न वितथ एव, कमनज्योत्स्नाया अध्याहारः, या पुनः सर्वमिद भद्रजटाया एव संविधानवैदग्ध्यं न सन्देह इति व्याजहारे"ति ? भगवति ! किं ब्रवीषि "केनेदमावेदितं तुभ्यमि"ति ? मदनमङ्गल ! किं ब्रवीषि "धर्मोज्जीवनस्य

१. ख निज° ।
२. ख नास्ति ।

गृहजनमशेषं महाकूटं नेतुमागतया तस्यैव भुजिष्ययेऽ''ति ! भगवति ! सानुस्मरणं किं ब्रवीषि [1]तर्हि स्वस्वामिना निजगृहान् प्रति प्रहिततया[2] मदनच्छुरिकया तत्रत्यवृत्तान्तः सर्वोऽपि निवेदित एव स्यात् । किमतो वक्तव्यमवशिष्यत'' इति ? मन्दारशेखर ! किं ब्रवीषि ''भगवति ! निजविद्यानुभावतिरोहिततनुः कलहंस-लीलाकन्दर्पविलासावसंयोज्य किमर्थमीदृशपरिश्रमपात्रमात्मानं कृतवती तत्रभवतीति महती मे विचिकित्से''ति ? भगवति ! किं ब्रवीषि ''वत्सेदं[3] सम्यगाशङ्कितम् । शृणु कथयामि

तिरोधानं कामरूपं मयेनापि(मयैवेदं ?) प्रपञ्चितम् ।
रतौ मृतौ च निद्रायां प्रायशो विनिवर्तते ॥३३२॥

अतो मया सा परिपाटी परित्यक्ते''ति ? मदनमङ्गल ! किं ब्रवीषि ''भगवति ! किमर्थं कृतोऽयं मासत्रयमित्यल्पकालनियम'' इति ? भगवति ! किं ब्रवीषि, ''वत्स ! न साम्प्रतमत्याशा परकलत्रेषु, किं चैवं पराङ्गनासु चिरकाल-निर्बन्धोऽवश्यमेव रहस्यभङ्गाय कल्पते । अथवा यथायोगं तदुपागमोपाय-मनन्तरमनुचिन्तयिष्याम''इति ?

(*सहर्षौत्सुक्यम्*)

भगवति ! किं, सर्वेपि भगवत्या तदीया निःशेषतया प्रस्थापिता महाकूटम्? किं ब्रवीषि ''वत्स ! कुतोऽद्यापि संशयः ? न केवलं ते प्रस्थापिताः, किन्तु—

संरुद्धः सपरिच्छदो गृहपतिः कूटे महापूर्वके
मासानां त्रितयं गृहागमविधावस्यावधिः कल्पितः ।
तस्याः प्राणसखीयमिष्टकलनारम्भे परं योजिता
सेयं ते स्मरपुण्डरीकवदना ग्रस्ता प्रिया मोचिता ॥३३३॥

---

१. क 'तर्हि' इत्यत आरभ्य 'वक्तव्यमवशिष्यत इति यावत् नास्ति ।
२. ख प्रेषितया ।
३. ख भवतासम्य° ।

परमियमेकैवावशिष्यते युवयोः परिरम्भमङ्गलारम्भकलने"ति ? कमनज्योत्स्ने ! किं ब्रवीषि "भगवति ! सापि निष्पन्नप्रायैव भवत्याः प्रसादादि-"ति ? सखायौ किं ब्रूथः "कोऽत्र सन्देह"इति (*सौत्सुक्यम्*) भगवतीदानीं कुत्रास्ते मे प्रियतमा ? कमनज्योत्स्ने ! सास्मितं किं ब्रवीषि "अयि, किं त्वं न पश्यसि पुरः स्फुरन्तीं तां ते प्रियतमामि"ति ? (*सविषादवैलक्ष्यं*) कमनज्योत्स्ने ! किमद्यापि न मां परिहरति ते परिहासः ? अथवा, सत्यमेवैतत्—

न जाने किं मायाकुसुमधनुषस्तत्रभवतः
प्रिया कायव्यूहं[1] तव विरचिवती सा किमथवा ।
अयं यस्मिन् यस्मिन् चरति वसति क्रीडति जनः
पदे तस्मिन् तस्मिन् स्फुरति पुरतः सैव तरुणी ॥३३४॥

"वत्स, भगवति ! किं ब्रवीषि "नासत्यं ब्रवीति कमनज्योत्स्ना । सेयं वत्सा त्वद्दर्शनसमुत्सुका मयाऽत्रैव समानीते"ति ? मन्दारशेखर ! किं ब्रवीपि "भगवति मन्ये समुत्कण्ठितयुवमिथुनसङ्घट्टनसमुत्सुका त्वमेवे"ति ? (*सहर्षौत्सुक्यम्*) भगवति ! यद्येवं तर्हि कुतः सा न दृश्यते[2] ? किं ब्रवीषि "पश्य तावदुपसंहरामि तिरस्करिणी"मिति ?

(*विलोक्य सानन्दम्*)

सेयं सिद्धरसायनं हृदयभूसन्तापनिर्वापणे-
दृष्टाऽनीहितवस्तुदूषितदृशोः पीयूषसाराञ्जनम् ।
मूर्त्तिः फुल्लशिरीषदामविभवप्रत्यग्रसंवादिनी
जाता सञ्चितपूर्वपुण्यविभवैरत्रैव नेत्रातिथिः ॥३३५॥

---

१. क °गूहं ।
२. क द्रक्ष्यति ।

मन्दारशेखर ! सहसाश्चर्यं किं ब्रवीषि,

अकस्मात्किं जाता धरणितलतः कापि चपला
किमाहोस्विद् भ्रष्टा स्मरकरतलात् खड्गलतिका ।
परिच्छेत्तुं त्वेनां प्रभवतु विधाताऽपि स न चे-
दमुष्याः सान्निध्याद्विसृमरमहामोहगलितः ॥३३६॥ इति ?

मदनमङ्गल ! किं ब्रवीषि "स्थाने खलु सखे ! कथं तां वर्णयामि न खलु मुखे मे जिह्वासहस्रमि"ति ? यदाह भवानिति। मन्दारशेखर ! किं ब्रवीषि "अयि, तदपि न पर्याप्तमेव किं जिह्वानामानन्त्यमिति वक्तव्यमि"ति ? अये, चित्रमेतत्—

आलोकात्प्रभृति प्रिये प्रथमतस्त[1]द्विप्रलम्भानल-
ज्वालाजालनिपीयमानमनसा भूयो जनेनामुना ।
विष्वक् तन्वि विलोकिताः समभवं तापाय या मूर्त्तय-
स्तास्वेषैकतमाऽपि मे[2] वितनुते हर्षं तनुस्तावकी ॥३३७॥

(करे तां गृहीत्वा स्पर्शसुखमभिनीय, सपुलकोद्भेदम्)

किमेषा मोहास्त्रं कुसुमधनुषः पञ्चविशिख-
प्रयुक्ता किं माया मदनरचिता किं नु मदिरा ।
यदस्याः सम्पर्कः प्रमुषितसमस्तेन्द्रियचयो
ममान्तर्दुर्ज्ञेयं कमपि च वितर्कं कलयति ॥३३८॥

(सहर्षौत्सुक्यम्)

---

१. क °स्त्व° ।
२. क किं ।

अयि प्रणयिनि,

प्रेमक्रीतममु[1]जनं तव पुरा विज्ञाय भाग्याधिकं
सासूयं तु विचेष्टितं मधुमुखैर्यत्तत्कथं वर्ण्यते ।

किं तेन वा कथितेन —

शीतांशोः करकन्दलप्रतिभटैरङ्गैः समालिङ्ग्य मा-
मङ्गानि स्मरमल्लभल्लदहनालीढानि निर्वापय ।।३३९।।

कमनज्योत्स्ने ! सस्मितं किं ब्रवीषि "सखि, त्वमप्येवं कृत्वा तवापि निर्वापय तथाभूतान्यङ्गानी"ति ? कलहंसलीले ! सलज्जं भगवतीमुपसृत्य किं ब्रवीषि "अम्ब, गृहमेहि गच्छाम" इति ? मन्दारशेखर ! किं ब्रवीषि "अयि कलहंसलीले ! तृतीयं जनमन्तरेण न[2] युज्यते खलु, त्वदुक्त आख्यातवचने वहुत्वम् । तत्कथय जनं कमिहेच्छसि, भगवती द्वितीयं स्वगेहगमने स्वस्याः सहायमि"ति ? कमनज्योत्स्ने ! किं ब्रवीषि "कमिच्छेदियं प्रेयसः कन्दर्पविलासादन्यमि"ति ?

मदनमङ्गल ! साकूतं किं ब्रवीषि "कमनज्योत्स्ने ! सपदि भवति वचसा ते मनो मे दत्तावकाशं संशयस्य ।

दृष्टश्चित्तमपाजहार मनसा स्पृष्टः समस्ताः क्रिया
भूयो ध्यानपरम्परापरिचयं नीतोऽनया सुभ्रुवा ।
अस्वापारतिसंज्वराङ्गतनुतालज्जाविरामश्रमान्
दुर्वारान् बत यो दिदेश तममु सेयं कथं वाञ्छति ।।३४०।।

कमनज्योत्स्ने ! किं ब्रवीषि, "अत एव खलु सङ्गतार्थोऽयमव्यवस्थित-

---

१. क °मिमं ।

२. ख 'न' इत्यधिकम् ।

मतयो वृषस्यन्त्य इत्यार्यवाद''इति ? कलहंसलीले ! सरोषलज्जं स्वस्थानादपसरन्ती किं ब्रवीषि ''कमनज्योत्स्ने ! अलमलं जोषं तिष्ठ, किमत्रैव व्ययीकुरुषे कृत्स्नमप्यात्मनो वैदग्ध्यमि''ति ? कमनज्योत्स्ने ! किं ब्रवीषि,

''शय्याऽद्यापि सरोजपत्ररचिता यद्विप्रलम्भानल-
क्लिष्टायास्तव वक्ति तादृशदशां शोच्यां शिलानामपि ।

किञ्चेदानीमिहागमने—

पन्था व्याममितः समुत्सुकतया दीर्घातिदीर्घोऽभवत्
तस्याग्रे वद किं त्वदीयचरणः पश्चाल्लगत्यङ्गने ।।३४१।। इति ?

भगवति ! किं ब्रवीषि ''वत्से, किं कुर्यादियमपत्रपैव युवतीनां वाञ्छितपरिपन्थिनी । तथाहि—

कालः क्षणः प्रहरति प्रहरत्यनङ्गे
स्त्रीणां ध्रुवं प्रियविलोकनलालसानाम् ।
लज्जा हरत्यखिलमेकपदेऽन्तिकस्थे
कान्ते तु सञ्चितमनोरथजातमासाम् ।।३४२।। इति ?

कमनज्योत्स्ने ! साकूतस्मितं किं ब्रवीषि ''सखि, कथय, कतमा परिभवति भवतीमपत्रपा,

पश्चाद्विस्मृतवस्तुदर्शनमिषाद् भूयः प्रियालोकने
निन्दायां मदनस्य नव्यनलिनीपत्रे परा[1]वर्तते ।
स्वावस्थाकथने निजप्रियजनाभिज्ञानसङ्कीर्त्तने
या लज्जा समभूत्पुरा त्वयि पुनः सैवेयमन्याऽथवा ।।३४३।।

---

१. क °पत्रास्तरा ।

कलहंसलीले, सभ्रूभङ्गं पदान्तरे स्थित्वा किं ब्रवीषि "अयि कदर्यानुलापे ! किमस्ति तव मनसि ? न स्थातव्यं मयाऽत्रेति ? तर्हि गच्छामि। त्वमेवात्र सुखमास्वे"ति ?

भगवति किं ब्रवीषि "वत्से कलहंसलीले ! त्वमेवम्भूता गच्छसि कथमेकाकिनी"ति ? कमनज्योत्स्ने ! किं ब्रवीषि "सखि, सत्यमेवैतत् ?

पथि तुहिनकरोस्ना(?)जाग्रति प्रोक्तरूपा
न विरमसि किमेका निर्गमे साहसिक्यात् ।
कुसुमशरसहाया त्वं यथेहागतासि
प्रणयिजनसहाया गच्छ गेहं तथैव ॥३४४॥

मन्दारशेखर ! किं ब्रवोषि "कमनज्योत्स्ने ! कोऽस्ति त्वदन्योऽस्या जनः[१] प्रणयी नाम ? अतस्त्वमेवैनां नय निकाय्यमि"ति ? कमनज्योत्स्ने ! किं ब्रवीषि "अयि सरसहृदय ! श्रूयताम्, अनया—

किं यात्राप्रतिरोधिनी मम कृते प्राप्ता शिरोवेदना
हृद्योद्यानमुपेत्य किं मम कृते भुक्ता दशा तादृशी ।
किं चन्द्रस्मरमारुता मम कृते निन्दापदं प्रापिताः
केनास्यास्त्रसदेणशावकदृशः प्रेयान् जनोऽयं भवेत् ॥३४५॥

भगवति, किं ब्रवीषि "वत्से कमनज्योत्स्ने ! किमर्थमेनां कदर्थयसि निरन्तरमेवं परिहासोक्त्या ? नीयतामियमप्रमादमतिनिगूढवृत्त्या भवत्या त्वरितमेव सज्जीक्रियतामखिलभोग्यवस्तुजातमेतस्याः केलीगृहे महीयसा यत्नेन। निवार्यतामतिसूक्ष्मतराण्यपि परोहद्वाराणि। त्वर्यतामलं विलम्बेन। कुशलासि। किं ते वक्तव्यम्। न साम्प्रतमस्माकं समवेतानामितो निर्गमनम्। अतोऽहं क्षणार्धविलम्बेन वत्समेनमादाय समागच्छाम्युचितमार्गेणे"ति ? कमनज्योत्स्ने !

---

१. क नास्ति।

सप्रश्रयं किं ब्रवीषि "आदृतं मया शिरसानुशासनं भगवत्या" इति ? भगवति ! मदनमङ्गलमन्दारशेखरावालोक्य किं ब्रवीषि "वत्सावनुज्ञायतां प्रियमित्रं वां प्रियापर्यङ्कमलङ्कर्तुमिदानीमि" ति ?

सखायौ ! सहर्षस्मितं किं ब्रूथः ?

स्वैरं रमस्व चिरवाञ्छितयाऽनया त्व-
मस्यां निशि व्रज झटित्यधुना पुनश्च ।
प्रत्यग्रहर्षसमुदीर्णविविक्तकान्ति
सत्यं सखे तव मुखं प्रविलोकयावः ।।३४६।।

भगवति, सादरं मे चरमाङ्गमभिस्पृशन्ती किं ब्रवीषि "वत्स, कन्दर्पविलास ! किं ते भूयः प्रियमुपकरोमी" ति ?

(सहर्षप्रश्रयमञ्जलिं बद्ध्वा)

अम्ब, किमितोऽप्यस्ति गरीयो मे वाञ्छितं नाम, यदिदानीमनुपधिदयामृतक्लिन्नान्तःकरणया भवत्या—

आनीताः किल सौम्यतापदममी निष्कारणद्वेषिणः
प्रेयस्यां मयि मन्दमारुतमुखा हन्तोद्गिरन्तोऽनलम् ।
स्नेहादात्मसुखानपेक्षमधुना कृत्वेदृशं प्रश्रमं[1]
सा तन्वी हृदयाहिता मम पुनः क्रोडं समारोपिता ।।३४७।।

तथापीदमस्तु भरतवाक्यम्—

भूपालाः परि[2]पालयन्तु धरणीं निर्बाधगोभूसुरां
काले वारिधरा भवन्तु जलदा लीना भवन्त्वीतयः ।

---

१. क °य ।
२. क प्रति° ।

किञ्चाशेषजगज्जनेष्टघटनारम्भाय संभाव्यता-
मुत्फुल्लाम्बुजगर्भकान्ति सदृशं गौरीकटाक्षाञ्चलम् ॥३४८॥

(इति निष्क्रान्तः)

स्मरकरतरवारिक्रूरधारानुकारी
तरुणहरिणनेत्रालोचनानां विलासः ।
कलयति हृदि येषामुच्चकैः स्वप्रभुत्वं
प्रभवति भुवि तेषामेष हर्षाय भाणः ॥३४९॥

त्रिविक्रमकृतामेतां शीतांशुसहजासखः ।
त्रिविक्रमः कृतिं पायादपायादघसम्भवात् ॥३५०॥

इति श्रीपञ्चायुधप्रपञ्चो नाम भाणः सम्पूर्णः[1] ।

---

१. क भाणः समाप्तिमगात् सं० ।

परिशिष्टम्

प्रथमं परिशिष्टम्

वर्णानुक्रमेण श्लोकानुक्रमणिका

द्वितीयं परिशिष्टम्

विशिष्टशब्दार्थः

शब्दः	अर्थः	पृष्ठम्	पंक्तिः
फाणितम्	राब	३	५
हेवाकः	अभिलाषः	३	८
कृशाश्वी	नटः	३	१६
प्रदीपनम्	विषम्	६	२
विशिखान्तरम्	रथ्यान्तरम्	१३	३
चूलिका	कर्णमूलम्	१७	१३
चलदलम्	अश्वत्थः	२२	६
रूपाजीवा	वाराङ्गना	२५	६
मुसली	गृहगोधिका	२६	११
शिल्याः	भेक्याः	२६	११
निरनुप्लवाः	असहायाः	२६	१२
वृत्रः	ध्वान्तं	२७	१
सांदृष्टिकम्	सद्यःफलम्	२८	७

शब्दः	अर्थः	पृष्ठम्	पंक्तिः
किंशारुः	सस्यशूकम्	३३	११
गर्भकः	केशमध्ये तु गर्भकः	३६	१५
गंधोत्तमा	मदिरा	३७	३
विहस्तः	व्याकुलः	३७	५
शुण्डा	पानगृहम्	३७	७
सञ्जवना	सभा	३७	९
माण्डवी	भरतस्त्री	३७	९
मस्करः	वेणुदण्डः	३७	१४
अनाथा	विधवा	३८	१४
विश्वस्ता	विधवा	३९	३
पुष्पाम्बकः	बाणः	३९	९
निष्कला	विगतार्तवा	४०	१३
चिकुरः	कुटिलः कचः	४३	१८
कलत्रं	कलत्रं श्रोणिभार्ययोः	४३	२१
कूर्पासं	चोलम्	४९	११
निचोलम्	प्रच्छदपटः	४९	१३
सङ्कुमदसारः	जवादीमाजरः	५०	१
कृतमुखैः	कुशलैः	५०	१६
मदनतुरङ्गः	शुकः	५१	१५
मन्मथः	अश्वत्थेस्युर्दधित्थग्राहिमन्मथाः	५४	१
शरः	बाणः काशश्च	५४	१
अम्बकम्	नेत्रं बाणश्च	५४	१
जम्भः	जंबीरफलम्	५८	१५
प्रतिवेशिन्यः	गृहसमीपवर्तिन्यः	६०	२
पलिक्नी	वृद्धा	६०	१०

शब्दः	अर्थः	पृष्ठम्	पंक्तिः
वलिभः	वलिमान्	६०	१२
स्यन्दिनी	लाला	६०	१३
शारगल्ला	चित्रः	६०	१३
नीवी	वसनग्रन्थिः	६०	६०
भस्त्रा	पेशी	६०	१५
(मे)मोहनम्	सुरतम्	६१	१५
वराङ्गम्	गुह्यम्	६२	१३
गन्धानुभूतिविधुरम्	नासारहितम्	६२	१५
जीनः	जीर्णः	६२	१८
फेला	फेला भुक्तसमुज्झिते	६५	१
भिःसटा	दग्धान्नं	६५	१
रल्लकः	कम्बलो जीर्णः	६५	२
अनुशयम्	तापम्	६५	१४
पूर्णपात्रम्	उत्सवकाले देयं वस्त्रादि	६८	१६
रणैः	शब्दैः	६९	५
अम्बुजः	पद्मरागः	७०	१३
अग्निशिखः	केशरः	७०	१६
शशिनम्	कर्पूरम्	७०	१७
अवरीणः	धिक्कृतः	७१	२
परिणायः	परिणायस्तु शारीणां समन्तान्नयने इत्यमरः	७३	४
चतुरङ्गक्रीडा	बुद्धिबलक्रीडा	७४	८
समुद्गकः	संपुटकः	७६	१०
गन्धफली	चंपककलिका	७६	१५
उपशल्यम्	ग्रामान्तउपशल्यं स्यादित्यमरः	७८	१

शब्द:	अर्थ:	पृष्ठम्	पंक्ति:
चिल्लेक्षणम्	स्यु: क्लिन्नाक्षे चुल्लचिल्लपिल्ला क्लिन्नोक्ष्णि चाप्यमी	७८	१३
चक्रीवत:	गर्दभस्य	७८	१७
पद्म:	पद्मादयो निधय:	७९	१
अमनुष्यधर्माणि	कुबेरभिन्ने मनुष्यधर्मरहिते च	७९	४
माल्यानि	माला:	७९	९
फुल्लतृणशून्यमयानि	तृणशून्यं तु मल्लिका	७९	९
कैश:	कीशस्यायं कैश:	७९	९
कामनै:	कार्मुकै:	७९	१५
भटवाह:	कोकिलशुकौ	८०	३
गंधसार:	मलयज:	८१	६
नि:शलाके	रहसि	८२	४
सिचयाञ्चलम्	वस्त्रं	८२	५
रणे	शब्दे संग्रामे च	८३	१
प्रविशति	(शत्रन्तं)	८३	९
प्रदीपनेन	विषभेदेन	८४	१
विविक्तानि	विविक्तं त्रिष्वसंपृक्ते इतिमेदिनी	८४	१७
अतिसंधातुम्	वञ्चयितुम्	८६	१८
प्रस्फोटनम्	शूर्पम्	८९	१०
सरमा	शुनी	८९	११
महती	वीणा	८९	१५
प्रवेक:	श्रेष्ठ:	००	१९
पर्ण:	पलाश:	९२	५
तुलाकोटी	पादाङ्गदम्	९३	१०
सांदृष्टिकम्	फलं सद्य:	९३	१२

शब्दः	अर्थः	पृष्ठम्	पंक्तिः
अवटुः	कृकाटिका	९५	३
कायमानः	मण्डपः	९५	१३
जगतः	विलासिनाम्	९६	८
सौहित्यम्	तृप्तिः	९७	१०
चित्रकम्	तिलकम्	९९	३
कृष्णवृन्तोद्भवा	कुबेराक्षी	९९	६
स्वम्	धनम्	१००	२
कौलीनम्	लोकवादः	१००	२
वर्षवरा	षण्ढाः	१००	५
सप्तकी	काञ्ची	१०१	५
कामनः	प्रियः	१०१	१३
कलशकरीरे	दुग्धघटे	१०३	१४
धाटी	गतिः	१०४	१
जितां	हसी (उपहास)	१०४	१
त्वज्जनानां	अन्यजनानाम्	१०४	१२
अनुबोधः	पत्रलेखा	१०४	१४
रक्तकः	बन्धूकः	१०६	३
अन्त्ये	दन्ताम्बरे	१०६	५
विकचाः	विकसिताः पक्षे केशरहिताः	१०६	१६
सुमनसः	पुष्पाणि		
शारदः	सप्तपर्णः	१०८	१
प्रोष्ठी	शफरी	११०	१५
रिष्टि	खड्गः	११०	१६
नुत्त	अस्तातिरस्कृतेति यावत्	१११	२
मत्स्यण्डिका	भाणितम्	१११	२३

शब्दः	अर्थः	पृष्ठम्	पंक्तिः
कटुम्भरा	कटुकी	१११	२३
मूर्त्तम्	कठिनं मूर्त्तत्वधर्मवत्	११२	१८
त्वान्	अन्यान्	११३	७
केसरम्	चम्पकम्	११३	१६
कृपीटयोने	जलयोने अथ च अग्ने	११४	१३
मन्मुखम्	तिलकः	११७	१२
पूर्णपात्रम्	पारितोषिकम्	१२१	१२
द्वितीया	सहधर्मिणी	१२४	१८
कमलम्	उदकम्	१२५	३
खुरली	शस्त्राभ्यासस्तु खुरली	१२७	६
ताटस्थ्यतः	औदासीन्यात्	१३२	१४
सेयं	कमनज्योत्स्ना	१३२	१५
प्रत्यायिता	विश्वासविशिष्टा	१३२	१५
ताम्	प्रत्याशाम्	१३२	१५
तिरस्करिणी	एतन्नाम्नी देवता	१३४	६
रङ्कुः	मृगः	१४०	१२
अर्कः	स्फटिकः	१४१	१
अध्याहारः	तर्कः	१४३	२०
मधुमुखैः	वसन्तप्रमुखैः	१४७	३

तृतीयं परिशिष्टम्

अत्र प्रस्तुतसंस्करणस्य पाठाः सावन्तमहोदयानां संस्करणस्य पाठभेदैः सह प्रस्तूयन्ते । सुधियः कृपया यथामति संशोध्य पठन्तु ।

प्रस्तुते संस्करणे	सावन्त संस्करणे	पृ०	पं०
°जनकान्तकर्ण°	°जनकर्ण°	२	६
°यति	°यामि	२	११
°नात्ममनो	°नात्मनो मनो	२	१३
परं°	परां	२	१६
परं सहस्त्रेषु	परःसहस्त्रेषु	२	२०
°रूपकप्रयोगमार्ग°	°रूपकादि°	३	२
भवताऽभि°	त्वयाऽभि°	३	११
एव मया सपदि	एव सपदि	३	१२
°मभिनीय°	°मभिधीय°	३	१५
गुणितं दुष्ट°	गुणि तद्दुष्ट°	२	१८
मम वक्षसि	वक्षसि मम	६	१५
एव विचिन्त°	एव चिन्त°	१०	१५
सक्थनि	सक्थिनि	१३	७
°ाकङ्गनासङ्गमे	°काङ्गसङ्गमे	१६	६
°ञ्चिदत्रास्ते	°ञ्चिदास्ते	१६	१६
आलम्ब्य	आलम्ब°	१७	२
°रितं सखि	°रितं मया सखि	१७	७

प्रस्तुते संस्करणे	सावन्त संस्करणे	पृ०	पं०
दमनोत्सवा°	दमनमहो°	१८	१४
तत्र ततः	ततस्तत्र	१८	१६
°तद्गृहमुपगतस्य	°तद्गृहगतस्य	१९	३
प्रियायाः समा	प्रियासमा	१९	३
अथा	अथ	२१	५
°भिधं	°भिदं	२३	४
तया ततः	ततस्तया	२३	८
पतिरिति श्व°	°पतिः श्व°	२४	५
केयं सखे विलास°	केयं विलास°	२४	१३
अयि	अये	२५	५
°क्षते किञ्चाहं	°क्षते अहं	२८	२
°समहात्	°समूहान्	२८	१५
°रुषः	°रुषा	२९	९
भ्राम्यन्ति	भ्राम्यन्ति	३०	४
कमपि	किमपि	३१	१३
पूर्ण°	पर्वे°	३१	१४
तदेव खलु मया	तदेव मया	३२	१
सखे	सखे सखे	३४	१
मयेन्द्र°	महेन्द्र°	३४	५
°विश्रम्भे	°विलम्भे	३४	९
°यमिति सरल°	°यमतिसरल°	३४	१२
ममेदं मतमपि	ममेदममतमपि	३५	३
एवमेनामुपगच्छामः	एतमेनामुपगच्छामः	३५	६
प्रयुञ्जते	प्रयुञ्जन्ते	३६	१०
°दर्शितमध्येपञ्जर°	°दर्शितमेधपञ्चर°	३७	९

प्रस्तुते संस्करणे	सावन्त संस्करणे	पृ०	पं०
°धनम् ? ते	'ते' नास्ति	३८	७
°णेन किम्	'किम्' नास्ति	३८	७
सविश्रम्भं	न विश्रम्भं	३९	१७
चण्डत्वम्	चण्डित्वम्	४०	९
स्तोकान्मी°	स्तोकोन्मी°	४०	१७
तावदेनामपनीताङ्गरागभ्रमादेवालापयाव:	तावदेनामालापयाव:	४१	१०
°रसपात्रा°	°रसपत्रा°	४१	१३
ब्रवीषि पश्येद°	सखे पश्येद°	४३	८
मया गृ°	मयापि गृ°	४४	१४
यतस्ते	°यतस्तव	४५	१
कुतोऽत्रभया°	कुतोऽभया	४७	३
°ब्जाक्षिसमान°	°ब्जाक्षि समान°	४८	१०
'मंदार' • 'षि' नास्ति	मन्दारशेखर किं ब्रवीषि	५१	१३
का तत्र भवन्त°	का भवन्त°	५३	९
वा धर्मेण	धर्मेण वा	५३	१२
'किं ब्रवीषि' इति नास्ति	किं ब्रवीषि	५४	३
°षितानि	°षणानि	५४	१७
तिष्ठतु तव मयि	तिष्ठतु मयि	५५	१
वल्ली गृहा°	°वल्लीगृहा°	५५	५
सन्धाय	सन्धार्य	५५	११
अये अव्यव°	'अये' नास्ति	५५	१७
यदार्हान्	यहार्दान्	५६	५
केनावगतं	कथमव°	५६	१५
भवावृशेर्ध°	°र्दापयति ध°	५७	३

प्रस्तुते संस्करणे	सावन्त संस्करणे	पृ०	पं०
°स्मितम्) नहि°	'°स्मितम्) किं ब्र० न°	५७	१८
अये ! अपूर्वो°	'अये' नास्ति	५८	३
सहोदरी तथाहि	'तथाहि' नास्ति	५८	१४
कृशा नु	कृशानुः	५८	१६
°प्रथन°	°प्रधन°	५८	१८
°वयोरिदं प्रथ°	°वयोः प्रथ°	५९	७
संस्तवैव	°स्तवेव	५९	७
समीपे न स्था°	°पतो न स्था°	६१	३
किन्त्वस्ति	किन्वस्ति	६१	१२
रे त्वमपि वि°	'त्वमपि' नास्ति	६३	५
जरतिके ! ना°	जरति केना°	६३	६
°स्यामि ते कपो°	°स्यामि कपो°	६४	८
भुञ्जते	भुञ्जन्ते	६४	१३
मृत्कर्पराङ्का	मृत्कमंराङ्का	६४	१४
साकूतसस्मितं	साकूतस्मितं	६७	१७
°नमपि	°नमयि	६८	२
एव चास्य	एवास्य	७०	६
°प्लवो वाऽहम्	°प्लवोऽहम्°	७२	१२
श्रोत्रे	श्रोत्रे	७२	१५
°यस्तु अलंवित्त°	'अलं' नास्ति	७३	१४
°चन्दनाद्यर्पणे°	°चन्दनस्यार्पणे°	७३	१६
विजितेन	विजिते स	७४	५
स्पन्दन°	स्यन्दन°	७७	८
सकलनगरविला°	सकलविला°	७७	११
°कुट्टीनी°	°कुट्टिनी°	७७	११

प्रस्तुते संस्करणे	सावन्त संस्करणे	पृ०	पं०
उपशल्य°	उपकल्य°	७८	१
पेटिके किं°	°पेटि किं	७८	८
लिक्षालक्ष°	लक्षालक्ष°	७८	१५
कुम्भोद्भासि	कुन्दोद्भासि°	७६	३
°ह्लादभृता	°ह्लादकृता	७९	१२
°मश्वव्य	°मश्राव्य	८०	१३
प्रियमित्रे	प्रिये मित्रे	८१	११
भवता कथमासादिता	भवतासादिता	८२	२
°दसूभ्यो	°दसुभ्यो	८२	१६
°जवरसः	°र्जवरसः	८४	१०
हेतू	°हेतुः	८५	८
°पनीयेत	°पनीयेत	८५	२०
'सुन्दरि' इति नस्ति	सुन्दरि कृतं वां परि°	८७	६
इति ? अये ! कथ°	'अये' नास्ति	८८	६
महानुभाव किं कथयामि	'महानुभाव किं कथ-यामि' नास्ति	८८	८
°ततः । किं ब्रवीषि ततो°	'किं ब्रवीषि' नास्ति	८८	११
°ति ? सखे ! न°	'सखे' नास्ति	८९	१३
स्मृतः	स्मृतं	९०	७
°नेन पुनर्गत°	°नेन; न गत°	९०	१३
हन्ताहं	हा हन्त	९०	१४
मति ऋजाव°	°मत्यर्जाव°	९२	१४
°निष्यन्द°	°निष्पन्द°	९२	१८
नवनवप्र°	नवनप्र°	९३	१
शस्त्रैः संक्षुण्णं	°स्त्रैरक्षुण्णं	९३	६

प्रस्तुते संस्करणे	सावन्त संस्करणे	पृ०	पं०
इदानीं	तदानीं	९४	१
°य प्रसूतस्ते	°यप्रसूतेस्ते	९५	६
न बिभे°	कथं बिभे०	९६	८
अयि सरस! किं न जानासि	'अयि ""जानासि' नास्ति	९६	९
चातुर्य°	°चातुर्ये	९७	७
रक्ताब्जदिन्दी°	रक्ताजदिन्दी°	९८	१६
कुरूप°	कुपूय°	९९	१५
नटत्कुच°	नटत्कच°	१०१	५
उपालम्भसे	उपालभसे	१०१	१५
सुदति	सुन्दरि	१०३	७
°र्यंजनसं०	°र्यंजल्पसं०	१०३	११
°यता सपदि कृतः	'सपदि' नास्ति	१०३	१४
लतावितान°	लतावितत°	१०४	१८
शठक इव	शठ क इव	१०६	११
°त्तरान्तां	°त्तरा तां	१०७	१६
°मन्योऽत्र विला°	°मन्यो विला°	१०७	२०
°पितमेव। (हस्ते)	'एव' नास्ति	१०८	२
तेऽपि	°तोऽपि	१०८	१०
कृतेन वा न कृतेन	कृतेन वा कृतेन	१०८	१२
समर्चि°	समार्चि°	१०८	१७
°निर्मितां	°निर्मिता	१०९	१५
प्रमुष्ट°	प्रमृष्ट°	११०	७
°त्याशाप्रदर्शं°	°त्याशादर्शं°	११२	७
द्रढय°	दृढय°	११२	१२
अतिऋजु°	अत्यर्जु°	११३	१५

प्रस्तुते संस्करणे	सावन्त संस्करणे	पृ०	पं०
सा सुदती	सुदतीं सा	११४	१
निर्वाणाय	निवारणाय	११४	१०
त्वमङ्गदाहं न°	त्वङ्गदाहं(सन्निमर्शं)	११४	१४
विरम विरम मा पृच्छ°	°हृदय मा पृच्छ०	११५	४
ततस्तस्या°	तत्तस्या°	११५	६
सृजति	सजति	११५	९
सखि ! कलहंसलीले	'कलहंसलीले' नास्ति	११६	५
किमियं पदवी	पदवी किमियं	११६	८
भवत्या	भवत्यां	११६	११
°त्युक्त्वा विनम्र°	°त्युक्त्वा विर°	११७	२
शुक्रशित°	°शुक्रसित°	११७	४
अयि	अये	११७	८
°तस्य दुर°	°तस्य मे दुर°	११९	६
श्यामल	श्यामला	१२०	७
°नीमक्कत°	°नीमपक्कत°	१२१	३
व्याहारमभिधेयः	व्यवहाराभिधेयः	१२१	७
प्रियायाः प्रिय°	प्रियाप्रिय°	१२१	९
°मीशे	°मिशे	१२१	९
सरस्तीर°	सरस्तीरे	१२१	१६
अये ! कलभाषिणि ! कस्या°	'कलभाषिणि' नास्ति	१२१	१९
सताडयति	सन्ताडयति	१२१	२०
स्या अय°	°स्याय°	१२२	१
लक्षिताः	लक्षिता	१२२	१८
मुक्त	भुक्त	१२३	७
कुरूपं	कुपूयं	१२३	११

प्रस्तुते संस्करणे	सावन्त संस्करणे	पृ०	पं०
ति ? (सस्मितं) अयि	'सस्मितं' नास्ति	१२३	१३
धोरणा°	°घोरर्णा°	१२३	१४
चैवंविधः	चैवं विबन्धः	१२३	१५
°घ्नत्या	°घ्नन्त्या	१२३	२१
निर्वेद°	निर्वेल°	१२४	१
°दीत् मुग्धे, किमे°	'मुग्धे' नास्ति	१२४	६
केनापि	केन वा	१२४	७
विन्दन्ति	विन्दति	१२४	१०
ते निर्भयस्वैरचारिता	ते स्वैराचारिता	१२४	१३
प्रस्थितासि	'असि' नास्ति	१२४	१७
तुषारगिरि°	तुषारपाटीरगिरि°	१२५	४
'कुतो……मिदम्' नास्ति	कुतो नाम ब्रूयादियमपि मुधात्याहितमिदम्	१२५	१३
सबाष्पगद्गदं आकाशे लयं बध्वा	बध्वा सबाष्पगद्गदं	१२५	२०
विश्रम्भ°	°विस्रम्भ°	१२५	२२
निश्वासः	विश्वासः	१२६	२
कमपि	किमपि	१२६	१२
°ताशा वर्म°	°ताशावर्म	१२७	२
समन्दा°	स मन्दा°	१२७	५
सहतया	सहनया	१२७	१४
°वेगमेनं कर्म°	'एनं' नास्ति	१२७	१६
°तन्त्रः खलु सर्वं°	'खलु' नास्ति	१२८	१०
गृहेष्वनद्यतन आचारः	'अनद्यतन' नास्ति	१२८	१७
°त्तम् ? किं ब्रवीषि° तद°	'किं ब्रवीषि' नास्ति	१२९	६
°प्यनर्थो	°प्यनर्थं	१२९	११

प्रस्तुते संस्करणे	सावन्त संस्करणे	पृ०	पं०
दासदासी	दासीदास°	१२९	१४
अथ किमाह	अथ सा कि°	१३०	५
मत्प्रियाया	मम प्रियाया	१३०	१२
तदा ते	तदात्वे	१३१	१२
तिथिः पुनरागमः ?	°तिथिः प्रियायाः पुन°	१३१	१८
पुरा यया सा	यया पुरा	१३२	५
श्रुतपूर्वचरा°	श्रुतचरा°	१३२	१०
अरे	अरे रे	१३२	११
°धेय यतिः निः°	'यतिः' नास्ति	१३२	११
चेष्टामुखेन	चेटीमुखेन	१३२	१३
स्वयमति°	स्वयमपि	१३३	१७
°रध्येन	°रध्यं न	१३४	१
मशेषं तथैव	°मशेषतयैव	१३४	११
°स्तेन	°स्ते न	१३५	८
वचो	वाचो	१३५	१७
पदवी	पदवीं	१३५	१८
विपणि°	विपण°	१३६	७
एताः	एताः खलु	१३६	९
उत्कील°	उन्मील°	१३६	१७
लतिकं	°ललितं	१३६	१७
मन्दमुग्ध°	मुग्धमन्द°	१३६	२०
अभिपतति	अतिपतति	१३७	९
गमोऽपि	'अपि' नास्ति	१३७	१०
पूर्वा°	पूर्वा	१३८	२
°रागां	°रागं	१३८	२

प्रस्तुते संस्करणे	सावन्त संस्करणे	पृ०	पं०
°दाज्जा°	°दा जा°	१३८	४५
लोकं	लोके	१३८	१५
विरम	विरम विरम	१३९	८
चिरायति	चिरयति	१३९	९
भवान्न पश्यति	न पश्यति भवान्	१३९	२४
शिखरे	शिखरं	१४०	४
°चीमवलो°	°चीमालो°	१४०	५
पूर्वाञ्चले	पूर्वाचले	१४०	६
काले	°कान्ते	१४१	१३
पुरोगैः	पुरोगे	१४१	१६
°र्णो व्यसनार्णवश्वि°	°र्णार्णवश्चि°	१४२	४
म्रेडयति	°म्रेडयतीति	१४२	९
°च्छेष°	°च्छेषं	१४२	१०
मत्प्रियो°	मत्प्रियो°	१४२	१३
कथय	कथय कथय	१४२	१५
मे दैव°	मद्दैव°	१४२	१५
°ष्यते ।	°ष्यत''इति ?	१४३	४
त्वया सपदि निः°	त्वया निः°	१४३	५
°निन्दोस्तु°	°निन्दो तु°	१४३	६
लघिता	लंघिता	१४३	१९
त्वयैव किमु	त्वयैव तत्र किमु	१४३	१९
°वेदितं तुभ्यम्	°वेदितं युवाभ्याम्	१४३	२२
वत्स ! भगवति किं	किं ब्रवीषि वत्स	१४५	११
न खलु मुखे मे जिह्वा°	न खलु मे जिह्वा°	१४६	७
कमपि	किमपि	१४६	१८

प्रस्तुते संस्करणे	सावन्त संस्करणे	पृ०	पं०
°न्तरेण न युज्यते	°न्तरेण युज्यते	१४७	१०
°वती द्वितीयं	°वतीद्वितीयं	१४७	११
रामभ्रमान्	°रामभ्रमात्	१४७	१८
शया	शय्या	१४८	४
वर्तंते	°वर्तंने	१४८	१८
करोत्स्ना	°येत्रां	१४९	६
प्रोक्तरूपा	प्रोग्ररूपा	१४९	६
ब्रवीषि "कमनज्योत्स्ने !	'कमनज्योत्स्ने' नास्ति	१४९	१०
°यतामलं विल°	यंतामविल°	१४९	२०
पुनश्च	पुनः श्वः	१५०	६

शुद्धिपत्रम्

पृष्ठ	पंङ्क्तिः	अशुद्धः	शुद्धः
३	१९	मुञ्झितम्	मुज्झितम्
४	६	कवयितऽस्य	कवयिताऽस्य
४	१०	दृढ़ं	दृढं
१६	१४	विरति	विरतिं
१७	१७	भृङ्गङ्गी	भृङ्गी
२०	६	वितर्तिताननम्	विवर्तिताननम्
२१	५	अथा	अथ
२१	८	रसाजवैः	रसार्जवै
२२	२	कि	किं
२२	११	रमष्व	रमस्व
२३	११	पुसो	पुंसो
२४	१६	कि	किं
२५	८	पाणि	पार्णि
२८	२	किञ्चिाहं	किञ्चाहं
२८	८	मदेहेषु	मंदेहेषु
३५	१४	हिसकानाम्	हिंसकानाम्
४७	१६	मत्स्याकपताका	मत्स्याङ्कपताका
४८	५	कुक्षिर्म्भिरिता	कुक्षिम्भरिता

पृष्ठ	पंङ्क्तिः	अशुद्धः	शुद्धः
५१	१५	मदेनतुरङ्गम्	मदनतुरङ्गम
५२	१४	सञ्चाचारतः	सञ्चारतः
५३	१३	सक्राधं	सक्रोधं
५६	६	सुमनाऽङ्गपालि	सुमनोऽङ्गपालि
६०	८	दग्धमुखा	दग्धमुखी
६०	१४	कीणवक्त्रा	कीर्णवक्त्रा
६१	१८	दुहितुद्रव्यम्	दुहितुर्द्रव्यम्
६८	४	जिगामिषाया	जिगमिषाया
८६	११	प्रभासकोमुदी	प्रभासकौमुदी
८६	११	तदवसरमेव	सरमेव
६२	११	किमद्यपि	किमद्यापि
६३	१६	मैन्त्रै	मन्त्रै
६४	६	कासाञ्चिचिद्रूरुस्तनम्	कासाञ्चिद्रूरुस्तनम्
६८	१४	वाकयुगलं	बाणयुगलं
१०१	२	नमददुन्नमज्जलवद्	नमदुन्नमज्जलजवद्
१०४	१	घाटी	धाटी
१०७	१६	समञ्चन्	समञ्चम्
१०७	२२	अर्य	अये
१०८	५	अत्रिश्रान्तः	अविश्रान्तः
१२५	२०	लुटण्टाकेन	लुण्टाकेन
१२६	६	भक्ता	भवता
१३१	५	दद्ध	दन्त
१३८	१३	निर्भिद्यन्त	निर्भिद्य
१३८	१४	सञ्छत्तुं	सञ्छेत्तुं
१४१	३	परिजनोऽसंशोध्य	परिजने संशोध्य

पृष्ठ	पंङ्क्तिः	अशुद्धः	शुद्धः
१४२	३	कंदप विलासः	कन्दर्पविलासः
१४२	१३	मात्प्रियोदन्त	मत्प्रियोदन्त
१४२	१४	कराम्यशरणः	करोम्यशरणः
१४३	३	कि	किं
१४५	४	सास्मितं	सस्मितं
१४५	८	व्यूहं तव विरचित	व्यूहं विरचित
१४६	२	धरणिततलतः	धरणितलतः
१४६	६	कथ	कथं
१४८	४	शयाऽद्यापि	शय्याऽद्यापि
१४९	२०	परोहद्वाराणि	प्रहरोहद्वाराणि